# KENDRIYA VIDYALAYA SANGATHAN
# CHENNAI REGION

# केन्द्रीय विद्यालय संगठन
# चेन्नै संभाग

ज्ञान का पुण्य अमृतम्
केन्द्रीय विद्यालय संगठन

## STUDY MATERIAL 2022 – 23

## CLASS X

## अध्ययन सामग्री 2022 – 23

## कक्षा X

# संस्कृतम् / SANSKRIT

## CHIEF PATRON



**Ms. T.Rukmani**
**Offg.Deputy Commissioner**
**KVS Chennai Region**

## PATRON



**Mr.P I Thanga Raja**
**Assistant Commissioner**
**KVS Chennai Region**

## COURSE DIRECTOR



**Dr. V. Kalyanaraman**
**Principal**
**Kendriya Vidyalaya, Perambalur**

## प्राचार्यस्य सन्देशः

केन्द्रीयविद्यालयसङ्गठनस्य अनुभविनां संस्कृतशिक्षकाणां दलेन सह दशमवर्गछात्रेभ्यः संस्कृतविषयस्य अध्ययनसामग्री सज्जीकरणे अहं परमां प्रसन्नताम् अनुभवामि | मम दृढः विश्वासः अस्ति यत् एषा अध्ययनसामग्री अस्माकं के.वि.सं.चेन्नै क्षेत्रस्य प्रत्येकस्य छात्रस्य आवश्यकतां पूरयिष्यति |

अपि च छात्रस्य CBSE BOARD परीक्षायाः सज्जतां मैत्रीपूर्णरीत्या अतीव सुलभं कारयिष्यति | अस्माकं शिक्षकदलेन न केवलं छात्राणां साहाय्यतार्थम् , अपि तु दशमकक्षायाः संस्कृतम् अध्यापयतां शिक्षकाणां साहाय्यतार्थमपि अध्ययन-सामग्रीणां परिकल्पनाय प्रयत्नः विहितः |

नवीनतमस्य प्रश्नपत्रप्रारूपस्य अनुसारं सर्वे भागाःकार्यपत्रसहिताःसज्जीकृताः सन्ति | छात्राणां सर्वस्तरानुकूलनाय पुस्तकस्य अन्तिमे भागे कानिचन आदर्शप्रश्नपत्राणि उत्तरसहितानि एवं कानिचन प्रश्नपत्राणि विना उत्तराणि अपि समाविष्टानि सन्ति |

अस्याः अध्ययनसामग्र्याः संपादनाय मह्यम् अवकाशं, मार्गदर्शनं, प्रेरणां च दत्तवद्भ्याम् सम्माननीयायै उपायुक्त-पदे रतायै श्रीमत्यै टी.रुक्मणी महोदयायै , माननीयाय सहायक-आयुक्ताय श्रीमते पी.आई.टी.राजा महोदयाय च सप्रणामं धन्यवादं व्याहरामि |

आशासे यत् एषा अध्ययन सामग्री छात्राणां कृते अधिकाङ्कप्राप्त्यै एकं सुसाधनम् एवं अध्यापकानामपि पाठने उपयोकरी भविष्यति |

अस्य उत्तमप्रयत्नस्य सफलतासंपादने सहायतां कृतवद्भ्यः संसाधकेभ्यः सदस्येभ्यः च मम हार्दिकाः धन्यवादाः ||

सर्वेभ्यः शुभाशंसाः

डॉ. वे. कल्याणरामन् प्राचार्यः

के. वि . पेरम्बलूर

| | | | |
|---|---|---|---|
| KENDRIYA VIDYALAYA SANGATHAN - CHENNAI REGION | | | |
| संसाधकाः सदस्याः च | | | |
| SANSKRIT STUDY MATIRIALS .CLASS X. SANSKRIT.(शेमुषी भागः 2 ) 2022- 23) | | | |
| | | | |
| Sr No | Name of Sanskrit Teacher | KV Name | MEMBERS/ RESOURCE |
| 1 | MR.SADAGOPAN | KV 1 AFS Tambaram | RESOURCE PERSON |
| 2 | MR.M.NARASIMHAN | KV ANNA NAGAR | RESOURCE PERSON |
| 3 | SHRI A S VENKATESAN | KV AFS Avadi | RESOURCE PERSON |
| 4 | MR. M. MANIKANTAN | KV2 Tambaram | RESOURCE PERSON |
| 5 | SHRI K RAGHUNATHAN | KV AFS Avadi | RESOURCE PERSON |
| 6 | MR. N. THYAGA VARADHARAJAN | KV2 Tambaram | MEMBER |
| 7 | MRS. K REKHA | KV.Coimbatore | MEMBER |
| 8 | MRS..PARMILA DEVI | KV2 Kalpakkam | MEMBER |
| 9 | MR.DEVESH KUMAR | KV.Mandapam Camp | MEMBER |
| 10 | MR.BHOODEV SINGH NOHWAR | KV.RAMESWARAM | MEMBER |
| 11 | MRS. ANCHI | KV NO.1 KALPAKKAM | MEMBER |
| 12 | MR. PARDEEP KUMAR | KV VIRUDHUNAGAR | MEMBER |
| 13 | MR. ANKIT YADAV | KV NO.1 TIRUCHIRAPPALLI | MEMBER |
| 14 | MRS. KAVITA KUMARI | KV MINAMBAKKAM | MEMBER |
| 15 | DR. D. SRINIVASAN | KV OCF Avadi | MEMBER |
| 16 | MR,V.RAMESH | KV ASHOK NAGAR | MEMBER |
| 17 | MR.S.RANGANATHAN | KV ANNA NAGAR | MEMBER |
| 18 | MR. SHUBHAM JAIN | Kv Vijayanarayanam | MEMBER |
| 19 | MR.GHADGE SHRIKANT VARUNRAJ | NO.1 Port Blair | MEMBER |
| 20 | MR. MAGADUM SURAJ JINPAL | NO.II, PORT BLAIR | MEMBER |
| 21 | MR B .S. SRIRAM | KV NO 1 (S1)JIPMER CAMPUS .PONDY | MEMBER |

# केन्द्रीय विद्यालय संगठनम्

## (चेन्नै संभाग:)

## KENDRIYA VIDYALAYA SANGATHAN

## (CHENNAI REGION.)

# अध्ययनसामग्री २०२२-२३

## STUDY MATERIAL 2022-23

## कक्षा - दशमी / CLASS X

# संस्कृतम्- SANSKRIT

# विषय -अनुक्रमणिका


| क्रम.सं. | विषयाः | पुट संख्या |
|---|---|---|
| 1. | विषय-अनुक्रमणिका | 6- 9 |
| 2. | अपठित अवबोधनम् | 10-23 |
| 3. | पत्र -लेखनम्(रचना) | 24-34 |
| 4. | चित्र वर्णनम् | 35-39 |
| 5. | अनुवादः | 40-43 |
| 6. | व्याकरणम् | 44-90 |
| 7. | पठित-अवबोधनम् | 91-212 |
| 8 | प्रश्नपत्र-प्रारूपम् | 213-216 |
| 9. | आदर्श प्रश्नपत्रम् | 217-278 |
| 10. | अभ्यास प्रश्नपत्रम् | 279-322 |

## पाठ्यक्रमः -

| क्रम.सं. | विषय वस्तु | अंशाः |
|---|---|---|
| 1 | अपठित अवबोधनम् | एक पदम्<br>पूर्णवाक्यम्<br>भाषिक कार्यम् |
| 2 | पत्र लेखनम् | रिक्तस्थानानि |
| 3 | चित्र वर्णनम् | संस्कृत वाक्यानि |
| 4 | अनुवादाः | संस्कृत पदैः |
| | व्याकरणम् - | सन्धि:<br>समासाः<br>प्रत्ययाः<br>वाच्यम्<br>अव्ययानि<br>समय लेखनम्<br>अशुद्धि |
| 5 | पठित-अवबोधनम् | पाठाः |
| 6 | आदर्श प्रश्नपत्रम् (3) | उत्तर सहितानि |
| 7 | अभ्यास प्रश्नपत्रम्(3) | उत्तराणि विना<br>( अभ्यासाय) |

# शेमुषी भागः 2

| क्रम.सं. | पाठ्य विषयाः | पाठानां नामानि |
|---|---|---|
| 1 | प्रथमः पाठः | शुचि पर्यावरणम् |
| 2 | द्वितीयः पाठः | बुद्धिर्बलवती सदा |
| 3 | चतुर्थः पाठः | शिशु लालनम् |
| 4 | पञ्चमः पाठः | जननी तुल्यवत्सला |
| 5 | षष्ठः पाठः | सुभाषितानि |
| 6 | सप्तमःपाठः | सौहार्दं प्रकृतेःशोभा |
| 7 | अष्ठमः पाठः | विचित्रः साक्षी |
| 8 | नवमःपाठः | सूक्तयः |
| 9 | द्वादशः पाठः | अन्योक्तयः |

| व्याकरणम् | विषयाः |
|---|---|
| सन्धिः | <u>व्यञ्जन सन्धिः</u><br>(प्रथम वर्णात् तृतीय वर्ण परिवर्तनम् )<br>(प्रथम वर्णात् तृतीय वर्ण परिवर्तनम्)<br><u>विसर्गसन्धिः</u>(विसर्गस्य उत्वम्, रत्वम् , लोपः, विसर्गस्य स्थाने स् , श् ष् ) |
| समासाः | तत्पुरुष समासः ,बहुव्रीहि समासः<br>द्वन्द्व समासः ,अव्ययीभाव समासः |
| प्रत्ययाः | टाप्, ङीप् , मतुप् , तल्, त्व , ठक् |
| वाच्यम् | कर्तृ , कर्म , भाव वाच्यानि |
| समयाः | एक वादनात् द्वादश वादन पर्यन्तम्<br>( सपाद, सार्ध, पादोन ) |
| अव्ययपदानि | उच्चैः,श्वः,च , ह्यः, अद्य , यत्र-तत्र , इदानीम् इत्यादयः |
| अशुद्धि संशोधनम् | वचन-लिंग-पुरुष-लकार-विभक्तयः |

# 1 . अपठित - अवबोधनम्

## ध्यान रखने योग्य बातें

1. गद्यांश को ध्यानपूर्वक दो-तीन बार पढ़ें, ताकि समझ में आ जाए कि उसमें क्या बताया गया है ।

2. एकपदेन उत्तरत के उत्तर एक शब्द में दें तथा पूर्णवाक्येन उत्तरत के उत्तर पूरे वाक्य में दें ।

3. भाषिककार्यम् के प्रश्नों के अंतर्गत सही उत्तर चुनने में अपठित गद्यांश की सहायता ली जानी चाहिए।

4. इस बात का ध्यान रखें कि प्रश्न का उत्तर गद्यांश में से ही हो ।

5. संबंधित प्रश्नों के उत्तर गद्यांश से लें। प्रश्नों के उत्तर सटीक व सारगर्भित होने चाहिए।

6. शीर्षक का चुनाव विषय वस्तु (गद्यांश) से संबद्ध, संक्षिप्त व रोचक हो ।

| | | |
|---|---|---|
| | **अपठितावबोधनम्** | |
| **1.** | **अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत-**<br><br>एकस्मिन् गृहे एका वीणा आसीत्। यदा कदा यः कोऽपि तत्र गच्छति स: वीणां वादयति स्म। परन्तु वीणाशब्दः सम्यक् नास्फुरत्। तस्याः शब्दं श्रुत्वा सर्वे कर्णपीडाम् अनुभवन्ति स्म। कदाचित् क्रोधेन गृहमुख्यः तां वीणां बहिः निष्कास्य स्थापितवान्। एकः भिक्षुकः तां वीणां प्राप्य गृहस्य वरण्डे उपविश्य तां वादितवान्। वीणाया: मनोहरशब्देन जनाः तत्र एकत्रिताः अभवन्। परिवारसदस्याः अपि चकिता अभवन्। यथेयं वीणा तथा जीवनवीणा। तस्याः स्वरसंयोजनार्थम् अस्माभिः यत्नः कर्तव्यः। सत्कर्मसाधनं विना, रागद्वेषपरिहारं विना कौशलशिक्षणं विना च जीवनवीणायाः स्वरः सर्वेषाम् आकर्षणे समर्थो न स्यात्। अतः सर्वैः मानवैः तदर्थमेव यत्नः कर्तव्यः।<br><br>I. **एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**<br><br>i एकस्मिन् गृहे का आसीत्?<br><br>ii वीणाया: मनोहरशब्देन के एकत्रिताः अभवन्?<br><br>iii क्रोधेन गृहमुख्यः कां बहिः निष्कास्य स्थापितवान्?<br><br>II.**पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**<br><br>i कस्याः स्वरसंयोजनार्थम् अस्माभिः यत्नः कर्तव्यः?<br><br>ii गृहस्य वरण्डे उपविश्य कः वीणां वादितवान्?<br><br>iii के चकिता अभवन्?<br><br>III.**यथानिर्देशम् उत्तरत - (केवलं प्रश्नत्रयम्)** | **10**<br><br>1x2=2<br><br>2x2=4 |

| | | |
|---|---|---|
| | i **'स्थापितवान्' इति क्रियापदस्य कर्तृपदं किं भवेत्**?<br>(अ) वीणा (ब) गृहमुख्यः (स) भिक्षुकः (द) जनाः<br>ii **तस्या: स्वरसंयोजनार्थम् अत्र तस्याः इति सर्वनामपदं कस्यै प्रयुक्तम्**?<br>(अ) जीवनवीणायै (ब) वीणायै (स) कर्णपीडायै (द) सर्वैः<br>iii '**आकर्ण्य' इति पदस्य किं पर्यायपदं गद्यांशे प्रयुक्तम्**?<br>(अ)उपविश्य (ब) निष्कास्य (स) श्रुत्वा (द) प्राप्य<br>iv '**सर्वे' इति पदस्य किं क्रियापदम् अनुच्छेदे प्रयुक्तम्** ?<br>(अ) कर्तव्यः (ब)वादितवान् (स) स्यात् (द) अनुभवन्ति स्म<br>**IV. अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं संस्कृतेन लिखत -** | 1x3=3<br><br>1x**1=1** |
| **1.** | **उत्तराणि -**<br>**I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>i वीणा<br>ii जनाः<br>iii परिवारसदस्याः<br>**II.पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>i वीणाया: स्वरसंयोजनार्थम् अस्माभिः यत्नः कर्तव्यः ।<br>ii गृहस्य वरण्डे उपविश्य एक भिक्षुकः वीणा वादितवान् ।<br>iii परिवारसदस्याः चकिता अभवन् ।<br>**III.यथानिर्देशम् उत्तरत - (केवलं प्रश्नत्रयम्)** | |

| | | |
|---|---|---|
| | i **(ब) गृहमुख्य:**<br><br>ii **(ब) वीणायै**<br><br>iii **(स) श्रुत्वा**<br><br>iv **(द) अनुभवन्ति स्म**<br><br>IV. **सत्कर्म साधनम्/ वीणाया: कथा** | |

| | | |
|---|---|---|
| | **कार्यपत्रक** | |
| **2.** | **अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**<br><br>ऐश्वर्यमारोग्यम् भौतिकं सुखम् आदि किञ्चिदपि वस्तु धनेन विना लब्धुं नैव शक्यते। यज्ञाः दानम् उत्सवाः गृहस्थसञ्चालनं वा सर्वमपि कार्यजातं धनेनैव संपद्यते। न केवलमस्मिन्नेव अपितु वेदेऽपि वित्तस्य माहात्म्यं दृश्यते। धनेनैव बलं, पाण्डित्यं प्रभुत्वञ्च लभ्यन्ते। यस्य समीपे धनं वर्तते तस्य जीवनयात्रा सुचारुरूपेण चलति किन्तु यस्य समीपे धनं नास्ति तस्य जीवनयात्रा तु दुःखकरी दृश्यते। धनेन सर्वाणि कष्टानि दूरी भवन्ति ।कथितम् अपि -"धर्मष्टका कर्मष्टका टका एवं परमं पदम्। यस्य गृहे टका नास्ति हा! टका टकटकायते॥" अर्थात् अस्मिन् संसारे धनमेव धर्मः अस्ति, धनमेव कर्म अस्ति। एवं संसारे सर्वोच्चपदं धनम् अस्ति । परं यस्य | **10** |

| | | |
|---|---|---|
| | नरस्य समीपे धनं न भवति सः अहर्निशं अन्यं प्रति दुर्बलः भूत्वा केवलं विवशतया पश्यति एव\| अतः कथितम् -धनमेव सर्वं वर्तते।<br><br>**I.एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्)**<br><br>i धनेन कानि दूरी भवन्ति?<br><br>......................................<br><br>ii संसारे सर्वोच्च पदं किम् अस्ति?<br><br>.....................................<br><br>iii किञ्चिदपि वस्तु केन विना लब्धुं नैव शक्यते?<br><br>......................................<br><br>II. **पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्)**<br><br>i धनेन किं किं संपद्यते?<br><br>...........................................<br><br>ii अस्मिन् संसारे किं धर्मः अस्ति?<br><br>..............................................<br><br>iii यस्य नरस्य समीपे धनं न भवति सः किं करोति?<br><br>..............................................<br><br>III. **यथानिर्देशम् उत्तरत - (केवलं प्रश्नत्रयम्)**<br><br>i **'माहात्म्यम्' इति कर्तृपदस्य क्रियापदं किम्**?<br><br>(क) शक्यते (ख) दृश्यते (ग)अस्ति (घ)भवति | 1x2=2<br><br>2x2=4<br><br>1x3=3 |

| | | |
|---|---|---|
| | ii **वेदाः अपि धनस्य महत्त्वं गायन्ति । अस्मिन् वाक्ये कर्तृपदं किम्**?<br>(क) वेदाः (ख) धनस्य (ग) महत्त्वम् (घ) अपि<br>iii **अस्मिन् अनुच्छेदे 'दूरे' पदस्य किं विलोमपदम् प्रयुक्तम्**?<br>(क) धर्मः (ख) धने (ग) लब्धुं (घ) समीपे<br>iv **धनेन सर्वाणि कष्टानि दूरीभवन्ति । अत्र विशेषणपदं किमस्ति**?<br>(क) सर्वाणि (ग) कष्टानि (ख) धनेन (घ) भवन्ति<br>**IV. अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं संस्कृतेन लिखत -**<br>**..........................................** | 1x1=1 |
| **3.** | एकः टोपिकाविक्रेता अनेकवर्णाः टोपिकाः विक्रीणाति स्म। एकस्मिन् दिने श्रान्तः स एकस्य वृक्षस्य शीतलच्छायायाम् उपाविशत् । शनैः-शनैः निद्रा तं स्ववशे अकरोत्। सः पुटकं शिरस्तले निधाय अस्वपत्। वृक्षे स्थिताः वानराः विविधवर्णयुक्ताः टोपिकाः पुटके दृष्ट्वा अधः अवातरन्। शनैः-शनैः ते पुटकात् टोपिकाः निष्कास्य शिरसि धारयित्वा वृक्षम् आरोहन्। प्रबुद्धः टोपिकाविक्रेता यदा उपरि पश्यति तदा रक्तनीलवर्णाः टोपिकाः धारयतः वानरान् पश्यति। "हा दैव! नष्टाः मे सर्वाः टोपिकाः!" इति विलपन् सः आत्मनः शिरसि धारितां टोपिकाम् अपि वेगेन भूमौ क्षिपति कथयति च- "रे दुष्टाः! सर्वाः टोपिकाः तु गृहीताः। एताम् अपि नयत।" प्रकृत्या अनुकरणशीलाः वानराः अपि स्व-स्वटोपिकाः भूमौ प्रक्षिप्तवन्तः। आश्चर्यचकितः सः सर्वाः टोपिकाः विचित्य स्वपुटके स्थापयित्वा प्रसन्नः सन् गृहं प्रति अचलत्।<br>**1. एकपदेन उत्तरत-**<br>(i) टोपिकाविक्रेता काः विक्रीणाति स्म?<br>**उत्तरम्** ........................................................................ | |

(ii) प्रकृत्या वानराः कीदृशाः भवन्ति ?

**उत्तरम्** ........................................................................

**II. पूर्णवाक्येन उत्तरत-**

(i) प्रबुद्धः टोपिकाविक्रेता वृक्षे कान् अपश्यत्?

**उत्तरम्**

.............................................................................................................................

(ii) श्रान्तः टोपिकाविक्रेता किम् अकरोत् ?

**उत्तरम्**

.............................................................................................................................

**III. भाषिककार्यम्-**

(i) 'अधः' इति पदस्य किं विपर्ययपदम् अनुच्छेदे प्रयुक्तम् ?

उत्तरम् ..........................................................................

(ii) 'क्षिपति' इति क्रियायाः कर्तृपदं किम् ?

उत्तरम् ..........................................................................

(iii) 'अनुकरणशीलाः' इति विशेषणपदस्य किं विशेष्यपदं अनुच्छेदे आगतम् ?

उत्तरम् ..........................................................................

IV. अस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।

उत्तरम् ...................................

**4.**

**अस्माकं प्रियं भारतम् 'आर्यावर्त: "भारतवर्षम्" हिन्दुस्तान' 'इण्डिया' इति चतुर्भिः नामभि: प्रसिद्धम् परन्तु सम्प्रति जनै: अस्य नाम 'भारतम्' इत्येव स्वीकृतम्। भारतं कश्मीरात् कन्याकुमारीपर्यन्तं सुविस्तृतं राजते। अस्य मुकुट इव नगाधिराज: हिमालय: उत्तरस्यां दिशि शोभते। दक्षिणे चास्य**

| | | |
|---|---|---|
| | हिन्दमहासागरः विद्यते। अद्यत्वे भारते अष्टाविंशतिः राज्यानि सन्ति, तानि सर्वाण्यपि प्रादेशिकविधानसभाभिः सञ्चाल्यन्ते। दिल्लीनगरं भारतस्य राजधानी केन्द्रं चास्ति। भारते विविधाः जातयः सम्प्रदायाः, धर्माः भाषाश्च। परं सर्वे भारतीयाः परस्परं प्रेम्णा व्यवहरन्ति। अत्रत्याः गङ्गादिनद्यः सकलं जगत पुनन्ति। अत्रैव अवतीर्णाः श्रीरामः, श्रीकृष्णः, महात्माबुद्धः, महावीरः, शङ्करादिमहामानवाः। अत्रैव रघुः, चन्द्रगुप्तः, अशोकः, विक्रमादित्यः, प्रभृतयः महान्तः शासकाः अभवन्। आधुनिककाले गाँधीः, जवाहरलालः, सुभाषः, चन्द्रशेखरः, मालवीयादयः महापुरुषाः अजायन्त। स्वकार्यैश्च भारतस्य महत्त्वं वर्धितवन्तः। राष्ट्रभक्तिः अस्माकं प्रथमं कर्त्तव्यम् अस्ति। अस्माभिः सर्वैरपि भारतस्य सेवा मनसा, वाचा कर्मणा च करणीया।<br><br>I.एकपदेन उत्तरत (केवलं प्रश्नद्वयमेव)।<br><br>(i) भारतम् कतिभिः नामभिः प्रसिद्धम् अस्ति?<br><br>(ii) भारतस्य राजधानी किम् अस्ति?<br><br>(ii) भारतस्य मुकुट इव कः अस्ति?<br><br>II.पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयमेव)।<br><br>(i) सर्वे भारतीयाः कीदृशः व्यवहरन्ति?<br><br>(ii) आधुनिककाले के महापुरुषाः अजायन्त?<br><br>(iii) अस्माभिः केन प्रकारेण भारतस्य सेवा करणीया ?<br><br>III. अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत।<br><br>IV. भाषिककार्यम् (केवलं प्रश्नत्रयमेव)।<br><br>(i) अस्मिन् गद्यांशे 'हिमालयः' किं विशेषणपदं प्रयुक्तम्? | |

| | | |
|---|---|---|
| | (क) उत्तरस्याम् (ख) विशाल: (ग) महासागर: (घ) नगाधिराज:<br><br>(ii) अस्मिन् गद्यांशे 'व्यवहरन्ति' इति क्रियापदस्य कर्तृपदस्य किम्?<br><br>(क) सर्वे (ख) भारतीया: (ग) अत्रैव (घ) परस्परम्<br><br>(iii) 'अकर्त्तव्यम्' इति पदस्य अत्र किं विपर्ययपदं प्रयुक्तम्?<br><br>(क) करणीयम् (ख) कर्त्तव्यम् (ग) महत्त्वम् (घ) परस्परम्<br><br>(iv) अनुच्छेदे 'अस्माभिः सर्वैरपि' इति कर्तृपदस्य क्रियापदं किम्?<br><br>(क) करणीया (ख) अजायन्त (ग) विद्यते (घ) शोभते<br><br>उत्तराणि<br><br>I.एकपदेन उत्तरत (केवलं प्रश्नद्वयमेव)।<br><br>(i) चतुर्भिः ।<br><br>(ii) दिल्लीनगरम् ।<br><br>(ii) नगाधिराज: हिमालय: ।<br><br>II.पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयमेव)।<br><br>(i) सर्वे भारतीया: परस्परं प्रेम्णा व्यवहरन्ति।<br><br>(ii) आधुनिककाले गांधी:, जवाहरलाल:, सुभाष:, चन्द्रशेखर:, मालवीयादय: महापुरुषा: अजायन्त।<br><br>(iii) अस्माभिः सर्वैरपि भारतस्य सेवा मनसा, वाचा कर्मणा च करणीया।<br><br>III. अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत।<br><br>प्रियं मे भारतम् | |

| | | |
|---|---|---|
| 5 | IV. **भाषिककार्यम् (केवलं प्रश्नत्रयमेव)।**<br><br>(i) (**घ**) **नगाधिराज**:<br><br>(ii) (**ख**) **भारतीया**:<br><br>(iii) (**ख**) **कर्त्तव्यम्**<br><br>(iv) (**क**) **करणीया**<br><br>संसारे सज्जनाः तथैव दुर्जनाः अपि वर्तन्ते। सज्जनानां संगतिः सत्सङ्गतिः दुर्जनानां संगतिश्च कुसङ्गतिः भवति। सामाजिकः प्राणी सङ्गतिं विना स्थातुं न शक्नोति। अतः मनुष्याय सङ्गतिः अनिवार्या एव। सत्सङ्गत्या मनुष्यः सदैव उन्नतिं करोति। कुसङ्गत्या तु सः पतनमार्गे नूनं पतति। गुणं विना कोऽपि मानवः सन्मानवः न भवति। सत्संगेन सज्जनः सन्मार्गम् अनुसरति, गुणानभिनन्दति। सत्सङ्गस्य प्रभावेन मनुष्येषु शनैः शनैः गुणाः प्रविश्यन्ति अवगुणाश्च बहिः निर्गच्छन्ति। सङ्गस्य प्रभावः सर्वत्र दृश्यते। उक्तञ्च-'कोटोऽपि सुमनः सङ्गात् आरोहति सतां शिरः' सत्संगत्या मनुष्यः समाजे मानं प्राप्नोति किन्तु कुसंगतौ पतित्वा तु मनुष्यः अपयशः निन्दाम् अपमानमेव प्राप्तनोति।<br>अतः सर्वदा सत्सङ्गतौ एव वस्तव्यम्।<br><br>I **एकपदेन उत्तरत** -1x2=2 (केवलं प्रश्नद्वयम्)<br><br>(i) केषां सङ्गतिः सत्सङ्गतिः भवति?<br>(ii) सङ्गतिः कस्मै अनिवार्या एव अस्ति?<br>(iii) कुत्र सज्जनाः दुर्जनाः च वर्तन्ते? | |

**II पूर्णवाक्येन उत्तरत -** 2x2=4 (केवलं प्रश्नद्वयम्)

(i) सत्सङ्गेन मनुष्यः किं किं करोति ?

(ii) कुसङ्गतौ पतित्वा मनुष्यः किं प्राप्नोति?

(iii) कया मनुष्यः सदैव उन्नतिं करोति?

**iii यथानिर्देशम् उत्तरत -** 1x3=3 (केवलं प्रश्नत्रयम्)

**(i) 'आरोहति' इति क्रियापदस्य कर्तृपदं गद्यांशात् चित्वा लिखत्?**

(क) संगात् (ख) अनुसरति (ग) सुमनः (घ) कीट:

**(ii) सः पतनमार्गे नूनं पतति अत्र 'सः' इति सर्वनामपदं कस्मै प्रयुक्तम्?**

(क) कीटाय (ख) गुणाय (ग) मनुष्याय (घ) प्रभावाय

**(iii) 'कुमार्गम्' इत्यस्य विलोमपदं चित्वा लिखत?**

(क) सन्मार्गम् (ख) नूनम् (ग) वस्तव्यम् (घ) सत्संगतिः

**(iv) 'प्राणी' इति पदस्य विशेषणपदं किम्?**

(क) सामाजिकः (ख) मनुष्यः (ग) दुर्जनः (घ) कीट:

**(IV) अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं संस्कृतेन लिखत -1x1=1**

**उत्तराणि**

**I एकपदेन उत्तरत-**

(i) सज्जनानाम्

(ii) मनुष्याय

(iii) संसारे

**II पूर्णवाक्येन उत्तरत -**

(i) सत्सङ्गेन मनुष्यः सदैव उन्नतिं करोति। सत्सङ्गस्य प्रभावेण मनुष्येषु शनैः शनैः गुणाः प्रविश्यन्ति अवगुणाः च बहिः निर्गच्छन्ति।

| | | |
|---|---|---|
| 6. | (ii) कुसङ्गतौ पतित्वा मनुष्यः अपयशः निन्दाम् अपमानम् एव प्राप्नोति।<br><br>(iii) सत्सङ्गत्या मनुष्यः सदैव उन्नतिं करोति \|<br><br>**iii यथानिर्देशम् उत्तरत-**<br><br>(घ) कीट:<br><br>(ग) मनुष्याय<br><br>(क) सन्मार्गम्<br><br>(क) सामाजिकः<br><br>**(IV) शीर्षकं**<br><br>"सत्सङ्गस्य प्रभावः। सत्सङ्गतौ एव वस्तव्यम्।"<br><br>मानवस्य बौद्धिकविकासाय ज्ञानवर्धनाय च पुस्तकालयानां महत्त्वपूर्णं स्थानं वर्तते। पुस्तकालयेषु विविधपुस्तकानां सङ्ग्रहो भवति। अत्र विविधभाषाणां पत्र-पत्रिकादयोऽपि प्रतिदिनं आयान्ति। अस्माकं पुस्तकालयः नगरस्य रमणीये स्थाने वर्तते। अस्मिन् दशसहस्राणि पुस्तकानि सन्ति। अस्माकं पुस्तकालये हिन्दी-आङ्ग्ल-संस्कृतभाषाणां पत्र-पत्रिकाः प्रतिदिनं आयान्ति। अस्य समीपे एकः वाचनालयः वर्तते। यत्र बहवः जनाः, छात्राः, युवतयश्च प्रतिदिनं आगत्य स्वाध्यायं कुर्वन्ति। अस्माकं पुस्तकालयस्य भवनं विशालं रमणीयञ्च वर्तते। अस्य पुस्तकालयस्य सर्वे जनाः प्रशंसा कुर्वन्ति। अस्माकं ज्ञानवर्धनाय अस्य महती भूमिका वर्तते। अयम् एकः आदर्शः पुस्तकालयः विद्यते।<br><br>**I. एकपदेन उत्तरत-** 1x2=2 **(केवलं प्रश्नद्वयम्)**<br><br>(i) पुस्तकालयेषु केषां सङ्ग्रहो भवति? | |

............................................................

(ii) कस्य समीपे वाचनालयः वर्तते?

..............................................................

(iii) अस्माकं पुस्तकालये कति पुस्तकानि सन्ति?

..............................................................

II. **पूर्णवाक्येन उत्तरत-** 2x2=4 **(केवलं प्रश्नद्वयम्)**

(i) किमर्थं पुस्तकालयानां महत्त्वपूर्णं स्थानं वर्तते?

...................................................................................

(ii) अस्माकं पुस्तकालयः कुत्र वर्तते?

...................................................................................

(iii) अस्य पुस्तकालयस्य के प्रशंसा कुर्वन्ति?

.......................................................................................

III. **यथानिर्देशम् उत्तरत -** 1x3=3 **(केवलं प्रश्नत्रयम्)**

(I) 'पत्र-पत्रिकाः' इति कर्तृपदस्य गद्यांशे क्रियापदं किमस्ति?

(क) सन्ति (ख) आयान्ति (ग) कुर्वन्ति (घ) वर्तते

(II) 'आदर्शः' इति विशेषणपदस्य गद्यांशात् विशेष्यपदं चित्वा लिखत।

(क) विद्यालयः (ख) वाचनालयः (ग) भवनम् (घ) पुस्तकालयः

(III) 'जनस्य' इत्यस्य समानार्थकपदं गद्यांशात् चित्वा लिखत।

(क) वाचनालस्य (ख) मानवस्य (ग) पुस्तकालयस्य (घ) गृहस्य

(IV) 'निन्दाम्' इत्यस्य विलोमपदं गद्यांशात् चित्वा लिखत।

(क) प्रशंसाम् (ख) विशालम् (ग) दुःखम् (घ) हर्षम्

**IV. अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं संस्कृतेन लिखत -** 1x**1=1**

**....................................................**

# 2 . रचनात्मकं लेखनम्

सङ्केतधारितम् औपचारिकम् / अनौपचारिकपत्रम्

# पत्र लेखनम्

## पत्र के दो प्रकार

| | |
|---|---|
| औपचारिक पत्रम्<br>कार्यालयीय पत्र | अनौपचारिक पत्रम्<br>वैयक्तिक पत्र |

## ध्यान रखने योग्य बातें

| | | | |
|---|---|---|---|
| औपचारिक पत्र अपरिचित जनों को, जैसे- कार्यालयों, दुकानदारों और कम्पनी आदि के कार्य अथवा नियुक्ति हेतु लिखे जाते हैं। अनौपचारिक पत्र सदैव परिचित जनों को ही लिखे जाते हैं। अतः ये अपेक्षाकृत सरल होते | जब शब्दों के अर्थ समझ आ जाएँ, तभी पत्र के रिक्तस्थानों की पूर्ति करनी चाहिए। | पूरा पत्र पढ़ने व समझने के बाद मंजूषा के शब्दों को पढ़ना व समझना चाहिए। | इस तरह से पत्र पूर्ति पूर्णतया शुद्ध होगी। |

# महत्वपूर्ण बिन्दु

छात्रा: स्वयं मञ्जूषागतपदसहायतया पत्रपूर्तिं कुर्वन्तु। सहायतार्थम् उत्तराणि पत्राणाम् अन्ते दत्तानि।

सङ्केतरूपे मञ्जूषा दत्ता भवति। मञ्जूषातः समुचित - पदानि चित्वा पत्रं पूरणीयम्।

परीक्षायां 'नाम' इतिस्थाने क ख ग इति लेखनीयम्। किन्तु यदि प्रश्ने पत्रलेखकस्य नाम दत्तम् अस्ति तदा तदैव लेखनीयम्।

पत्रे सरलानि लघूनि च वाक्यानि लेखनीयानि।

**रिक्तस्थान भरने के सरल नियम**

| | | |
|---|---|---|
| | 1. विशेषण- विशेष्य के अनुसार -<br>जो लिंग, वचन, विभक्ति विशेषण में हो उसी के अनुसार विशेष्य चुनें ।<br>2. कर्ता, क्रिया, कर्म के अनुसार -<br>वाक्य में कर्ता, कर्म, क्रिया की समझ के अनुसार रिक्तस्थान भरें ।<br>3. कर्ता-क्रिया के पुरुष व वचन के अनुसार -<br>कर्ता जिस पुरुष व वचन का होता है क्रिया भी उसी पुरुष व वचन की चुनें ।<br>4. समय सूचक शब्दों के अनुसार -<br>वर्ष, महीना, पक्ष, सप्ताह, वार, समय आदि के अनुसार रिक्तस्थान भरें ।<br><br>❖ औपचारिक पत्र के भाग -<br>1. पत्र प्राप्त करने वाले अधिकारी का पदनाम व पता<br>2. विषय<br>3. सम्बोधन<br>4. विषयवस्तु<br>5. समापन<br>6. लिखने वाले का नाम / दिनांक | |

❖ **अनौपचारिक पत्र के भाग -**

**1. भेजने वाले का पता एवम् दिनांक**

**2. सम्बोधन**

**3. अभिवादन**

1 **4. विषयवस्तु**

**5. पत्र प्राप्त करने वाले के साथ प्रेषक का सम्बन्ध / पत्र लिखने वाले का नाम**

**अनौपचारिक पत्र - सम्बोधन व अभिवादन**

- **अपने से बड़ों के लिए**

| सम्बोधन | अभिवादन | सम्बन्ध |
|---|---|---|
| आदरणीयः /आदरणीया/पूजनीयः / पूजनीय | सादर चरणस्पर्श नमो नमः | भवतः पुत्रः / पुत्री<br>भवत्याः पुत्रः / पुत्री |

- **मित्र के लिए**

| | | |
|---|---|---|
| प्रिय मित्र / सखी | नमो नमः | भवतः मित्रम्/भवत्याः सखी |
| | | |

- **अपने से छोटों के लिए**

| | | |
|---|---|---|
| प्रिय अनुज / प्रिय (नाम) | शुभाशिषः / स्नेहाशिषः | भवतः अग्रजः / अग्रजा |
| | | |

| | | |
|---|---|---|
| 2 | संकेताधारितम् - अनौपचारिकपत्रम्<br><br>भवती प्रियंवदा । भवती विद्यालयस्य छात्राभिः सह शैक्षिक भ्रमणाय भुवनेश्वरं गन्तुम् इच्छति । एतदर्थम् अनुमतिं धनराशिं च प्राप्तुं पितरं प्रति लिखितं पत्रं मञ्जूषायाः प्रदत्तपदैः पूरयित्वा पुनः लिखत - 5<br><br>छात्रावास:<br><br>केन्द्रीयः विद्यालयः<br><br>1. ................................<br><br>तिथिः ............................<br><br>माननीयाः पितृवर्याः,<br><br>सादरं 2. ...........<br><br>भवतः पत्रं प्राप्तम् । मम 3. ........ परीक्षा समाप्ता । परीक्षापत्राणि अतीव शोभनानि जातानि । यावत् परीक्षा-परिणामः आगच्छति तावत् आगामि मासस्य 4. ..... विद्यालयस्य अध्यापिकाः अस्मान् शैक्षिक- भ्रमणाय 5. ........ नेष्यन्ति । अहम् अपि 6. ......... सह गन्तुम् इच्छामि। एतदर्थं मया 7. ...................... एकसहस्रं रूप्यकाणि दातव्यानि सन्ति । यदि भवताम् अनुमतिः स्यात् तर्हि अहमपि स्वज्ञानवर्धनाय अस्मिन् यात्रायाम् 8. .......... \| अहम् प्रार्थयामि यत् स्वानुमतिं प्रदाय 9. ........ उपर्युक्तां राशिं च प्रेषयन्तु भवन्तः मातृचरणयोः मम प्रणामाः निवेदनीयाः ।<br>भवताम् प्रिया पुत्री<br><br>10. ............................. | |

<table>
<tr><td rowspan="2">3</td><td>मञ्जूषा-(प्रथमसप्ताहे , शीघ्रातिशीघ्रम् , प्रणमामि , भुवनेश्वरम् , ताभिः , दिल्लीत: , प्रियंवदा, कक्षाध्यापिकायै, प्रथमसत्रीया, गच्छेयम् )</td><td rowspan="2"></td></tr>
<tr><td>उत्तराणि - 1. दिल्लीतः 2. प्रणमामि 3. प्रथमसत्रीया 4. प्रथमसप्ताहे 5. भुवनेश्वरं 6. ताभिः 7. कक्षाध्यापिकायै 8. गच्छेयम्<br>9. शीघ्रातिशीघ्रम् 10. प्रियंवदा<br><br>2. कार्यपत्रक<br><br>भवान् सुरेशः। स्वमित्रं प्रति लिखितम् पत्रं मञ्जूषापदसहायतया पूरयित्वा पुनः लिखत - 5<br>मन्दाकिनी - छात्रावासात्<br>दिल्लीतः<br>तिथिः ..............................<br>प्रिय मित्र 1. .............................<br>सस्नेहं नमस्ते<br>अत्र सर्वं कुशलम् । भवान् अपि कुशली इति मन्ये गतसप्ताहे अस्माकं<br>2................संस्कृतसम्भाषणशिविरम् 3................ आसीत् । दशदिनानि यावत् वयं संस्कृतसम्भाषणस्य 4. ............................ अकुर्म । तत्र एकस्याः लघुनाटिकायाः 5. ........................... अभवत् । अहं तु विदूषकस्य 6. ............................ कृतवान् । सर्वे जनाः हसित्वा</td></tr>
</table>

| | | |
|---|---|---|
| | 7. ............. अकुर्वन् । अहम् इदानीं सर्वदा संस्कृतेनैव 8. ........................... \| भवान् अपि संस्कृतेन 9. .................. अभ्यासं करोतु । पितरौ 10. ........................ मम प्रणामांजलिं निवेदयतु ।<br><br>भवतः मित्रम्<br><br>सुरेशः<br><br>मञ्जूषा - (अभ्यासम्, अभिनयम् , मंचनम्, देवदत्त !, प्रति, करतलध्वनिम्, आयोजितम्, वदामि, सम्भाषणस्य, विद्यालये) | |
| 4 | 3. संकेताधारितम् - औपचारिकपत्रम्<br><br>भवत्याः नाम शिल्पी । भवती केन्द्रीय विद्यालये दशम्यां कक्षायां पठति। शुल्कदण्डक्षमार्थम् प्राचार्यं प्रति लिखितं पत्रं मञ्जूषातः शब्दान् चित्वा लिखत - 5<br><br>सेवायाम्<br><br>श्रीमान् प्राचार्य महोदय:<br><br>केन्द्रीय विद्यालयः<br><br>नव दिल्ली<br><br>विषय - शुल्कदण्डक्षमार्थम् प्रार्थना - पत्रम्<br><br>महोदय ,<br><br>सविनयं निवेदनं अस्ति 1. ................... गते दिवसे अहम्2. ........... प्राप्तः , तदा मम समक्षं अकस्मादेव 3. ............ न आसीत् \| ततो अहं विद्यालयस्य 4........... निगृहीतः। भवता तदबलम्ब्य अहं | |

| | | |
|---|---|---|
| | 5. ........................दण्डितः । मम 6.................. सदैव प्रत्यभिज्ञानपत्रं 7. ............................ तिष्ठति स्म परं<br><br>8. ............................. नववस्त्रपरिधानात् तत् गृहे एव विस्मृतम्। प्रथमोऽयम् मम 9. .......................... क्षन्तव्यः शुल्कदण्डं निरस्तं<br><br>10. .......................... इति मे निवेदनम् ।<br><br>सधन्यवादः<br><br>भवदीया आज्ञाकारिणी शिष्या<br><br>शिल्पी<br><br>दिनांक .....................................<br><br>मञ्जूषा- दोष:, करणीयम्, शरीरशिक्षाप्रमुखेन, गुटिकायाम्, यत्, विद्यालयम्, प्रत्यभिज्ञानपत्रं, समीपे, ह्यः, दशरूप्यकशुल्कदण्डेन<br><br>उत्तराणि - 1. यत् 2. विद्यालयम् 3 . प्रत्यभिज्ञानपत्रं 4. शरीरशिक्षाप्रमुखेन 5. दशरूप्यकशुल्कदण्डेन 6. समीपे 7. गुटिकायाम् 8. ह्यः 9. दोष: 10. करणीयम्।<br><br>5 कार्यपत्रक<br><br>भवतः नाम रमेशः । निजभगिनीविवाहे सम्मिलितार्थं प्राचार्यम् प्रति लिखितं पत्रं मञ्जूषायाम् प्रदत्तपदैः पूरयत - 5 | |

| | | |
|---|---|---|
| | **सेवायाम्**<br><br>**1. ...................... प्राचार्य महोदय:**<br><br>**केन्द्रीय विद्यालयः**<br><br>**चेन्नई नगरम्**<br><br>**विषय- अवकाशप्रदानार्थम् आवदेनपत्रम् ।**<br><br>**महोदय:**<br><br>**सविनयम् निवेदनम् अस्ति यत् अहम् 2. ......................... विद्यालये 3. .......................... कक्षायां पठामि। मम 4. ....................... विवाहः परश्वः भविष्यति । वरयात्रा तु 5. ...................... आगमिष्यति । अतएव अहम् 6. ................................ आगन्तुम् न**<br><br>**7. .............. कृपया माम् 8. ............................ अवकाशं स्वीकृत्य 9.................................... भवन्तः ।**<br><br>**सधन्यवादः।**<br><br>**भवत: 10. .................... शिष्यः**<br><br>**रमेशः**<br><br>**दशमकक्षा**<br><br>**दिनांक : ..........................**<br><br>**मञ्जूषा -(अनुग्रहीष्यन्ति, श्रीमान् , भवतः, दशम्यां, दिनत्रयस्य, भगिन्याः, चण्डीगढतः, शक्नोमि, विद्यालयं, आज्ञाकारी )** | |

# 3. चित्रवर्णनस्य विभागः

**प्रश्न 1 प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत -**



**मञ्जूषा - (खेलन्ति, क्रीडाक्षेत्रे , उपविशति, वृक्षाः, बालाः, फुटबॉलक्रीडा, पश्यन्ति, गृहम् दृश्यते, पादकन्दुकेन, पितृभ्याम्, काक: )**

1. इदम् चित्रम् क्रीडाक्षेत्रस्य अस्ति।
2. अत्र एकम् सुन्दरम् गृहम् अपि दृश्यते।
3. अत्र अनेके वृक्षाः सन्ति।
4. क्रीडकाः पादकन्दुकेन खेलन्ति।
5. द्वौ बालौ पितृभ्याम् सह फुटबॉलक्रीडां पश्यतः|

**कार्य - पत्रक**

**प्रश्न 2 प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत -**




**मञ्जूषा - (छात्राः, भवनम्, मेघाः, हसन्ति, घटिका, विद्यालयस्य , सूर्यः, हसन्ति )**

**.........................................................................................**

**.........................................................................................**

**.........................................................................................**

**........................................................................................**

**-------------------------------------------------------------------------------------**

**प्रश्न 5 प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत**



**मंजूषा- छात्राः, वनस्य, महिला, रोपयन्ति, पर्वताः, पादपान्, आकाशे, सिञ्चति, मेघाः, दृश्यन्ते ।**

**उदाहरणम् -**

**1. इदं चित्रं वनस्य अस्ति ।**

**2. चित्रे एका महिला अस्ति ।**

**3. अत्र छात्राः पादपान् रोपयन्ति ।**

**4. आकाशे मेघाः सन्ति ।**

**5. एतस्मिन् चित्रे पर्वता: अपि दृश्यन्ते ।**

**6. वने बहवः वृक्षा: सन्ति ।**

**7. एकः बालकः पादपान् सिञ्चति ।**

**8. महिलाः छात्रान् निर्दिशति ।**

**प्रश्न 6 प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत**



**मञ्जूषा - (वाटिकायाम् ,पशवः ,परस्परं ,वृक्षः ,तडागस्य ,जलम् ,समीपे ,आगत्य ,पिबन्ति ,पक्षिणः ,अपि ,भल्लुकः , कुरङ्गः )**

**……………………………………………………………………………………**

**……………………………………………………………………………………**

**……………………………………………………………………………………**

**…………………………………………………………………………………**

**-------------------------------------------------------------------------------------**

**प्रश्न .7. अधोलिखितं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तपदानां सहायतया पञ्च वाक्यानि लिखत।**



**(मंजुषा :–पुस्तकालयस्य, बालकौ, बालिकाः, अध्ययनं, पुस्तकानि)**
**उत्तराणि**
**(1) इदं चित्रं पुस्तकालयस्य अस्ति ।(यह चित्र पुस्तकालय का है।)**
**(2) अस्मिन् चित्रे पुस्तकानि सन्ति । (इस चित्र में पुस्तकें हैं।)**
**(3) चित्रे दौ बालकौ स्तः । (चित्र में दो बालक हैं।)**
**(4) चित्रे बालिकाः अपि सन्ति ।(चित्र में लड़कियां भी हैं।)**
**(5) चित्रे सर्वे प्रसन्नाः सन्ति ।(चित्र में सभी प्रसन्न हैं।)**

**प्रश्न 8. अधोलिखितं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तपदानां सहायतया पञ्च वाक्यानि लिखत।**



**मञ्जूषा -[ उड्डीयते, नरम्, कूपात्, पाययति, काकः, गगने खगाः, जलं, वृक्षस्य, एका महिला, रज्ज्वा, प्रतीक्षते, निष्कासयति, उपरि, द्वेमहिले। ]**

**उत्तराणि -**

**(i) अस्मिन् चित्रे ग्रामस्य दृश्यम् अस्ति।**

**(ii) एका महिला रज्ज्वा कूपात् जलम् निष्कासयति। चित्राधारितं वर्णनम्**

**(iii) महिला नरम् जलं पाययति।**

**(iv) द्वे महिले पंक्तौ प्रतीक्षेते**

**(v) गगने खगाः उड्डीयन्ते।**

# 4 . अनुवाद विभागः

पाठ्यबिन्दूनां विवरणम् :-

i)हिन्दी भाषाया: वाक्यानि संस्कृतेन अनूद्य लेखनाय आवश्यक-पदानां परिशीलनं कुर्म: -

ii) वाक्यनिर्माणे कर्तृपदस्य पुरुष तथा वाचनानुसारम् क्रियापदस्य प्रयोग: भवतु ।

कर्तृपदानि क्रियापदानि

एकवचनम् द्विवचनम् बहुवचनम् पुरुष: एकवचनम् द्विवचनम् बहुवचनम्

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| | स: (=वह ) | तौ (=वे दोनों ) | ते (=वे सब ) |
| | सा | ते | ता: |
| | तत् | ते | तानि |
| प्रथम: | पतति | पतत: | पतन्ति |
| | त्वम् (=तुम ) | युवाम् (=तुम ) | यूयम् (=तुम सब) |
| मध्यम: | पतसि | पतथ: | पतथ |
| | अहम् (=मैं ) | आवाम् (हम दोनों ) | वयम् ( हम सब) |
| उत्तम: | पतामि | पताव: | पताम: |

1.बालक विद्यालय जाता है। - बालकः विद्यालयं गच्छति।

2.मन्दिर के चारों ओर भक्त है। - मन्दिरं परितः भक्ताः सन्ति।

3.ईश्वर तीनों लोकों में व्याप्त है। - ईश्वरः त्रिलोकं व्याप्नोति।

4.विवेक आज घर जायेगा।                -- विवेकः अद्य गृहं गमिष्यसि ।

5.यह राम की किताब है।                -- इदं रामस्य पुस्तकम्अस्ति ।

6.प्रयाग में गंगा-यमुना का संगम है । -- प्रयागे गंगायमुनयोः संगमः अस्ति ।

7.ताजमहल यमुना किनारे पर स्थित है । -- ताजमहलः यमुना तटे स्थितः अस्ति

8.सच और मीठा बोलो ।                -- सत्यं मधुरं च वद ।

9.हम सब भारत के नागरिक हैं |        - वयं भारतस्य नागरिका: सन्ति |

10..हम दोनों ने आज चलचित्र देखा ।    -आवां अद्य चलचित्रम् अपश्याव ।

उदाहरणानि :-

बालक विद्यालय को जाते हैं|    -    बालका:विद्यालयं गच्छन्ति |

( कर्तृपद-बालक-बालका: )        (विद्यालय को - द्वितीयार्थ:- विद्यालयं)

( जाते हैं - क्रियापद - गच्छन्ति ) - एवं हिन्दी वाक्यानाम् अनुवाद: करणीय: |

एवमेव अस्मिन् प्रश्ने हिन्दी पदानाम् आधारेण संस्कृतपदानि रचयित्वा सार्थक-संस्कृत-वाक्यानि रचयत ।

लड़की घर से पानी लाती है ।        -    बालिका गृहात् जलम् आनयति ।
क्या मैं अन्दर आ सकता हूं ?        -  किम् अहम् अन्त: आगन्तुम् शक्नोमि ?
वे सब पानी पीने केलिए वहां जाते हैं ।-    ते जलं पातुम् तत्र गच्छन्ति ।
बादलों से पानी गिरता है ।        -    मेघेभ्य: जलं पतति ।
गंगा हिमालय से निकलती है ।        -    गंगा हिमालयात् निस्सरति ।
हम सब कल गांव को जाएंगे । -    वयं श्व: ग्रामं गमिष्याम: |

11. आजकल तुम कहाँ रहते हो ? Where do you stay now a days ?

अद्यत्वे त्वं कुत्र वससि ?

12. परिश्रमी सदैव सफल होता है | Labourios ( hard working ) people always succeed. परिश्रमी ( उद्यमी ) सदैव सफलः भवति |

13. हे छात्रो ! सदा सत्य बोलो | Students ! Always speak the truth.

हे छात्राः ! सदा सत्यं वदत |

14. हमें वृद्धजनों का सम्मान करना चाहिए |

We should respect the elderly.

वयं वृद्धजनानां सम्मानं कुर्याम |

15. गंगा का जल पवित्र होता है | The water of Ganga is pure.

गङ्गायाः जलं पवित्रं भवति |

16. मित्र की सहायता करनी चाहिए | A friend should be helped.

मित्रस्य सहायता कर्तव्या |

17. उसने क्या कहा ? What did he say ?

सः किम् अवदत् |

18. खाते हुए नहीं बोलना चाहिए | One should not speak while eating.

खादन् न वक्तव्यम् |

19. कल मै शिमला नगर जाऊँगी | Tomorrow I will go to Shimla.

श्वः अहं शिमला नगरं गमिष्यामि |

20. परिश्रम से ही काम सफल होते हैं | Works are achieved only through hard work.

उद्यमेन एव कार्याणि सिद्ध्यन्ति |

21. हम सब कल नगर जाएँगे | We will go to city tomorrow.

वयं श्वः नगरं गमिष्यामः |

22. वे सब कल मन्त्री को देखे | They saw the Minister yesterday.

ते / ताः ह्यः मन्त्रिणम् / अमात्यम् / सचिवम् अपश्यन् |

23. सच ही जीतता है | Truth only wins.

सत्यमेव जयते |

24. आदमी को झूठ नहीँ बोलना चाहिए | One should not speak false.

अ ) नरः / मनुष्यः असत्यं न वदेत् OR असत्यं न वक्तव्यम्

25. तुम क्या करना चाहते हो ? What do you want to do ?

त्वं किं कर्तुम् इच्छसि ?

# 5. अनुप्रयुक्तव्याकरणम्

# व्यञ्जन सन्धि:

**1. वर्गीय -प्रथमाक्षाराणां तृतीयवर्णे परिवर्तनम्।**

**पूर्ववर्णः** ( प्रथमपदस्य अन्तिमवर्णः ) = कस्यापि वर्गस्य प्रथमाक्षरम्

**परवर्णः** ( द्वितीयपदस्य प्रथमवर्णः ) = कोऽपि स्वरः / कस्यापि वर्गस्य तृतीय/चतुर्थ वर्णाः / य / र / ल / व / ह

**संधिः** ( परिवर्तनम् ) = वर्गप्रथमाक्षरस्य तृतीयाक्षरे परिवर्तनम् |

यथा - जगत् + ईश:=जगदीश:

2. वर्गीय -प्रथमवर्णस्य पञ्चमवर्णे परिवर्तनम्।

**पूर्ववर्णः** ( प्रथमपदस्य अन्तिमवर्णः ) = कस्यापि वर्गस्य प्रथमाक्षरम्

**परवर्णः** ( द्वितीयपदस्य प्रथमवर्णः ) = कस्यापि वर्गस्य 5 वर्णः एव

**संधिः** ( परिवर्तनम् ) = वर्गप्रथमाक्षरस्य तस्य वर्गस्य पञ्चमाक्षरे एव परिवर्तनम् |

यथा - तत् + मयम् = तन्मयम्

मिश्रित-उदाहरणानि :-

1) सद्ग्रन्थानां सञ्चयः कर्त्तव्य:।
2) भवत्+मनोरथं पूरयित्वा आत्मानम् अनुहीतं कर्तुम् इच्छामि।
3) षड्दर्शनम् अवगन्तव्यम् ।
4) वाक् + मयम् तपः महत्त्वपूर्णं भवति ।
5) कक्षायाम् वाक्+ईश: श्रेष्ठ: छात्र: अस्ति।
6) विद्याभन्ति सत्+गुणा:।
7) दिक्+गज: कुत्र वसति।
8) प्रत्येकम् अयनस्य अवधि: षण्मासा:।
9) षड्दोषा: पुरुषेण हातव्या:।
10) यदिच्छसि तदुच्यताम्।

11) वाक्+अर्थौ इव पार्वती परमेश्वरौ।

12) षडेते पाठका: गुणा: सन्ति।

13) सन्तोष: एव सत्+निधानम्।

विसर्ग सन्धिः

**1 विसर्गस्य उत्वं**

| विसर्गात् पूर्ववर्णः | विसर्गः | विसर्गात् पर |
|---|---|---|
| अ | : | अ, वर्गीय व्यञ्जन-तृतीय, [ ग् ज् ड् द् ब् ] |
| | | चतुर्थ [ घ् झ् ढ् ध् भ् ] |
| | | पञ्चम वर्णाः [ङ् ञ् ण् न् म्] |
| | | अवर्गीय व्यञ्जनानि [ य् र् ल् व् ह् ] |

परिणामः = विसर्ग स्थाने ओ, अ स्थाने ऽ (अवग्रहः)

उदाहरणम् –

रामः + अपठत् = रामोऽपठत्

बालः + वदति = बालो वदति

| विसर्गः | विसर्गात् परवर्णः | परिणामः |
|---|---|---|
| सः / एषः | अ | विसर्ग स्थाने ओ, अ स्थाने ऽ (अवग्रहः) |

उदाहरणम् -

सः + अस्ति = सोऽस्ति

एषः + अपि = एषोऽपि

**2. विसर्गस्य रत्वं**

विसर्गात् पूर्ववर्णः    विसर्गः    विसर्गात् परवर्णः

अ - आ  विहाय अन्ये स्वराः    :    स्वराः [ अ...... औ ]

वर्गीय व्यञ्जन -तृतीय, [ ग् ज् ड् द् ब् ]

चतुर्थ [ घ् झ् ढ् ध् भ् ]

पञ्चम वर्णाः [ङ् ञ् ण् न् म्]

अवर्गीय व्यञ्जनानि [ य् र् ल् व् ह् ]

परिणामः = विसर्ग स्थाने र्

उदाहरणम् -

शिशुः + हसति = शिशुर्हसति

कविः + आगतः = कविरागतः

विसर्गः    विसर्गात् परवर्णः

अव्यय सम्बन्ध विसर्गः :    स्वराः [ अ...... औ ]

[ पुनः, प्रातः...]    वर्गीय व्यञ्जन -तृतीय, [ ग् ज् ड् द् ब् ]

चतुर्थ [ घ् झ् ढ् ध् भ् ]

पञ्चम वर्णाः [ङ् ञ् ण् न् म्]

अवर्गीय व्यञ्जनानि [ य् र् ल् व् ह् ]

परिणामः= विसर्ग स्थाने र्

उदाहरणम् -

बहिः + अस्ति = बहिरस्ति

**3 विसर्गस्य लोपः**

| विसर्गः | विसर्गात् परवर्णः | परिणामः |
|---|---|---|
| सः / एषः | अ - विहाय सर्वे वर्णाः | विसर्गलोपः |

उदाहरणम् -

सः + आनयति = स आनयति

एषः +वदति = एष वदति

| विसर्गात् पूर्ववर्णः | विसर्गः | विसर्गात् परवर्णः | परिणामः |
|---|---|---|---|
| अ | : | अ - विहाय सर्वे स्वराः | विसर्गलोपः |

उदाहरणम् -

बालः + एव = बाल एव

देवः + आगच्छति = देव आगच्छति

| विसर्गात् पूर्ववर्णः | विसर्गः | विसर्गात् परवर्णः |
|---|---|---|
| आ | : | स्वराः [ अ...... औ ] |
| | | वर्गीय व्यञ्जन -तृतीय, [ ग् ज् ड् द् ब् ] |
| | | चतुर्थ [ घ् झ् ढ् ध् भ् ] |
| | | पञ्चम वर्णाः [ङ् ञ् ण् न् म्] |
| | | अवर्गीय व्यञ्जनानि [ य् र् ल् व् ह्] |

परिणामः= विसर्गलोपः

उदाहरणम् -

छात्राः + उपविशन्ति = छात्रा उपविशन्ति

कन्याः + गायन्ति = कन्या गायन्ति

**4. विसर्ग स्थाने स् श् ष्**

| विसर्गः | विसर्गात् परवर्णः | परिणामः |
|---|---|---|
| : | स् त् थ् | स् |
| : | श् च् छ् | श् |
| : | ष् ट् ठ् | ष् |

उदाहरणम् -

धनिकः + तत्र = धनिकस्तत्र

वीराः + चत्वारः = वीराश्चत्वारः

दीपः + षष्ठः = दीपष्षष्ठः

**रेखाङ्कितपदानां सन्धिं सन्धिच्छेदं वा कुरुत -**

१ **<u>प्रकृतिः + एव</u>** शरणम् =

२ **<u>दशनैः + अमुना</u>** जनग्रसनम् =

३ **<u>ग्रामः + तत्र</u>** भवति =

४ **<u>राजसिंहः + नाम</u>** राजपुत्रः =

५ वने **<u>व्याघ्रः + नष्टः</u>** =

६ **<u>शृगालः + हसन्</u>** आह =

७ किं नामधेयः **<u>भवतोः + गुरुः</u>** =

८ **<u>वयसः + तु</u>** न किंचिदन्तरम् =

९ **<u>सः +अयं</u>** परिकरः =

१० **<u>कविः + अपि</u>** पुराणः व्रतनिधिः =

११ **<u>को वा</u>** भवति =

१२ **<u>भवेतोर्वंशस्य</u>** कर्ता =

१३ **<u>प्रवासोऽयं</u>** =

१४ **<u>दारुणश्च</u>** =

१५ **स दीन इति** जानाति =

१६ **<u>कृषको हर्षातिरेकेण</u>** गृहमागात् =

१७ **<u>वानरा हसन्ति</u>** =

१८ **<u>खग एव</u>** वनराजः भविष्यति =

१९ **<u>करुणापरो गृही</u>** आश्रयं प्रायच्छत् =

२० पिता किं **<u>तपस्तेपे</u>** =

**समासः**

" समसनं नाम समास:। अर्थात् यत्र द्वित्रिपदानि एकीक्रियन्ते तत्र समास: इति व्यवह्रियते।

1) सुबन्तानां पदानामेव समास: सम्पद्यते।
2) समासे पूर्वपदम्, उत्तरपदम् इति व्यवहार: सम्पद्यते।
3) आदिमं पदं पूर्वपदत्वेन अन्यत्सर्वं द्वित्रिपदान्यपि मिलित्वा उत्तर पदत्वेनैव व्यवह्रियते।

अर्थात् द्वि-त्रयाणां शब्दानां विभक्तिनां निष्कासनपूर्वकं एकत्रीकरणं समास: इति।

अर्थात् दो या दो से अधिक शब्दों को विभक्तियों को हटाकर एक शब्द बना देना समास है।

जैसे , संस्कृतस्य छात्र: - संस्कृतच्छात्रः

(संस्कृत का छात्र)- संस्कृतछात्र

यत्र समासात् पूर्वं प्रत्येकं पदम् अपि विभक्तियुक्तम् भवति तत् विग्रहपदम् इति कथ्यते।

समस्तपदे तु पूर्वपदस्य केवलं मूलरूपं स्वीक्रियते|उत्तरपदमेव विभक्तियुक्तं भवति |

पदार्थप्राधान्यानुसारं समास: चतुर्विध: भवति।

१.अव्ययीभाव: (पूर्व पद का अर्थ प्रधान है)

२.तत्पुरुष: (उत्तर पद का अर्थ प्रधान है)

३.द्वन्द्व: (दोनों पदों का अर्थ प्रधान है)

४.बहुव्रीहि: (कोई अन्य पदार्थ प्रधान है)

**पूर्वपदार्थप्रधानः अव्ययीभावसमासः-**

अव्ययीभावसमासे पूर्वपदम् अव्ययं अथवा उपसर्गः भवति |

अव्ययीभावसमासपदं नपुंसकलिङ्गे भवति | अव्ययीभावसमास-अनुगुणं

विग्रहवाक्ये विद्यमानानि अनतिक्रम्य , अभाव , पश्चात्/अनुरूपं ,समीपम् , सह/सहितं इति एतानि पदानि क्रमेण यथा , निर् , अनु , उप , स इति परिवर्तन्ते | द्विरुक्ते पदे प्रति इत्यस्य प्रयोगः | पुनः समासे ते पूर्वपदत्वेन प्रयुज्यन्ते |

मतिम् अनतिक्रम्य = **यथामति**
समयम् अनतिक्रम्य = **यथासमयम्**
बाधानाम् अभावः = **निर्बाधम्**
विघ्नानाम् अभावः = **निर्विघ्नम्**
रथस्य पश्चात् = **अनुरथम्**
मृगस्य पश्चात् = **अनुमृगम्**
रूपस्य योग्यम् = **अनुरूपम्**
पदस्य योग्यम् = **अनुपदम्**
नगरस्य समीपम् = **उपनगरम्**
यमुनायाः समीपम् = **उपयमुनम्**
क्रोधेन सहितम् = **सक्रोधम्**
गर्वेण सहितम् = **सगर्वम्**
मासं मासं = **प्रतिमासम्**
वृक्षं वृक्षं = **प्रतिवृक्षम्**
**उत्तरपदार्थः प्रधानः भवति** – **तत्पुरुषः समासः**
( पाठ्यक्रमे विभक्तितत्पुरुषः एव)
कुछ विशिष्ट शब्दों के साथ द्वितीया आदि तत्पुरुष समास होते हैं।

| विभक्तिः | विशिष्टशब्दाः | उदाहरणानि |
|---|---|---|
| द्वितीया | श्रित-अतीत-पतित-गत-प्राप्त-आपन्न-गामि-बुभुक्षु- | कृष्णश्रितः - कृष्णं श्रितः<br>नरकपतितः- नरकम् पतितः |
| तृतीया | पूर्व-सदृशः-सम-ऊन-कलह-निपुन-मिश्र | मासपूर्वम् – मासेन पूर्वम्<br>विद्यासमः - विद्यया समः |
| चतुर्थी | बलि-हित-सुख-रक्षित | भूतबलिः - भूताय बलिः<br>गोरक्षितम् – गवे रक्षितम् |
| पञ्चमी | मुक्त-पतित-भय-भीत-भीतिः | भयमुक्तः - भयात् मुक्तः<br>वृक्षपतितः - वृक्षात् पतितः |
| षष्ठी | षष्ठीविभक्त्यन्तं पदं अन्यपदैः | महानगरमध्ये – महानगराणां मध्येजीवनरक्षा –जीवनस्य रक्षा |
| सप्तमी | कुशल-प्रवीण-निपुण-दक्षः-पटुः | लेखनकुशलः - लेखने कुशलः<br>संस्कृतपटुः - संस्कृते पटुः |

**उभयपदार्थप्रधानः - द्वन्द्वसमासः|** समासे व्यवहृतानां सर्वेषां पदानां अर्थानां प्राधान्यम् | पदद्वयं चेत् समस्तपदं द्विवचने , त्रीणि अथवा अधिकानि पदानि चेत् समस्तपदं बहुवचने भवति | उत्तरपदस्य लिङ्गम् एव समस्तपदस्य लिङ्गम् भवति |

रामः च लक्ष्मणः च = रामलक्ष्मणौ

कृष्णः च अर्जुनः च = कृष्णार्जुनौ

पत्रं च फलं च पुष्पं च = पत्रफलपुष्पाणि

**अन्यपदार्थप्रधानः बहुव्रीहिसमास: |** समस्तपद-अतिरिक्त पदस्य अर्थस्य प्राधान्यं भवति | बहुव्रीहिसमासपदं अन्यस्य पदस्य विशेषणं भवति |

अर्थात्- 1. “भयाकुलचित्त: (व्याघ्र:) = भयाकुलं चित्तं यस्य स:।

2. गृहीतकरजीवित:(व्याघ्र:) =गृहीतं करे जीवितं येन स:।

3. जम्बुककृतोत्साहात् (व्याघ्रात्) =

जम्बुकेन कृत:उत्साह:यस्मात् तस्मात् ।

4. प्रत्युत्पन्नमति:(बुद्धिमती) = प्रत्युत्पन्ना मति: यस्या: सा।

5. कृपार्द्रहृदया (सुरभि:) = कृपया आर्द्रं हृदयं यस्या: सा।

6. अकारणद्वेषि (मन:) = अकारणं द्वेषं यत् तत् ।

7. उदीरितोSर्थ: (कोSपि जीव:) = उदीरितम् अर्थं येन स:।

8. विशालकाय: (गज:) = विशाल: काय: यस्य स:।

9. करुणापर: (काक:) = करुणा एव परम् यस्य स:।

10. कृष्णवर्ण: (काक:) = कृष्णं वर्णं यस्य स:।

अत्र समासरूपेण विद्यमानपदानि स्व स्व अर्थं विहाय कोष्ठकान्तर्गत पदं प्रति विशेषणताम् एव भजन्ते । अत: एव इमानि पदानि बहुव्रीहि समासान्तर्गतानि।

मिश्रित-अभ्यासः -

**निर्मलम् = मलानाम् अभाव:**
**उपग्रामम् = ग्रामस्य समीपे**
**प्रतिगृहम् = गृहंगृहं प्रति**
**हरिततरूणाम् = हरिता: च ये तरव: तेषाम्**
**पितुः गृहम् = पितुर्गृहम्**
**गलबद्धशृगालक: = गले बद्ध: शृगाल: यस्य स:**
**प्रत्युत्पन्नमति: = प्रत्युत्पन्ना मति: यस्याः सा**
**गृहीतकरजीवित: = गृहीतं करे जीवितं येन स:**
**सुराधिप: = सुराणाम् अधिप:**
**समानशीलव्यसनेषु = समानं शीलं व्यसनं येषां तेषु**

**प्रत्ययाः**

प्रत्ययस्य परिभाषा - धातो: प्रातिपादिकस्य वा पश्चात् यस्य प्रयोगः क्रियते सः प्रत्ययः इति कथ्यते। ( धातु अथवा । प्रातिपदिक (शब्द) के पश्चात् जिसका प्रयोग किया जाता है वह प्रत्यय कहा जाता है।)

प्रत्यानां भेदाः - प्रत्ययानां मुख्यरूपेण त्रयो भेदाः सन्ति । ते क्रमश: इमे सन्ति- (प्रत्ययों के मुख्य रूप से तीन भेद हैं । जो क्रमशः ये हैं-)

(1) कृत् प्रत्ययाः
(2) तद्धितप्रत्ययाः
(3) स्त्रीप्रत्ययाः

तद्धितप्रत्ययाः -

येषां प्रत्ययानां प्रयोग: संज्ञासर्वनामादिशब्दानां पश्चात् क्रियते ते तद्धितप्रत्ययाः कथ्यन्ते। यथा - जिन प्रत्ययों का प्रयोग संज्ञा, सर्वनाम आदि शब्दों के पश्चात् किया जाता है वे तद्धित प्रत्यय कहे जाते हैं । जैसे- धन + मतुप् = धनवान्

स्त्रीप्रत्ययाः-

येषां प्रत्ययानां प्रयोगः पुँल्लिङ्गशब्दान् स्त्रीलिङ्ग परिवर्तयितुं क्रियते ते स्त्रीप्रत्ययाः कथ्यन्ते । यथा- (जिन प्रत्ययों का प्रयोग पुँल्लिङ्ग शब्दों को स्त्रीलिङ्ग में परिवर्तित करने के लिये किया जाता है वे स्त्री प्रत्यय कहे जाते हैं। जैसे-)

कुमार + ङीप् = कुमारी

अज + टाप् = अजा

अज + टाप् = अजा

**क) तद्धित-प्रत्यया: -**

**1) मतुप् = तेन युक्त इति अर्थे** ( प्रत्ययस्य रूपं पदेन सह - वान् …….. / मान् …… भवति )

* अकारान्त-शब्दै: सह पुंलिंगे - वान् वन्तौ वन्त:, स्त्रीलिंगे -वती वत्यौ वत्य:, नपुंसके- वत् वती वन्ति|

* “अ” भिन्न-अन्य-स्वरान्त-शब्दै: सह -पुं-मान् मन्तौ मन्त:,स्त्री -मती मत्यौ मत्य:,नपुंस- मत् मती मन्ति|

यथा :- धन + मतुप् = पुंलिंगे - धनवान् ( भवत् शब्दवत् रूपाणि ) , स्त्री - धनवती ( नदी शब्दवत् )

शक्ति + मतुप् = पुं - शक्तिमान् ( भवत् शब्दवत् रूपाणि ) , स्त्री - शक्तिमती ( नदी शब्दवत् )

**2) ठक् = सम्बन्ध-अर्थे** ( ठक् केनापि पदेन सह युज्यमाने “इक” इति परिवर्तते । पुनः ठक् प्रत्यययुक्तं पदं अन्यपदस्य विशेषणम् भवति |

⁎ ठक् प्रययस्य प्रयोगेन शब्दस्य प्रथमस्वरः वृद्धिं प्राप्नोति ।

यथा :- अ/आ = आ , इ / ई / ए = ऐ ,

उ /ऊ / ओ = औ , ऋ/ॠ = आर् ।

यथा :- समाज + ठक् = सामाजिक:/ सामाजिकी / सामाजिकम् - बालक / नदी / पुष्प शब्दवत् रूपाणि )

3) त्व = धर्म ( abstract noun ) ( प्रत्ययस्य रूपं पदेन सह " त्वम् " भवति । पुष्प- नपुंसकलिंगवत् रूपाणि भवन्ति ।

यथा :- मानव + त्व = मानवत्वम् , महत् + त्व = महत्त्वम् , पशु + त्व = पशुत्वम् ।

**4) तल् = धर्म** ( abstract ) (प्रत्ययस्य रूपं पदेन सह " ता" भवति | लता-स्त्रीलिंगवत् रूपाणि भवन्ति ।

यथा :- मानव + तल् = मानवता , क्रूर + तल् = क्रूरता ।

**ख) स्त्री-प्रत्ययौ -**

**1) टाप्** ( प्रत्ययस्य रूपं पदेन सह " आ " भवति ।

⁎अक-अन्त-पुंलिंग-शब्दानाम् कृते "इका" भवति। लतावत् रूपाणि भवन्ति ।

यथा :- बाल + टाप् = बाला , बालक + टाप् = बालिका , मूषक + टाप् = मूषिका ।

**2) ङीप्** ( प्रत्ययस्य रूपं पदेन सह"ई" भवति । नदीवत् रूपाणि भवन्ति ।

यथा :- नद + ङीप् = नदी , मुख + ङीप् = मुखी |

## <u>प्रकृति-प्रत्यय कार्यपत्रम्</u>

प्र. निम्नलिखित प्रश्नान् संयोज्य/ विभज्य वा लिखत ।

1) प्रातकालस्य शोभा **<u>रमणीया</u>** | 1. रमण+ईया 2. रमणीय+टाप् 3. रमणीय+त्व

2) **<u>स्थिरत्वं</u>** लाघवं मृजा | 1. स्थिर+मतुप् 2. स्थिर+टाप् 3. स्थिर+त्व

3) सर्वेषां मत्कृते **<u>महत्+त्व</u>** विद्यते | 1. महत्वं 2. महत्वे 3. महत्त्वं

4) **<u>शिक्षिका</u>** कक्षामध्ये पाठयति |1. शिक्षिका+त्व 2. शिक्षक+टाप् 3. शिक्षिका+तल्

5) **<u>गुणवान्</u>** जनः यशः प्राप्नोति । 1. गुण + शतृ 2. गुण + मतुप् 3. गुण + टाप्

6) जम्बुकः - स्वामिन् ! यत्रास्ते सा **<u>धूर्ता</u>** तत्र गम्यताम् । 1. धूर्त + तल् 2. धूर्त + टाप् 3. धूर्त + त्व

7) **<u>चरित्रवान्</u>** जनः एव सर्वोत्तमः भवति । 1. चरित्र + क्तवतु 2. चरित्र + मतुप 3. चरित्र + तव्यत्

8) सा **<u>एका</u>** बुद्धिमती महिला अस्ति । 1. एक+ टाप् 2. एक + आ 3. एका+ ङीप्

9) **<u>स्थिरत्वं</u>** लाघवं मृजा ।1. स्थिर +मतुप् 2. स्थिर +टाप् 3. स्थिर +त्व

10) **<u>शक्ति + मतुप्</u>** जनः सर्वं रक्षति। 1. **शक्तिमान्** 2. शक्तिमानः 3. शक्तिवान् 4. शक्तियत्

11) **<u>श्रद्धावान्</u>** लभते ज्ञानम्। 1. **श्रद्धा+मतुप्** 2. श्रद्धा+वत् 3. श्रद्धा+वतुप् 4. श्राद्ध+मतुप्

12) धनस्य **<u>महत्त्वं</u>** सर्वे जानन्ति। 1. महा+त्वम् 2. मह+त्व **3.महत्+त्व** 4. महत्+शतृ

13) सर्वेषामेव मत्कृते **<u>महत् + त्व</u>** विद्यते | 1. महत्ता 2. महत्वम् 3. महत्त्वम्

14) तस्य भार्या **<u>बुध्दि + मतुप्</u>** पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता | 1. बुध्दिमान् 2. बुध्दिमति 3. बुध्दिमत्

15) रानी क्रीडायाम् **<u>कुशल + टाप्</u>** अस्ति | 1. कुशला 2. कुशलतम् 3. कुशलत्व

16) ननु **<u>भगवान्</u>** वाल्मीकिः । 1. भग + वान् 2. भग + मतुप् 3. भग + टाप् 4. भग + त्व

17) जननी **<u>तुल्यवत्सल + टाप्</u>** अस्ति। 1. तुल्यवत्सलः 2. तुल्यवत्सलम् 3. तुल्यवत्सला 4. तुल्यवत्सलाः

18) **<u>श्री + मतुप्</u>** सुभाषचन्द्रः चण्डीगढनगरे अनिवसत् | 1. श्रीमती 2. श्रीमत् 3. श्रीमान्

19) गुरोः **<u>गुरुत्वं</u>** वर्णयितुं न शक्यते । 1. गुरो + त्वम् 2. गुरु + क्त 3. गुरु + त्व

20) सर्वेषु **<u>समानता</u>** स्यात् । 1. समान + त 2. समान + तल् 3. समान + टाप्

## अव्ययपदानि

**सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ।**

**वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्॥**

**जिन शब्दों का लिंग, वचन, कारक और काल के अनुसार रूप नहीं बदलता, उन्हें अव्यय कहते हैं। इन शब्दों के लिंग, विभक्ति, लकार, पुरुष और वचन नहीं होते । इनका शब्द रूप या धातु रूप नहीं चलता।**

**अव्यय (सदा एक जैसा रहने वाला)**

**लिङ्ग से रहित**

**विभक्ति से रहित**

**वचन से रहित**

## अव्ययानां वर्गीकरणम्

**स्थानबोधकानि**

अत्र (यहाँ), तत्र (वहाँ), अन्यत्र (कहीं और), सर्वत्र (सब जगह), यत्र (जहाँ)

**कालबोधकानि**

यदा (जब), तदा (तब), सदा (हमेशा), एकदा (एक बार), अधुना (अब), अद्य (आज), श्वः (आने वाला कल), हयः (बीता हुआ कल), इदानीम्, साम्प्रतम् सम्प्रति (अब)

**प्रश्नबोधकानि**

किम् (क्या), कुत्र (कहाँ), कदा (कब), कुतः (कहाँ से), कथम् (कैसे), किमर्थम् (किसलिए)

**अन्यानि**

च (और), अपि (भी), यदि (यदि), तर्हि (तो), यथा (जैसा), तथा (वैसा), सम्यक् (ठीक से), एव (ही) , सहसा (अचानक) ,उच्चैः ,यावत् - तावत् , शनैः , इतस्ततः ( इधर - उधर )

| अव्ययपदानि | | | |
|---|---|---|---|
| 1. | उच्चैः | ऊँचे / जोर से | HIGH/ LOUDER |
| 2. | च | और | AND |
| 3. | श्वः | आने वाला कल | TOMORROW |
| 4. | ह्यः | बीता हुआ कल | YESTERDAY |
| 5. | अद्य | आज | TODAY |
| 6. | यदा | जब | WHEN |

| | | | |
|---|---|---|---|
| 7. | तदा | तब | THEN |
| 8. | कदा | कब | WHEN |
| 9. | सहसा | अचानक | SUDDENLY |
| 10. | वृथा | बेकार | USELESS |
| 11. | शनैः | धीरे | SLOWLY |
| 12. | अपि | भी | ALSO |
| 13. | कुतः | कहाँ से | FROM WHERE |
| 14. | इतस्ततः | इधर- उधर | HERE AND THERE |
| 15. | अत्र – तत्र | यहाँ – वहाँ | HERE - THERE |
| 16. | यत्र – तत्र | जहाँ - कहाँ | WHERE - THERE |
| 17. | इदानीम् ,अधुना ,सम्प्रति, साम्प्रतम् | अब | NOW |
| 18. | यदि – तर्हि | यदि – तो | IF – THEN |
| 19. | यावत् – तावत् | जब तक – तब तक | WHEN – TILL |

**उच्चैः – HIGH/ LOUDER**

- **मेघाः उच्चैः गर्जन्ति |**
- **सा उच्चैः हसति |**
- **वने सिंहः उच्चैः गर्जति |**

**शनैः - SLOWLY**

- कच्छपः शनैः-शनैः चलति ।
- सीता  शनैः-शनैः गायति ।

**श्वः - TOMORROW**

- अहं श्वः दिल्ली नगरं गमिष्यामि ।
- सः श्वः नूतनं पुस्तकं पठिष्यति |
- विद्यालये श्वः अवकाश: भविष्यति |

**ह्यः - YESTERDAY**

- ह्यः  मम गृहे उत्सवः आसीत् ।
- ताः ह्यः क्रीडां द्रष्टुं अगच्छन् |

**इदानीम् ,अधुना ,सम्प्रति, साम्प्रतम्  - NOW**

- इदानीम् अहं संस्कृत पठामि ।
- अधुना गल्पं न करणीयम् ।
- इदानीम्  मोहनः  गृहे  नास्ति  ।
- वयम् अधुना पठामः।

**अत्र – तत्र - HERE - THERE**

- अत्र आगच्छ ।
- अत्र  एकः  व्याघ्रः  अस्ति  |
- तत्र गच्छ |

**यत्र – तत्र - WHERE – THERE**

- यत्र बालकाः तत्र कोलाहलः|
- यत्र यत्र धूमः तत्र तत्र अग्निः ।

**इतस्ततः - HERE AND THERE**

- कुक्कुरः इतस्ततः भ्रमति ।
- वने पशवः इतस्ततः भ्रमन्ति |

**वृथा – USELESS**

- वृथा कलहम् मा कुरु ।
- जलं विना जीवनं वृथा भवति ।

**यदा – तदा – WHEN- THEN**

- यदा अहं गमिष्यामि तदा सः आगमिष्यति ।
- यदा वृष्टिः भवति तदा मयूरः नृत्यति ।

**कुत्र – WHERE**

- त्वं कुत्र गच्छसि ?
- सः कुत्र अगच्छत्?

**सहसा – SUDDENLY**

- सहसा विदधीत न क्रियाम् ।
- बालिका सहसा अहसत् |

## अभ्यासप्रश्नाः

## 1. उचितम् अव्ययपदं चित्वा वाक्यानि पूरयत -

1. पुत्र! अधुना त्वं .............. आगच्छसि? (कुत्र, कुतः, कदा)

2. ते बालकाः .............. इतस्ततः भ्रमन्ति । (मृषा, वृथा, कुतः)

3. .............. अहम् भ्रमणाय गमिष्यामि । (श्वः,ह्यः, कुतः)

4. ................... त्वं कुत्र गच्छसि ? (कुतः, कदा, साम्प्रतम्) |

5. ............. वयम् खो-खो खेलम् अक्रीडाम। (अद्य, ह्यः, श्वः)

6.अधुना वयम् क्रीडामः, त्वम्.............. क्रीड। (एव, अपि, मा)

7. .......... अहम् जन्तुशालाम् अगच्छम् । (अद्य, ह्यः, श्वः)

8.बालकः ............... पठति । (अधुना, कदा , यदा)

9.सः ................ वदति । ( उच्चैः, सर्वदा , सदा)

10. ................. सत्यं वद । (सदा , कदा, कदापि)

| |
|---|
| उत्तराणि - 1.कुतः 2.वृथा 3.श्वः 4.साम्प्रतम् 5.ह्यः 6.अपि 7.ह्यः 8.अधुना 9.उच्चैः 10.सदा |

## 2. उचितम् अव्ययपदं चित्वा वाक्यानि पूरयत -

| |
|---|
| उच्चैः, तत्र, तावत्, अद्य, यदि, तदा, अत्र, च, कदा, तत्र |

1. ...................... सोमवारः अस्ति।

2. यावत्  अहम् आगच्छामि ...............  त्वं तत्रैव तिष्ठ ।

3. ................. सः गच्छति तर्हि अहम् अपि गच्छामि ।

4. गृहे शिशुः ...................  क्रन्दति।

5. यत्र वर्षा ................. जलम् |

6. यदा अधर्मः भवति .................. ईश्वरः आगच्छति |

7. .................... एकः सिंहः अस्ति |

8.  ................ बालकाः क्रीडन्ति |

9. भवान् विद्यालयं ...................गमिष्यति ?

10. बालकाः बालिकाः ....................क्रीडतः |

**उत्तराणि** - 1.अद्य  2.तावत्  3.यदि  4.उच्चैः  5.तत्र  6.तदा  7.तत्र  8.अत्र  9.कदा  10.च

## कार्य-पत्रकम्-1

**मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत.**

**मञ्जूषा-** अपि, एव, वृथा, विना, इदानीम्, पुरा, विना, नूनम्, इतस्ततः, ह्यः, इतस्ततः

(i) .............................. अस्माकम् विद्यालये मम मात्रा सह अनुजा ........................ आगच्छत्।

(ii) देवेशस्य गृहे तस्य पिता ........................ व्यवहारकुशलः।

(iii) वने पशवः ........................ भ्रमन्ति।

(iv) परीक्षाम् ........................ मूल्यांकनम् न भवति।

(v) अस्माभिः समयः ........................ न यापनीयः।

(vi) भवान् ........................ भ्रमित्वा समयं व्यर्थं मा कुरुत।

(vii) धनम् ........................ जीवनं कठिनम् ।

(viii) ........................ अहं परीक्षायां सर्वोच्चं स्थानं प्राप्स्यामि।

(ix) ........................ नैतिकमूल्यानां न्यूनता जाता।

(x) ........................ वातावरणं हरीतिमायुक्तं स्वच्छं च आसीत्।

## कार्य-पत्रकम्-2

**मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत.**

**मञ्जूषा-** श्वः, यत्, ह्यः, मा, कदा, बहिः, मा, किमर्थम्, यावत्, कुतः।

(i) सः ........................ गन्तुम् इच्छति ?

(ii) अत्र ........................ लिख।

(iii) ता: ........................ क्रीडां द्रष्टुम् अगच्छन्।

(iv) सर्वे ........................ एकं लेख लेखिष्यन्ति।

(v) सा कथयति ........................ अहं गन्तुं न इच्छामि।

(vi) स: ........................ वाराणसीं गमिष्यति।

(vii) त्वम् ....................... समागतोऽसि ।

(viii) ग्रामात् ....................... एकं सुन्दरम् उद्यानम् अस्ति।

(ix) ....................... परोपकारः क्रियते ....................... शरीरस्य उपयोगः।

(x) ध्वनिं ....................... कुरु।

## <u>वाच्यम्  ( voice)</u>

**एकस्य एव भावस्य / अर्थस्य द्विप्रकारेण कथनम् वाच्यमुच्यते | कर्तृवाच्यम् , कर्मवाच्यम् च | अकर्मकधातूनां प्रयोगे कर्मवाच्यम् एव भाववाच्यम् इति उच्यते |**

| | कर्ता | कर्म | क्रिया |
|---|---|---|---|
| वाक्यानि - बालकः पाठं पठति। | बालकः | पाठं | पठति |
| बालकेन पाठः पठ्यते। | बालकेन | पाठः | पठ्यते |
| बालकेन पठ्यते। | बालकेन | -------- | पठ्यते |

यथा - बालकः पाठं पठति।

अत्र कर्तृपदम्(subject) किम् अस्ति? बालकः (प्रथमाविभक्तिः)

क्रियापदं(verb) किम् अस्ति?पठति (कर्तृपदस्य पुरुष एवं वचनानुसरं भवति)

कर्मपदं किम् अस्ति?पाठम् **(द्वितीयाविभक्तिः)**

**अतः एतत् वाक्यं कर्तृवाच्यवाक्यं भवति।( Where the subject of the sentence is in प्रथमाविभक्तिः,**

**And the verb follows by its number and the person the subject,**

**And the object is in द्वितीयाविभक्तिः) The sentence is in Active voice.**

यथा - बालकेन पाठः पठ्यते।

अत्र कर्तृपदम् किम् अस्ति?

बालकेन (तृतीयाविभक्तिः)

क्रियापदं किम् अस्ति?

पठ्यते (कर्मपदस्यपुरुष -एवं वचनानुसरं भवति)

कर्मपदं किम् अस्ति?

पाठः **(प्रथमाविभक्तिः)**

**अतः एतत् वाक्यं कर्मवाच्यवाक्यं भवति।( Where the subject of the sentence is in तृतीयाविभक्तिः,**

**And the verb follows by its number and the person the object,**

**And the object is in प्रथमाविभक्तिः) The sentence is in Passive voice.**

बालकेन पठ्यते।

अत्र कर्तृपदम् किम् अस्ति?

बालकेन (तृतीयाविभक्तिः)

क्रियापदं किम् अस्ति?

पठ्यते (एकवचने एव भविष्यति)

कर्मपदं किम् अस्ति?

अत्र कर्मपदं नास्ति।

अतः एतत् वाक्यं **भाववाच्य**वाक्यं भवति।( Where the subject of the sentence is in तृतीयाविभक्तिः,

And the verb is in third person singular,

And there is no object in the sentence. So The sentence is in **Impersonal voice**.

*************************************************************

## अकारान्त-पुल्लिङ्गशब्दः- बालक

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमाविभक्तिः-(कर्ता) | बालकः | बालकौ | बालकाः |
| द्वितीयाविभक्तिः-(कर्म) | बालकम् | बालकौ | बालकान् |
| तृतीयाविभक्तिः- | बालकेन | बालकाभ्याम् | बालकैः |

पाठः, प्रश्नः, वृक्षः, ग्रामः, देशः, मार्गः, अभ्यासः, व्यायमः, आरक्षकः, प्राचार्यः, शिक्षकः, पुत्रः, सुतः, जनकः, कार्यालयः आदि

## इकारान्त-पुल्लिङ्गशब्दः

| | | | |
|---|---|---|---|
| प्रथमाविभक्तिः- | कविः | कवी | कवयः |
| द्वितीयाविभक्तिः- | कविम् | कवी | कवीन् |
| तृतीयाविभक्तिः- | कविना | कविभ्याम् | कविभिः |

ऋषिः, मुनिः, कपिः, हरिः, गिरिः,अग्निः आदि

## उकारान्त-पुल्लिङ्गशब्दः

| | | | |
|---|---|---|---|
| प्रथमाविभक्तिः- | गुरुः | गुरू | गुरवः |
| द्वितीयाविभक्तिः- | गुरुम् | गुरू | गुरून् |
| तृतीयाविभक्तिः- | गुरुणा | गुरुभ्याम् | गुरुभिः |

भानुः, सूनुः, शिशुः, शत्रुः, रिपुः आदि

## ऋकारान्त-पुल्लिङ्गशब्दाः- पितृ

| | | | |
|---|---|---|---|
| प्रथमाविभक्तिः- | पिता | पितरौ | पितरः |
| द्वितीयाविभक्तिः- | पितरम् | पितरौ | पितॄन् |
| तृतीयाविभक्तिः- | पित्रा | पितृभ्याम् | पितृभिः |

भर्तृ, कर्तृ, वक्तृ, दातृ आदि

## आकारान्त-स्त्रीलिङ्गशब्दः

| | | | |
|---|---|---|---|
| प्रथमाविभक्तिः- | लता | लते | लताः |
| द्वितीयाविभक्तिः- | लताम् | लते | लताः |
| तृतीयाविभक्तिः- | लतया | लताभ्याम् | लताभिः |

कन्या, सुता, पाठशाला, भोजनशाला, प्रयोगशाला, शिक्षिका, आचार्या, सन्ध्या, कथा, कविता, वाटिका आदि

## ऋकारान्त-स्त्रीलिङ्गशब्दः- मातृ

| | | | |
|---|---|---|---|
| प्रथमाविभक्तिः- | माता | मातरौ | मातरः |
| द्वितीयाविभक्तिः- | मातरम् | मातरौ | मातॄः |
| तृतीयाविभक्तिः- | मात्रा | मातृभ्याम् | मातृभिः |

## अकरान्त-नपुंसकलिङ्गशब्दः- “फल”

| | | | |
|---|---|---|---|
| प्रथमाविभक्तिः- | फलम् | फले | फलानि |
| द्वितीयाविभक्तिः- | फलम् | फले | फलानि |
| तृतीयाविभक्तिः- | फलेन | फलाभ्याम् | फलैः |

चित्रम्, उत्तरम्, उपवनम्, गीतम्, गृहम्, वनम्, जलम्,

## सर्वनामश्ब्दः “अस्मद्”

| | | | |
|---|---|---|---|
| प्रथमाविभक्तिः- | अहम् | आवाम् | वयम् |
| द्वितीयाविभक्तिः- | माम् | आवाम् | अस्मान् |
| तृतीयाविभक्तिः- | मया | आवाभ्याम् | अस्माभिः |

## सर्वनामश्ब्दः “अस्मद्”

| | | | |
|---|---|---|---|
| प्रथमाविभक्तिः- | त्वम् | युवाम् | यूयम् |
| द्वितीयाविभक्तिः- | त्वाम् | युवाम् | युष्मान् |
| तृतीयाविभक्तिः- | त्वया | युवाभ्याम् | युष्माभिः |

**सर्वनामशब्दः “तद्” पुल्लिङ्गे**

| | | | |
|---|---|---|---|
| प्रथमाविभक्तिः- | सः | तौ | ते |
| द्वितीयाविभक्तिः- | तम् | तौ | तान् |
| तृतीयाविभक्तिः- | तेन | ताभ्याम् | तैः |

**सर्वनामशब्दः “तद्” स्त्रीलिङ्गे**

| | | | |
|---|---|---|---|
| प्रथमाविभक्तिः- | सा | ते | ताः |
| द्वितीयाविभक्तिः- | ताम् | ते | ताः |
| तृतीयाविभक्तिः- | तया | ताभ्याम् | ताभिः |

**सर्वनामशब्दः “तद्” नपुंसकलिङ्गे**

| | | | |
|---|---|---|---|
| प्रथमाविभक्तिः- | तत् | ते | तानि |
| द्वितीयाविभक्तिः- | तत् | ते | तानि |
| तृतीयाविभक्तिः- | तेन | ताभ्याम् | ताभिः |

**कर्मवाच्ये क्रियापदानि- (verb in Passive voice) ( केवलं लट्लकारे)**

| | |
|---|---|
| धातुः + यते = एकवचनम् | यथा = पठ् + यते = पठ्यते |
| धातुः + येते = द्विवचनम् | यथा = पठ् + येते = पठ्येते |
| धातुः + यन्ते = बहुवचनम् | यथा = पठ् + यन्ते= पठ्यन्ते |

| धातुः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| पठ् | पठ्यते | पठ्येते | पठ्यन्ते |
| लिख् | लिख्यते | लिख्येते | लिख्यन्ते |
| खाद् | खाद्यते(खाद्यते) | खाद्येते | खाद्यन्ते |
| क्रीड् | क्रीड्यते | क्रीड्येते | क्रीड्यन्ते |
| धाव् | धाव्यते | धाव्येते | धाव्यन्ते |
| हस् | हस्यते | हस्येते | हस्यन्ते |
| नम् | नम्यते | नम्येते | नम्यन्ते |
| गम् | गम्यते | गम्येते | गम्यन्ते |
| आ+गम् | आगम्यते | आगम्येते | आगम्यन्ते |
| पा(पिब्) | पीयते | पीयेते | पीयन्ते |
| नी (नय्) | नीयते | नीयेते | नीयन्ते |
| आ+नी (नय्) | आनीयते | आनीयेते | आनीयन्ते |
| भू (भव्) | भूयते | भूयेते | भूयन्ते |
| श्रु | श्रूयते | श्रूयेते | श्रूयन्ते |
| कथ् (कथय्) | कथ्यते | कथ्येते | कथ्यन्ते |
| सिञ्च् | सिञ्च्यते | सिञ्च्येते | सिञ्च्यन्ते |
| स्मृ (स्मर्) | स्मर्यते | स्मर्येते | स्मर्यन्ते |
| कृ (कर्) | क्रियते | क्रियेते | क्रियन्ते |

**<u>वाच्यस्य नियमानुगुणम् उचितं विकल्पं चिनुत</u>-**

i. --------------- पाठं पठति।

क) बालकः ख) बालकाः ग) बालकेन घ) बालकौ

ii. ----------------- पाठः पठ्यते।

क) बालिकया　　ख) बालिका　　ग) बालिके　　घ) बालिकाः

iii. कविना　कविता -------------।

क) लिख्यन्ते　　ख) लिख्येते　　ग) लिख्यते　घ) लिखति

iv. --------------- भोजनं पच्यते।

क) माता　　ख) मातरम्　　ग) मात्रा　　घ) मातरः

v. ---------------　गृहं गम्यते।

क) अहम्　　ख) मया　　ग) मम　　घ) वयम्

vi. त्वया　किं ----------------?

क) क्रियेते　　ख) क्रियन्ते　　ग) क्रियते　　घ) करोषि

vii. सा पुष्पम् -----------------।

क) आनयति　　ख) आनयसि　　ग) आनयामि　　घ) आनयन्ति

viii. सः जलं ---------------।

क) पिबामि　　ख) पिबति　　ग) पीयते　　घ) पीयन्ते

ix. ------------　जलं आनीयते।

क) तेन　　ख) सः　　ग) ते　　घ) सा

x. ---------------- गीतं गीयते।

क) तया　　ख) सा　　ग) ताः　　घ) अहम्

xi. तया ---------------------　पठ्यते।

क) गीता　　ख) गीताः　　ग) गीते　　घ) गीतौ

xii.महिलाः जलम् -------------------------।

क) आनयति ख) आनयतः ग) आनयन्ति घ) आनीयते

xiii. सः चित्रं ------------------------------------------।

क) रचयसि ख) रचयामि ग) रचयति घ) रचयन्ति

xiv. शिशुः दुग्धं --------------------------------------।

क) पिबति ख) पिबसि ग) पीयते घ) पिबामः

xv. ----------------- दुग्धं पीयते।

क) शिशुः ख) शिशुना ग) शिशुम् घ) शिशवः

xvi. छात्रैः कथा ---------------------------------------।

क) श्रूयते ख) श्रूयेते ग) श्रूयन्ते घ) शृण्वन्ति

xvii. -----------------घटना स्मर्यते।

क) ताः ख) तया ग) ताम् घ) तस्यै

xviii. तैः पादपाः -------------------------------।

क) सिञ्चन्ति ख) सिञ्च्यन्ते ग) सिञ्चति घ) सिञ्च्येते

xix. शिष्यैः -------------------------------।

क) नमन्ति ख) नम्यन्ते ग) नम्यते घ) नमामः

xx. शिष्यैः आचार्याः-------------------------------।

क) नमन्ति ख) नम्यन्ते ग) नम्यते घ) नमामः

xxi. तया ----------------------------------।

क) गीयते      ख) गायति      ग) गीयन्ते   घ) गीयेते

xxii. वानरः फलानि ------------------------।

क) खादन्ति      ख) खादति      ग) खादामि      घ) खाद्यन्ते

xxiii. वानरेण फलानि ------------------------।

क) खाद्यन्ते      ख) खादति      ग) खादन्ति      घ) खाद्यते

xxiv. छात्राः क्रीडाक्षेत्रे ----------------------------------------।

क) क्रीड्यते      ख) क्रीडन्ति      ग) क्रीडसि      घ) क्रीडति

xxv. छात्रैः क्रीडाक्षेत्रे ----------------------------------------।

क) क्रीड्यते      ख) क्रीडन्ति      ग) क्रीडसि      घ) क्रीड्यन्ते

xxvi. मालाकारेण ---------------------------- रच्यन्ते।

क) माला      ख) मालाः      ग) मालाम्      घ) माले

****************************************************************

**<u>उत्तराणि</u>**

i. क) बालकः ii. क) बालिकया iii. ग) लिख्यते iv. ग) मात्रा

v. ख) मया vi. क) क्रियेते vii. क) आनयति viii. ख) पिबति

ix. क) तेन x. क) तया xi. गीता xii. ग) आनयन्ति xiii. ग) रचयति xiv. क) पिबति xv. ख) शिशुना xvi. क) श्रूयते xvii. ख) तया

xviii. ख) सिञ्च्यन्ते xix. ग) नम्यते xx. ख) नम्यन्ते xxi. क) गीयते

xxii. ख)  खादति  xxiii. क) खाद्यन्ते  xxiv. ख) क्रीडन्ति xxv. क) क्रीड्यते xxvi. ख) मालाः

*************************************************************

**<u>संवादः</u>**

1. लता - त्वं कुत्र ----------------------------?

माला - अहम् ------------------ गच्छामि।

लता - तत्र -------------- किमर्थं गम्यते।

माला- ----------------- फलानि क्रेतुं गच्छामि।

लता - मया- अपि --------------क्रेतव्यानि, आगच्छतु चलावः॥

| |
|---|
| आपणम्, गच्छसि, फलानि, अहम्, त्वया |

2. राकेशः - त्वं किं-------------------------?

दिनेशः - मया संस्कृतं ----------------------------------।

राकेशः- -------------------पद्यपाठः गद्यपाठः वा पठ्यते?

दिनेशः- अहं पद्यपाठं-------------------------- ।

राकेशः - त्वया सस्वरं -----------------------------पठ्यते वा?

दिनेशः आम्, अहं सस्वरं पद्यपाठं पठामि।

| |
|---|
| त्वया , पद्यपाठः , पठामि, पठ्यते, करोषि |

3.

कला - माले! ---------------------- कुत्र असि?

माला - अहं पाकशालायां --------------------।

कला - किं ----------------- भोजनं पच्यते?

माला- मया तत् कर्तुं ------------------------, परन्तु इदानीं भुज्यते।

कला- किं त्वं पाककार्यम् अपि -----------------------------?

माला - तत् ----------------------- यदाकदाचित् क्रियते एव।

| |
|---|
| त्वया, शक्यते , अस्मि, त्वम्, करोषि, मया |

4. सुरेशः - त्वं स्यूते किं -----------------------?

रमेशः –------------------शाकाः, फलानि, आनीयन्ते।

सुरेशः - तव हस्ते किं अस्ति?

रमेशः - अद्यतन-समाचारं पत्रम् अस्ति।

सुरेशः - त्वया प्रतिदिनं ------------------------क्रीयते वा?

रमेशः - आम्, --------------------प्रतिदिनं प्रातः किञ्चित् दूरं चलामि।

सुरेशः- एवं चेत् त्वया गमनसमये समाचारपत्रं --------------------- ?

रमेशः - सत्यम्, गमनसमये अहं समाचारपत्रम्------------------------------- ।

| |
|---|
| समाचारपत्रं, आनीयते, क्रीणामि, मया , अहं, आनयसि, |

5.पिता - पुत्र! अत्र स्थित्वा किं त्वं ----------------------?

पुत्रः - पितः! मया एते -------------------दृश्यन्ते।

पिता - पुत्र! त्वया पादपान् दृष्ट्वा किं चिन्त्यते?

पुत्रः - कीदृशाः परोपकारिणः एते वृक्षाः इति अहं ---------------।

पिता - किं त्वं वृक्षाणां महत्त्वं जानासि?

पुत्रः - आम्, --------------------वृक्षाणां महत्त्वं सम्यक् ज्ञायते एव॥

| मया, चिन्तयामि, पादपाः, पश्यसि |
|---|

................................................................................

उत्तराणि

1. गच्छसि, आपणम्, त्वया, अहम्, फलानि
2. करोषि , पठ्यते, त्वया, पठामि, पद्यपाठः
3. त्वम्, अस्मि, त्वया, शक्यते , करोषि, मया
4. आनयसि, मया , समाचारपत्रं, अहं, आनीयते, क्रीणामि
5. पश्यसि, पादपाः, चिन्तयामि, मया,

*********************************************************

# समय लेखनम्

1. **O’ clock - बजे - पूर्णवादनम्**




एकवादनम्




चतुर्वादनम्

| **TIME** | **समय** | **संस्कृते समयलेखनम्** |
|---|---|---|
| 01:00 O ‘ clock | एक बजे | एकवादनम् |
| 02: 00 O ‘ clock | दो बजे | द्विवादनम् |
| 03:00 O ‘ clock | तीन बजे | त्रिवादनम् |
| 04:00 O ‘ clock | चार बजे | चतुर्वादनम् |
| 05: 00 O ‘ clock | पांच बजे | पञ्चवादनम् |
| 06: 00 O ‘ clock | छः बजे | षड्वादनम् |
| 07:00 O ‘ clock | सात बजे | सप्तवादनम् |
| 08:00 O ‘ clock | आठ बजे | अष्टवादनम् |
| 09: 00 O ‘ clock | नौ बजे | नववादनम् |
| 10: 00 O ‘ clock | दस बजे | दशवादनम् |

| | | |
|---|---|---|
| 11: 00 O ‘ clock | ग्यारह बजे | एकादशवादनम् |
| 12: 00 O ‘ clock | बारह बजे | द्वादशवादनम् |

## 2. [ 00 :15 ] Quarter Past **सवा** **सपाद**




सपादअष्टवादनम्




सपादएकादशवादनम्




सपादएकवादनम्

| | | |
|---|---|---|
| 01:15 O ‘ clock | सवा एक बजे | सपादैकवादनम् |
| 02: 15 O ‘ clock | सवा  दो बजे | सपादद्विवादनम् |
| 03: 15 O ‘ clock | सवा तीन बजे | सपादत्रिवादनम् |
| 04: 15 O ‘ clock | सवा चार बजे | सपादचतुर्वादनम् |
| 05: 15 O ‘ clock | सवा पांच बजे | सपादपञ्चवादनम् |
| 06: 15 O ‘ clock | सवा छः बजे | सपादषड्वादनम् |
| 07: 15 O ‘ clock | सवा सात बजे | सपादसप्तवादनम् |
| 08: 15 O ‘ clock | सवा आठ बजे | सपादाष्टवादनम् |
| 09: 15 O ‘ clock | सवा नौ बजे | सपादनववादनम् |
| 10: 15 O ‘ clock | सवा दस बजे | सपाददशवादनम् |

| | | |
|---|---|---|
| 11: 15 O ‘ clock | सवा ग्यारह बजे | सपादैकादशवादनम् |
| 12: 15 O ‘ clock | सवा बारह बजे | सपादद्वादशवादनम् |

**3. [00 : 30] Half an hour past साढे - सार्ध**




सार्धसप्तवादनम्




सार्धद्वादशवादनम्

| | | |
|---|---|---|
| 01:30 O ’ clock | साढे एक बजे | सार्धैकवादनम् |
| 02: 30 O ’ clock | साढे दो बजे | सार्धद्विवादनम् |
| 03: 30 O ’ clock | साढे तीन बजे | सार्धत्रिवादनम् |
| 04: 30 O ’ clock | साढे चार बजे | सार्धचतुर्वादनम् |
| 05: 30 O ’ clock | साढे पांच बजे | सार्धपञ्चवादनम् |
| 06: 30 O ’ clock | साढे छः बजे | सार्धषड्वादनम् |
| 07: 30 O ’ clock | साढे सात बजे | सार्धसप्तवादनम् |
| 08: 30 O ’ clock | साढे आठ बजे | सार्धाष्टवादनम् |
| 09: 30 O ’ clock | साढे नौ बजे | सार्धनववादनम् |

10: 30 O ’ clock साढे दस बजे सार्धदशवादनम्

11: 30 O ’ clock साढे ग्यारह बजे सार्धैकादशवादनम्

12: 30 O ’ clock साढे बारह बजे सार्धद्वादशवादनम्

**4. [00 : 45] पौने पादोन**



पादोनद्विवादनम्



पादोनपञ्चवादनम्



पादोनसप्तवादनम्

01:45 O ’ clock पौने दो बजे पादोनद्विवादनम्

02: 45 O ’ clock पौने तीन बजे पादोनत्रिवादनम्

03: 45 O ’ clock पौने चार बजे पादोनचतुर्वादनम्

04: 45 O ’ clock पौने पांच बजे पादोनपञ्चवादनम्

05: 45 O ’ clock पौने छः बजे पादोनषड्वादनम्

06: 45 O ’ clock पौने सात बजे पादोनसप्तवादनम्

07: 45 O ’ clock पौने आठ बजे पादोनाष्टवादनम्

08: 45 O ’ clock पौने नौ बजे पादोननववादनम्

| | | |
|---|---|---|
| 09: 45 O ’ clock | पौने दस बजे | पादोनदशवादनम् |
| 10: 45 O ’ clock | पौने ग्यारह बजे | पादोनैकादशवादनम् |
| 11: 45 O ’ clock | पौने बारह बजे | पादोनद्वादशवादनम् |
| 12: 45 O ’ clock | पौने एक बजे | पादोनैकवादनम् |

## <u>अभ्यास प्रश्न</u>

1. मन्जुषायाः समयं दृष्ट्वा रिक्तस्थानेषु शब्देषु समयं लिखत –

( क ) सः नित्यं प्रातः ...................... भ्रमणाय गच्छति . [ 05 :00 AM ]

( ख )विकासः सायं .......................विद्यालयात् आगच्छति . [ 03 : 15 PM ]

( ग ) हरीशः रात्रौ .........................स्वपिति . [ 10 : 00 PM ]

( घ ) अनिलः सायं ...................उद्याने क्रीडति . [ 04 : 45 PM ]

( ङ ) विद्यालये मुख्यातिथिः प्रातः .................आगमिष्यति . [ 09:30 AM ]

**[ उत्तराणि** ]

(क) पञ्चवादने (ख ) सपादत्रिवादने (ग ) दशवादने ( घ ) पादोनपञ्चवादने ( ङ ) सार्धनववादने

2. मन्जुषायाः समयं दृष्ट्वा रिक्तस्थानेषु अङ्केषु समयं लिखत –

( क ) सुरेन्द्रः....................वादने समाचारान् आकर्णयति . [ प्रातः सार्धाष्ट]

( ख ) देव शर्मा .................वादने उत्तिष्ठति . [ प्रातः सपादपञ्च ]

( ग ) त्वम् .....................वादने शयनाय गच्छसि .          [ रात्रौ पादोनदश ]

( घ ) गोपालदासः......................वादने देवालयं गच्छति .  [प्रातः पादोनषट् ]

( ङ ) ......................वादने अहं विद्यालयात् आगच्छामि .  [ मध्याह्ने   सपाददवि ]

**[ उत्तराणि ]**

(क) 08: 30  (ख ) 05:15  (ग ) 09:45  ( घ ) 05: 45  ( ङ ) 02 : 15

## अभ्यासकार्यम्

1. मोहन: ................ (8:00) विद्यालयं गच्छति ।

2. लता ..................... (5:00) ग्रामं गच्छति ।

3. सः....................... (9 :45) शयनं करोति।

4. मम माता रात्रौ ................... (8 :45) भोजनं पचति|

5. विवेकः ....................... (3:45) पत्रं लिखति ।

6. अनिलः सायं ..................... (5 :30) उद्याने क्रीडति।

7. उमा ............................(5:15) कार्यं करोति ।

8. देव: .....................(10:30) गीतं गायति ।

9. महेशः प्रातः.............................. (4 :15) उत्तिष्ठति।

10. मम पिता........................... (8 :15) कार्यालयं गच्छति।

**उत्तराणि -**

1. मोहन: **<u>अष्टवादने</u>** विद्यालयं गच्छति ।
2. लता **<u>पञ्चवादने</u>** ग्रामं गच्छति ।
3. सः **<u>पादोनदशवादने</u>** शयनं करोति।
4. मम माता रात्रौ **<u>पादोननववादने</u>** भोजनं पचति|
5. विवेकः **<u>पादोनचतुर्वादने</u>** पत्रं लिखति ।
6. अनिलः सायं **<u>सार्धपञ्चवादने</u>** उद्याने क्रीडति।
7. उमा **<u>सपादपञ्चवादने</u>** कार्यं करोति ।
8. देव: **<u>सार्धदशवादने</u>** पत्रं लिखति |
9. महेशः प्रातः **<u>सपादचतुर्वादने</u>** उत्तिष्ठति।
10. मम पिता **<u>सपादअष्टवादने</u>** कार्यालयं गच्छति।

# अशुद्धि-संशोधनम्

छात्रः कस्यापि वाक्ये विद्यमानं दोषयुक्तं पदं दोषरहितम् कर्तुं सक्षमः भवेत् इति अस्य प्रश्नस्य उद्देश्यम् अस्ति | अशुद्धिसंशोधने पञ्च अंशाः अवगन्तव्याः | वचन- दृष्ट्या शुद्धीकरणम् , लिङ्ग- दृष्ट्या शुद्धीकरणम् , पुरुष- दृष्ट्या शुद्धीकरणम् , लकार- दृष्ट्या शुद्धीकरणम् एवं विभक्ति- दृष्ट्या शुद्धीकरणम् |

1. ते बालिके पुस्तकानि **<u>पठन्ति</u>**। ( **वचनम्** ) उत्तरम् = पठतः
2. **<u>एकः</u>** अजा तण्डुलान् भक्षयति। ( **लिङ्गम्** ) उत्तरम् = एका

3. छात्रः **<u>विद्यालयेन</u>** गृहं आयाति। ( **विभक्तिः** ) उत्तरम् = विद्यालयात्

4. वयं पूजां कृत्वा भोजनं **<u>कुर्वन्ति</u>** ।( **पुरुषः** ) उत्तरम् = कुर्मः

5. अश्वः श्वः तीव्रं **<u>अधावत्</u>** । ( **लकारः** ) उत्तरम् = धाविष्यति

**प्रश्नः- अधोलिखित-वाक्येषु रेखाङ्कित-अशुध्दपदाय उचितं पदं चित्वा वाक्यानि पुनः लिखत-**

**1** **<u>स्थूलः</u>** नायिका मनोहरं नृत्यति। (स्थूलं, स्थूली, स्थूला)

**2** यूयं मिलित्वा नृत्यस्य अभ्यासं **<u>कुर्वन्ति</u>**। (कुरुथः, कुर्मः, कुरुथ)

**3** नद्याः तटे **<u>चत्वारि</u>** वृक्षाः सन्ति। (चत्वारः, चतस्रः, चत्वारी)

**4** मन्चोपरि **<u>त्रयः</u>** शिक्षिकाः गीतं गायन्ति। (तिस्रः, त्रीणि, त्रि)

**5** उत्पीठिकायां जलपूरितौ चषकौ **<u>सन्ति</u>**। (अस्ति, आसीत्, स्तः)

**6** श्वः सः एकामेव **<u>रोटिका</u>** खादिष्यति। (रोटिके, रोटिकाः, रोटिकां)

**7** अद्य सोमवासरः **<u>आसीत्</u>**। (अस्ति, भविष्यति, अवर्तत्)

**8** विद्यालयात् आगत्य भवान् आपणं **<u>गच्छ</u>**। (गच्छतु, गच्छसि, गमिष्यसि)

**9** त्वं भोजनाय पाकशालां **<u>याति</u>**। (यातु, यान्ति, यासि)

**10** **<u>तडागस्य</u>** परितः शिलाः सन्ति। (तडागं, तडागः, तडागेन)

**11** **<u>कृष्णः</u>** कोकिला मधुरं कूजति। (कृष्णा, कृष्णं, कृष्ण)

**12** इदानीम् आवां **<u>मित्रौ</u>** स्वः। (मित्राणि, मित्रे, मित्रम्)

**13** **<u>चत्वारि</u>** बलीवर्दाः क्षेत्रं कर्षन्ति। (चतुरः, चतस्रः, चत्वारः)

**14** भारतम् अस्माकं **<u>देशम्</u>** अस्ति। (देश, देशः, देशं)

**15** **<u>शिक्षकं</u>** नमः। (शिक्षकाय, शिक्षकेन, शिक्षकः)

**16** माता **<u>हस्तात्</u>** प्राचार्याय पत्रं लिखति। (हस्तः, हस्ताभ्यः, हस्तेन)

**17** गृहकार्यं कृत्वा राधिका **<u>जन्तुशाला</u>** गच्छति। (जन्तुशालां, जन्तुशालया, जन्तुशालायाः)

18 **शिक्षकः** दृष्ट्वा छात्राः तूष्णीम् उपविशन्ति। (शिक्षकाय, शिक्षकं, शिक्षकाः)

19 अहं मन्दिरं गत्वा **देविस्तुतिः** करोमि। (देविस्तुति, देविस्तुत्या, देविस्तुतिं)

20 वने रामः उवाच- हे **सीता**! (सीते, सीताः, सीतां)

21 अहं प्रातःकाले योगासनं **करोति**। (करोमि, करोषि, कुर्मः)

22 भवान् किमर्थं प्रयासं **करोषि**। (करोति, कुरुतः, करोमि)

23 **माम्** अध्यापिकायाः नाम शारदा अस्ति। (अहं, वयं, मम)

24 अस्माकं सर्वेषां शरीरे द्वौ हस्तौ **भवन्ति**। (भवति, भवतः, भविष्यति)

25 **एते** घटिकाः सम्यक् समयं न सूचयन्ति। (एषा, एतौ, एताः)

26 **सर्वे** नायिकाः अभिनयं कुर्वन्ति। (सर्वा, सर्वाः, सर्वः)

27 **त्वां** कुत्र प्रयास्यसि? (त्वं, तव, भवान्)

28 भवतः नाम **कः**? (का, के, किम्)

29 बालिकाः **बालकेभ्यः** सह क्रीडन्ति। (बालकं, बालकान्, बालकैः)

30 पर्यटकाः **नौकायाः** जलविहारं कुर्वन्ति। (नौका, नौकया, नौकां)

31 **भवता** स्वास्थ्यं कथम् अस्ति अधुना? (भवान्, भवतः, भवती)

32 अलं **कलहम्**। (कलहेन, कलहात्, कलहाय)

33 पुरा ग्रामे एकः परिश्रमी कृषकः **भविष्यति**। (अस्ति, भवति, आसीत्)

34 **बुद्धिः** बिना निष्फ़लं जीवनम्। (बुद्धिं, बुद्ध्या, बुद्धि)

35 मधुरा वाणी सर्वेषां **प्रियः** भवति। (प्रियं, प्रिय, प्रिया)

**उत्तराणि-**

1. स्थूला 2. कुरुथ 3. चत्वारः 4. तिस्रः 5. स्तः

6. रोटिकां 7. अस्ति 8. गच्छतु 9. यासि 10. तडागं

11. कृष्णा 12. मित्रे 13. चत्वारः 14. देशः 15. शिक्षकाय

| | | | |
|---|---|---|---|
| 16. हस्तेन | 17. जन्तुशालां | 18. शिक्षकं | 19. देविस्तुतिं |
| 20. सीते | 21. करोमि | 22. करोति | 23. मम |
| 24. भवतः | 25. एताः | 26. सर्वाः | 27. त्वं |
| 28. किम् | 29. बालकैः | 30. नौकया | 31. भवतः |
| 32. कलहेन | 33. आसीत् | 34. बुद्धिं | 35. प्रिया |

# 6.पठित - अवबोधनम्

## (खण्ड-ग) - पठितावबोधनम्

## प्रथम: पाठ:- शुचिपर्यावरणम् -

### पद्यांश:-1

दुर्वहमत्र जीवितं जातं प्रकृतिरेव शरणम् । शुचिपर्यावरणम्।।
महानगरमध्ये चलदनिशं कालायसचक्रं
मनः शोषयत् तनुः पेषयद् भ्रमति सदा वक्रम्।।
दुर्दान्तैर्दशनैरमुना स्यान्नैव जनग्रसनम्॥ शुचिपर्यावरणम् ॥

अ - एकपदेन उत्तरत -

क) किं शोषयत् ?
ख) किं दुर्वहमत्र जातं ?
ग) कुत्र चलदनिशं कालायसचक्रं भवति ?

आ- पूर्णवाक्येन उत्तरत -

क) दुर्वहमत्र जीवितं जातं का एव शरणम् ?
ख) कीदृशैः दशनैः जनग्रसनं न स्यात् ?
ग) किं पेषयद् भ्रमति सदा वक्रम् ?

इ - निर्देशानुसारम् उत्तरत -

क) शरीरं - पदस्य पर्यायः कः अत्र प्रयुक्तः ?
ख) कदाचित् - पदस्य विलोमः कः अत्र अस्ति ?
ग) भ्रमति सदा वक्रम् - अत्र किं क्रियापदमस्ति ?

### पद्यांश:- 2

कज्जलमलिनं धूमं मुञ्जति शतशकटीयानम् ।
बाष्पयानमाला संधावति वितरन्ती ध्वानम्॥
यानानां पङ्क्तयो ह्यनन्ताः कठिनं संसरणम्॥ शुचिपर्यावरणम्॥

अ - एकपदेन उत्तरत -

क) किं धूमं मुञ्चति ?

ख) बाष्पयानमाला किं वितरन्ती संधावति ?

ग) केषां पङ्क्तयो ह्यनन्ताः भवन्ति ?

आ- पूर्णवाक्येन उत्तरत -

क) कीदृशं धूमं शतशकटीयानं मुञ्चति ?

ख) कठिनं किं जातं ?

ग) का ध्वानं वितरन्ती संधावति ?

इ - निर्देशानुसारम् उत्तरत -

क) कज्जलमलिनं धूमं - अनयोः पदयोः विशेषणपदं किम् ?

ख) सुलभं - पदस्य विलोमः कः अत्र अस्ति ?

ग) वाहनानां - पदस्य समानार्थकं पदं किमत्र अस्ति ?

पद्यांश:- 3

वायुमण्डलं भृशं दूषितं न हि निर्मलं जलम्।
कुत्सितवस्तुमिश्रितं भक्ष्यं समलं धरातलम्॥
करणीयं वहिरन्तर्जगति तु बहु शुद्धीकरणम् ॥ शुचि पर्यावरणम्॥

अ - एकपदेन उत्तरत -

क) धरातलं कीदृशम् अस्ति इति कविः वदति ?

ख) बहिरन्तर्जगति किं करणीयं ?

ग) किं अधिकं दूषितं भवति ?

आ- पूर्णवाक्येन उत्तरत -

क) निर्मलं किं नास्ति इति कवेः अभिप्रायः ?

ख) कुत्र बहु शुद्धीकरणं मुख्यतया करणीयम् ?

ग) पृथ्वीतलं समलं अस्ति अथवा विमलम्   ?

इ - निर्देशानुसारम् उत्तरत -

क)    निर्मलं जलम्    - अनयोः पदयोः   विशेषणपदं किम्   ?

ख) अन्तः - पदस्य विलोमः कः अत्र अस्ति ?

ग) नीरं - पदस्य समानार्थकं पदं किमत्र अस्ति ?

पद्यांश:- 4

कञ्चित् कालं नय मामस्मान्नगरात् बहुदूरम्।
प्रपश्यामि ग्रामान्ते निर्झर नदी- पयः पूरम्॥
एकान्ते कान्तारे क्षणमपि मे स्यात् सञ्चरणम्। शुचि पर्यावरणम् ॥

अ - एकपदेन उत्तरत -

क)  कञ्चित् कालं कुत्र नय मामस्मान्नगरात् इति कविः वदति ?

ख)  ग्रामान्ते किं पश्यामि   ?

ग) कान्तारे कथं क्षणमपि   संचरणं स्यात्    ?

आ- पूर्णवाक्येन उत्तरत -

क) कं बहुदूरं अस्मात् नगरात् नेतव्यम् ?

ख) कुत्र  निर्झर नदी- पयः परम् पश्यति कविः ?

ग)  एकान्ते कुत्र  क्षणमपि स्यात् सञ्चरणम्   ?

इ - निर्देशानुसारम् उत्तरत -

क)    अस्मात् नगरात्    - अनयोः पदयोः   विशेष्यपदं किम्   ?

ख) अतिसमीपं  - पदस्य विलोमः कः अत्र अस्ति ?

ग) वने - पदस्य समानार्थकं पदं किमत्र अस्ति ?

पद्यांशः- 5

हरिततरूणां ललितलतानां माला रमणीया।
कुसुमावलिः समीरचालिता स्यान्मे वरणीया ॥
नवमालिका रसालं मिलिता रुचिरं संगमनम्। शुचिपरावरणम्

अ - एकपदेन उत्तरत -

क) केषां माला रमणीया ?

ख) का समीरचालिता वरणीया स्यात् ?

ग) नवमालिका किं मिलिता अस्ति ?

आ- पूर्णवाक्येन उत्तरत -

क) ललितलतानां माला कीदृशी अस्ति ?

ख) कीदृशी कुसुमानां आवलिः वरणीया दृश्यते ?

ग) रुचिरं संगमनं किम् ?

इ - निर्देशानुसारम् उत्तरत -

क) रुचिरं संगमनं - अनयोः पदयोः विशेष्यपदं किम् ?

ख) निन्दनीया - पदस्य विलोमः कः अत्र अस्ति ?

ग) रम्या - पदस्य समानार्थकं पदं किमत्र अस्ति

पद्यांशः- 6

अयि चल बन्धो! खगकुलकलरव-गुञ्जितवनदेशम्।
पुर-कलरव सम्भ्रमितजनेभ्यो धृतसुखसन्देशम्॥
चाकचिक्यजालं नो कुर्याज्जीवितरसहरणम् । शुचिपर्यावरणम्॥

अ - एकपदेन उत्तरत -

क) कीदृशं देशं चल इति कविः कथयति ?

ख) केभ्यः धृतसुखसंदेशं अस्ति ?

ग) किं जीवितरसहरणं न कुर्यात् ?

आ- पूर्णवाक्येन उत्तरत -

क) कीदृशेभ्यः जनेभ्यः सुखसंदेशं वदति सः ?

ख) कुत्र चल इति कविः अस्मान् कथयति ?

ग) चाकचिक्यजालं किं न कुर्यात् ?

इ - निर्देशानुसारम् उत्तरत -

क) "दु:खसन्देशम्' इत्यस्य विलोमपदम् किम् ?

ख) नगर - इति अर्थे अत्र किं पदमस्ति ?

ग) पक्षी - पदस्य समानार्थकं पदं किमत्र अस्ति ?

पद्यांश:- 7

प्रस्तरतले लतातरुगुल्मा नो भवन्तु पिष्टाः।
पाषाणी सभ्यता निसर्गे स्यान्न समाविष्टाः ॥
मानवाय जीवन कामये नो जीवन्मरणम्। शुचि पर्यावरणम्॥

अ - एकपदेन उत्तरत -

क) कुत्र लतातरुगुल्मा पिष्टाः भवन्तु ?

ख) कीदृशी सभ्यता निसर्गे स्यान्न समाविष्टाः ?

ग) कस्मै जीवन कामये नो जीवन्मरणम् ?

आ- पूर्णवाक्येन उत्तरत -

क) मानवाय किं कामये किं न ?

ख) प्रस्तरतले लतातरुगुल्मा कथं न भवन्तु ?

ग) पाषाणी सभ्यता कुत्र न समाविष्टाः स्यात् ?

इ - निर्देशानुसारम् उत्तरत -

क) जीवनं - पदस्य विपरीतार्थकाशब्दः कः ?

ख) प्रकृत्यां - इति अर्थे अत्र किं पदमस्ति ?

ग) मानवाय जीवन कामये नो जीवन्मरणम् - अत्र क्रियापदं किम् ?

******************************

## उत्तराणि

### पद्यांश:-1

अ - एकपदेन उत्तरत -

क)मन:, ख)जीवितम्, ग)महानगरमध्ये

आ- पूर्णवाक्येन उत्तरत -

क) दुर्वहमत्र जीवितं जातं प्रकृति: एव शरणम्

ख) दुर्दान्तै: दशनैः जनग्रसनं न स्यात् ।

ग) तनु: पेषयद् भ्रमति सदा वक्रम्।

इ - निर्देशानुसारम् उत्तरत -

क) तनु: ख) सदा ग) भ्रमति

### पद्यांश:- 2

अ - एकपदेन उत्तरत -

क) शतशकटीयानम् ख) ध्वानम् ग) यानानां

आ- पूर्णवाक्येन उत्तरत -

क) कज्जलमलिनं धूमं शतशकटीयानं मुञ्चति ।

ख) कठिनं संसरणम् जातम्।

ग) बाष्पयानमाला ध्वानं वितरन्ती संधावति ।

इ - निर्देशानुसारम् उत्तरत -

क) कज्जलमलिम् , ख) कठिनम् ग) यानानाम्

### पद्यांश:- 3

अ - एकपदेन उत्तरत -

क) समलम्, ख) शुद्धीकरणम् ग) वायुमण्डलम्

आ- पूर्णवाक्येन उत्तरत -

क) निर्मलं जलम् नास्ति इति कवेः अभिप्रायः।

ख) जगति बहिरन्तः बहु शुद्धीकरणं मुख्यतया करणीयम्।

ग) पृथ्वीतलं समलं अस्ति ।

इ - निर्देशानुसारम् उत्तरत -

क) निर्मलम् , ख) बहिः ग) जलम्

### पद्यांश:- 4

अ - एकपदेन उत्तरत -

क) बहुदूरम् ख) निर्झर नदी- पयः पूरम् ग) एकान्ते

आ- पूर्णवाक्येन उत्तरत -

क) मां (कविम्) बहुदूरं अस्मात् नगरात् नेतव्यम् ।

ख) ग्रामान्ते निर्झर नदी- पयः परम् पश्यति कविः ।

ग) एकान्ते कान्तारे क्षणमपि स्यात् सञ्चरणम् ।

इ - निर्देशानुसारम् उत्तरत -

क) नगरात्, ख) क्षणमपि ग) कान्तारे

### पद्यांश:- 5

अ - एकपदेन उत्तरत -

क) ललितलतानाम् ख) कुसुमावलिः ग) रसालम्

आ- पूर्णवाक्येन उत्तरत -

क) ललितलतानां माला रमणीया अस्ति ।

ख) समीरचालिता कुसुमानां आवलिः वरणीया दृश्यते ।

ग) नवमालिका रसालं मिलिता रुचिरं संगमनम् अस्ति।

इ - निर्देशानुसारम् उत्तरत -

क) संगमनम् ख) वरणीया ग) रुचिरम्

पद्यांश:- 6

अ - एकपदेन उत्तरत -

क) खगकुलकलरव-गुञ्जितवनदेशम्

ख) पुर-कलरव सम्भ्रमितजनेभ्यो

ग) चाकचिक्यजालम्

आ- पूर्णवाक्येन उत्तरत -

क) पुर-कलरव सम्भ्रमितजनेभ्यो सुखसंदेशं वदति सः।

ख) खगकुलकलरव-गुञ्जितवनदेशम् चल इति कविः अस्मान् कथयति ।

ग) चाकचिक्यजालं जीवितरसहरणम् न कुर्यात्।

इ - निर्देशानुसारम् उत्तरत -

क) सुखसन्देशम् ख) पुरम् ग) खग:

पद्यांश:- 7

अ - एकपदेन उत्तरत -

क) प्रस्तरतले ख) पाषाणी ग) मानवाय

आ- पूर्णवाक्येन उत्तरत -

क) मानवाय जीवनं कामये जीवन्मरणम् न।

ख) प्रस्तरतले लतातरुगुल्मा पिष्टाः न भवन्तु।

ग) पाषाणी सभ्यता निसर्गे न समाविष्टाः स्यात् ।

**इ - निर्देशानुसारम् उत्तरत -**

**क) मरणम् ख) निसर्गे ग) कामये**

**पाठ: - 2 , बुद्धिर्बलवती सदा - प्रश्नोत्तराणि**

**1.** अस्ति देउलाख्यो ग्राम: । तत्र राजसिंह: नाम राजपुत्र: वसति स्म । एकदा केनापि आवश्यककार्येण तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता । मार्गे गहनकानने सा एकं व्याघ्रं ददर्श । सा व्याघ्रमागच्छन्तं दृष्ट्वा धार्ष्ट्यात् पुत्रौ चपेटया प्रहृत्य जगाद – " कथमेकैकशो व्याघ्रभक्षणाय कलहं कुरुथ: ? अयमेकस्तावद्विभज्य भुज्यताम् । पश्चाद् अन्यो द्वितीय: कश्चिल्लक्ष्यते । "

**I. एकपदेन उत्तरत :-**

1. ग्रामस्य नाम किम् ? ........................
2. राजपुत्रस्य नाम किम् ? ........................
3. भार्या कीदृशी आसीत् ? ........................
4. कुत्र सा व्याघ्रं ददर्श ? ........................
5. सा मार्गे गहनकानने कं ददर्श ? ........................
6. सा कं आगच्छन्तं दृष्ट्वा धार्ष्ट्यात् पुत्रौ चपेटया प्रहरति ? ...............
7. बुद्धिमती पुत्रौ कथं प्रहरति ? ........................
8. पुत्रौ किमर्थं कलहं कुरुत: ? ........................
9. माता पुत्रौ कं विभज्य भुज्यताम् इति वदति ? ........................
10. कदा द्वितीय: व्याघ्र: लक्ष्यते ? ........................
11. व्याघ्रभक्षणाय कौ कलहं कुरुत: ? ........................
12. व्याघ्रभक्षणाय कौ कलहं कुरुत: ? ........................

**II. पूर्णवाक्येन उत्तरत :-**

1. राजपुत्रस्य भार्या कुत्र चालिता ? ..........................................

2. सा व्याघ्रमागच्छन्तं दृष्ट्वा किम् अकरोत् ? ........................
3. सा पुत्रौ चपेटया प्रहृत्य किं जगाद ? ...............
4. माता पुत्रौ प्रथमं किं कृत्वा भुज्यताम् इति वदति ? .....................

### III. निर्देशानुसारम् उत्तरत :-

1. " **सा** " इति कर्तृपदस्य क्रियापदं किमस्ति ? ......................
2. " **चलिता** " इति क्रियापदस्य कर्तृपदं किमस्ति ? ......................
3. " **पत्नी** " इति अर्थे अत्र किं पदं प्रयुक्तम् ? ...............
4. " **भार्या** " इति पदस्य विशेषणपदं किमस्ति ? ......
5. " **व्याघ्रम् आगच्छन्तम्** " अत्र विशेष्यपदं किमस्ति ? ......
6. " **आवश्यककार्येण** " इति पदस्य विशेषणपदं किमस्ति ? ......
7. " **एकं व्याघ्रम्** " अत्र विशेष्यपदं किमस्ति ? ...............
8. " **कानने** " इति पदस्य विशेषणपदं किमस्ति ? ......................
9. " **रक्षणाय** " इति पदस्य विलोमपदं किं प्रयुक्तम् ? ...............

**उत्तराणि** :- **पाठः - 2** –

**I.** देउलाख्यः , राजसिंहः , बुद्धिमती , गहनकानने , व्याघ्रं , व्याघ्रं , चपेटया , व्याघ्र- भक्षणाय , व्याघ्रं , पश्चात् , पुत्रौ ।

**II.** पितुर्गृहं । धार्ष्ट्यात् पुत्रौ चपेटया प्रहृत्य जगाद ।, " कथमेकैकशो व्याघ्रभक्षणाय कलहं कुरुथ: ? " इति । अयमेकस्तावद्विभज्य . । **III.** ददर्श , भार्या, भार्या, बुद्धिमती , व्याघ्रं , केनापि , व्याघ्रं , गहने , भक्षणाय ।

2. . इति श्रुत्वा व्याघ्रमारी काचिदियमिति मत्वा व्याघ्रो भयाकुलचित्तो नष्ट: ।

निजबुद्ध्या विमुक्ता सा भयाद् व्याघ्रस्य भामिनी ।
अन्योऽपि बुद्धिमाँल्लोके मुच्यते महतो भयात् ॥

भयाकुलं व्याघ्रं दृष्ट्वा कश्चित् धूर्त: शृगाल: हसन्नाह – " भवान् कुत: भयात् पलायित: ? " ।

**एकपदेन उत्तरत :-**

1. क: भयाकुलचित्त: पलायित: ? ……………
2. व्याघ्रमारी का अस्ति ? ……………
3. का व्याघ्रस्य भयात् विमुक्ता ? ……………
4. भामिनी कस्य भयात् विमुक्ता ? ……………………
5. भामिनी कथं व्याघ्रस्य भयात् विमुक्ता ? ……………………
6. क: महत: भयात् विमुच्यते ? ……………………
7. बुद्धिमान् कुत्र भयात् विमुच्यते ? ……………………
8. बुद्धिमान् कीदृशात् भयात् विमुच्यते ? ……………………
9. भयाकुलं व्याघ्रं दृष्ट्वा क: हसति ? ……………………
10. श्रृगाल: कीदृशं व्याघ्रं पश्यति ? ……………………

**II. पूर्णवाक्येन उत्तरत :-**

1. व्याघ्रं दृष्ट्वा श्रृगाल: हसन् किम् अवदत् ? ……………………
2. कीदृश: श्रृगाल: व्याघ्रं पश्यति ? ………………………………
3. लोके क: महत: भयात् मुच्यते ? ………………………………
4. व्याघ्र: किं मत्वा पलायित: ? ………………………………

**III. निर्देशानुसारम् उत्तरत :-**

1. “ **व्याघ्र:** ” इति कर्तृपदस्य क्रियापदं किमस्ति ? ……………
2. “ **नष्ट:** ” इति क्रियापदस्य कर्तृपदं किमस्ति ? ……………
3. “ **पलायित:** ” इति अर्थे श्लोके किं पदं प्रयुक्तम् ? ……………
4. “ **व्याघ्र:** ” इति पदस्य विशेषणपदं किमस्ति ? …………
5. “ **महत: भयात्** ” अत्र विशेष्यपदं किमस्ति ? ……………
6. “ **व्याघ्रं** ” इति पदस्य विशेषणपदं किमस्ति ? …………
7. “ **सा भामिनी** ” अत्र विशेष्यपदं किमस्ति ? …………………
8. “ **धैर्यात्** ” इति पदस्य विलोमपदं किं प्रयुक्तम् ? …………………

**उत्तराणि** :- **पाठ: -**

**1.** व्याघ्रस्य , निज-बुद्ध्या , बुद्धिमान् ,भयात् ।

**I.** व्याघ्र: , बुद्धिमती भार्या , सा भामिनी , व्याघ्रस्य , निजबुद्ध्या , बुद्धिमान् , लोके , महत: , श्रृगाल: , श्रृगाल: , भयाकुलं ।

**II.** ... “ भवान् कुत: भयात् पलायित: ” ... । कश्चिद् धूर्त: .... । .... बुद्धिमान् ... । ... व्याघ्रमारी काचिदियमिति **III.** नष्ट: , व्याघ्र: , नष्ट: , भयाकुलचित्त: , भयात् , भयाकुलं , भामिनी , भयात् ।

3. **व्याघ्र:** :- गच्छ , गच्छ जम्बुक ! त्वमपि किञ्चिद् गूढप्रदेशम् । यतो व्याघ्रमारीति या शास्त्रे श्रूयते तयाहं

हन्तुमारब्ध: परं गृहीतकरजीवितो नष्ट: शीघ्रं तदग्रत: ।

**शृगाल:** :- व्याघ्र ! त्वया महत्कौतुकम् आवेदितं यन्मानुषादपि बिभेषि ?

**व्याघ्र:** :- प्रत्यक्षमेव मया सात्मपुत्रावेकैकशो मामत्तुं कलहायमानौ चपेटया प्रहरन्ती दृष्टा ।

**जम्बुक:** :- स्वामिन्! यत्रास्ते सा धूर्ता तत्र गम्यताम् । व्याघ्र !तव पुन: तत्र गतस्य सा सम्मुखमपीक्षते यदि ,

तर्हि त्वया अहं हन्तव्य: इति ।

**व्याघ्र:** :- श्रृगाल ! यदि त्वं मां मुक्त्वा यासि तदा वेलाप्यवेला स्यात् ।

**I. एकपदेन उत्तरत :-**

1. " गच्छ गच्छ " इति क: वदति ? ……………
2. व्याघ्र: जम्बुकं कुत्र गन्तुं वदति ? ……………
3. शास्त्रे किं श्रूयते ? ……………
4. कया व्याघ्र: हन्तुमारब्ध: ? ……………
5. क: शीघ्रं तदग्रत: नष्ट: ? ……………
6. व्याघ्रेण किम् आवेदितम् ? ……………
7. क: मानुषात् बिभेति ? ………………
8. बुद्धिमती किमर्थं कलहायमानौ पुत्रौ प्रहरति ? ………………
9. " त्वया अहं हन्तव्य: " इति क: कथयति ? ……………………
10. व्याघ्रेण सा कीदृशी दृष्टा ? ……………………
11. कुत्र व्याघ्रमारीति इति श्रूयते ?

**II. पूर्णवाक्येन उत्तरत :-**

1. श्रृगाल: व्याघ्रं प्रति किं प्राह ? ……………………..…………
2. व्याघ्र: जम्बुकं प्रति किं कथयति ? ………………………………
3. व्याघ्रेण प्रत्यक्षमेव किं दृष्टम् ? …………………

**III. निर्देशानुसारम् उत्तरत :-**

1. " **त्वम्** " इति कर्तृपदस्य क्रियापदं किमस्ति ? …
2. " **गच्छ** " इति क्रियापदस्य कर्तृपदं किमस्ति ? …
3. " **खादितुम्** " इति अर्थे अत्र किं पदं प्रयुक्तम् ? …
4. " **गूढप्रदेशम्** " इति पदस्य विशेषणपदं किमस्ति ? ……
5. " **किञ्चिद् गूढप्रदेशम्** " अत्र विशेष्यपदं किमस्ति ? ……
6. " **सात्मपुत्रौ** " इति पदस्य विशेषणपदं किमस्ति ? ……
7. " **सात्मपुत्रौ कलहमानौ** " अत्र विशेष्यपदं किमस्ति ? …

8. **“ परोक्षम् ”** इति पदस्य विलोमपदं किं प्रयुक्तम् ?

......................................................................

**. I.** व्याघ्रः , गुप्तप्रदेशं , व्याघ्रमारीति, तया बुद्धिमत्या , व्याघ्रः ,महत्कौतुकम् , व्याघ्रः , मामत्तुम् , जम्बुकः , पुत्रौ प्रहरन्ती , शास्त्रे ।

**II.** ...“ व्याघ्र ! ...... बिभेषि ” इति । ...गच्छ गच्छ .....गूढप्रदेशं । ... व्याघ्रेण ... दृष्टा ।

**III.** गच्छ , त्वं , अत्तुम् , किञ्चित् , गूढप्रदेशम् , कलहायमानौ , सात्मपुत्रौ , प्रत्यक्षम् ।

4. **4.जम्बुक**: :- यदि एवं तर्हि मां निजगले बद्ध्वा चल सत्वरम् । स व्याघ्रः तथाकृत्वा काननं ययौ ।

श्रृगालेन सहितं पुनरायान्तं व्याघ्रं दूरात् दृष्ट्वा बुद्धिमती चिन्तितवती–जम्बुककृतोत्साहाद्

व्याघ्रात् कथं मुच्यताम् ? परं प्रत्युत्पन्नमतिः सा जम्बुकमाक्षिपन्त्यङ्ल्या तर्जयन्त्युवाच –

रे रे धूर्त ! त्वया दत्तं मह्यं व्याघ्रत्रयं पुरा ।
विश्वास्याद्यैकमानीय कथं यासि वदाधुना ॥
इत्युक्त्वा धाविता तूर्णं व्याघ्रमारी भयङ्करा ।
व्याघ्रोऽपि सहसा नष्टः गलबद्ध श्रृगालकः ॥

एवं प्रकारेण बुद्धिमती व्याघ्रजाद् भयात् पुनरपि मुक्ताऽभवत् | अत एव उच्यते –

“ बुद्धिर्बलवती तन्वि सर्वकार्येषु सर्वदा ॥ ”

**I. एकपदेन उत्तरत :-**

1. जम्बुकः कं “ मां निजगले बद्ध्वा चल ” इति वदति ? ...
2. कः काननं ययौ ? ......................
3. व्याघ्रः केन सह पुनः आगच्छति ? ...............
4. पुनरायान्तं व्याघ्रं दूरात् दृष्ट्वा का चिन्तितवती ? ......
5. “ जम्बुककृतोत्साहाद् व्याघ्रात् कथं मुच्यताम् ?” इति का चिन्तयति ?

6. कः जम्बुककृतोत्साहाद् पुनः आगच्छति ? ……………

7. सा जम्बुकं कथं / कया तर्जयति ? ……………

8. सा " रे रे धूर्त ! " इति कं सम्बोधयति ? ……………

9. पुरा जम्बुकेन तस्यै किं दत्तम् ? ……………

10 अद्य जम्बुकः कति आनीय पुनः गन्तुम् इच्छति ? ……………………

11 का धाविता ? ………………………

**12** कः नष्टः ? ……………………

13 कीदृशः व्याघ्रः सहसा नष्टः ? .……………

### II. पूर्णवाक्येन उत्तरत :-

1. जम्बुकः व्याघ्रं किं वदति ? ………………………

2 सा बुद्धिमती किं चिन्तितवती ? ………………………

3 सा जम्बुकं कथं उवाच ? ………………………

4 बुद्धिमती कस्मात् पुनरपि मुक्ताऽभवत् ? ………………………

5 सा जम्बुकं किम् उक्त्वा धाविता ? ………………………

### III. निर्देशानुसारम् उत्तरत :-

1" **व्याघ्रः** " इति कर्तृपदस्य क्रियापदं किमस्ति ?

**2** " **ययौ** " इति क्रियापदस्य कर्तृपदं किमस्ति ?

**3** " **शीघ्रम्** " इति अर्थे अत्र किं पदं प्रयुक्तम् ?

**4** " **सा अङ्गुल्या तर्जयन्ती** " अत्र विशेषणपदं किमस्ति ?

**5** " **व्याघ्रमारी** " इति पदस्य विशेषणपदं किमस्ति ?

**6**" **व्याघ्रजाद् भयात्** " अत्र विशेष्यपदं किमस्ति ?

**7**" **अधुना** " इति पदस्य विलोमपदं किं प्रयुक्तम् ?

**8** " **पलायितः** " इति अर्थे अत्र किं पदं प्रयुक्तम्

**9** " **यासि** " इति क्रियापदस्य कर्तृपदं किम् ?

**उत्तराणि :- पाठः -**

**I.** व्याघ्रम् , व्याघ्रः , श्रृगालेन , बुद्धिमती , बुद्धिमती भार्या , व्याघ्रः , अङ्गुल्या , जम्बुकम् , व्याघ्रत्रयम् , एकम् , व्याघ्रमारी , व्याघ्रः , गलबद्धश्रृगालकः ।

**II.** " यदि एवं ..... सत्वरम् " इति । …. " जम्बुककृतोत्साहाद् ...... मुच्यताम् " इति । सा जम्बुकमाक्षिपन्त्यंगुल्या तर्जयन्त्युवाच । ... व्याघ्रजात् भयात् ... । " रे रे धूर्त ! ......... वादाधुना " इति ... ।

**III.** ययौ , व्याघ्रः , सत्वरम् / तूर्णम् , तर्जयन्ती , भयङ्करा , भयात् , पुरा , नष्टः , त्वम् ।

# चतुर्थः पाठः- शिशुलालनम्

(1) प्रथमकार्यपत्रम्

Q.NO.14) १.निम्नलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरत-

(सिंहासनस्थः रामः। ततः प्रविशतः विदूषकेनोपदिश्यमानमार्गौ तापसौ कुशलवौ)

विदूषकः- इत इत आर्यौ!

कुशलवौ- (रामम् उपसृत्य प्रणम्य च) अपि कुशलं महाराजस्य?

रामः - युष्मद्दर्शनात् कुशलमिव। भवतोः किं वयमत्र कुशलप्रश्नस्य भाजनम् एव, न पुनरतिथिजनसमुचितस्य कण्ठाश्लेषस्य। (परिष्वज्य) अहो हृदयग्राही स्पर्शः।

(आसनार्धमुपवेशयति)

एकपदेन उत्तरत-

१. कः सिंहासनस्थः अस्ति?

२. कौ प्रविशतः?

३. तापसौ कौ स्तः?

४. केन उपदिश्यमानमार्गौ प्रविशतः?

५. विदूषकः लवकुशौ कथं सम्बोधयति?

६. लवकुशौ कं प्रणमतः?

७. कौ रामं प्रणमतः?

८. लवकुशलौ कस्य कुशलं पृच्छन्ति?

९. कः हृदयग्राही अस्ति?

१०. रामस्य कृते कयोः  स्पर्शः हृदयग्राही अस्ति?

११. रामः कौ परिष्वजति?

१२. रामः कौ आसनार्धम् उपवेशयति?

१३. क: लवकुशौ आसनार्धम् उपवेशयति?

१४. रामः लवकुशौ कस्य अर्धम् उपवेशयति?

१५. स्पर्शः कीदृशः अस्ति?

पूर्णवाक्येन उत्तरत-

१. विदूषकः कौ “इतः इतः आर्यौ” इति  वदति?

२. “अपि कुशलं महारजस्य” इति कौ पृच्छतः?

यथानिर्देशम् उत्तरत-

१. “ततः प्रविशतः विदूषकेनोपदिश्यमानमार्गौ तापसौ कुशलवौ”- अत्र क्रियापदं किमस्ति?

२.”अनन्तरम् / पश्चात्” -इत्यर्थे अत्र किं पदं प्रयुक्तम्?

३. “विदूषकेनोपदिश्यमानमार्गौ”- अस्य विशेष्यपदं किमस्ति?

४. “नत्वा” इत्यर्थे अत्र किं पदं प्रयुक्तम्? ( उपसृत्य / प्रणम्य / ततः )

५. “भवतोः”इति पदं कस्मै(काभ्याम्) प्रयुक्तम्? (कुशलवाभ्याम्/विदूषकाय/रामाय)

६. “त्यागी” इत्यस्य कः विलोमः अत्र प्रयुक्तः? ( अपि / भवतोः / ग्राही)

७. “पात्रम्” - इत्यस्य समानार्थकपदं किम्? ( कुशलम् / भाजनम् / रामम्)

८. “समीपं गत्वा” इत्यर्थे अत्र किं पदं प्रयुक्तम्? (प्रणम्य/उपसृत्य/परिष्वज्य)

९. “आसनार्धमुपवेशयति” - अत्र क्रियापदं किम्?(अर्धम्/आसनार्धम्/उपवेशयति)

१०.”हृदयग्राही स्पर्शः” - अनयोः विशेषणपदं किमस्ति? ( स्पर्शः / हृदयग्राही)

## (2) द्वितीयकार्यपत्रम्

२. <u>निम्नलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरत-</u>

उभौ- राजासनं खल्वेतत्, न युक्तमध्यासितुम्।

रामः- सव्यवधानं न चारित्रलोपाय। तस्मादङ्क-व्यवहितमध्यास्यतां सिंहासनम्।
(अङ्कमुपवेशयति)

उभौ- (अनिच्छां नाटयतः) राजन्!
अलमतिदाक्षिण्येन।

रामः- अलमतिशालीनतया

भवति शिशुजनो वयोऽनुरोधात् गुणमहतामपि लालनीय एव।
व्रजति हिमकरोऽपि बालभावात् पशुपति-मस्तक-केतकच्छदत्वम्॥

एकपदेन उत्तरत-

१. कुत्र अध्यासितुं न युक्तम्?

२. कथम् उपवेशनं चारित्रलोपाय न भवति?

३. केन व्यवहितं सिंहासनम् अध्यास्यताम्?

४. रामः कुशलवौ कुत्र उपवेशयति?

५. कौ अनिच्छां नाटयतः?

६. कुशलवौ कां नाटयतः?

७. कुशलवौ किमर्थम् अनिच्छां नाटयतः?

८. कः लालनीयः एव?

९. कस्य अनुरोधात् शिशुजनः लालनीयः?

१०. केषां कृते वयोऽनुरोधात् शिशुजनः लालनीयः?

११. कः केतकच्छदत्वं व्रजति?

१२. हिमकरः अपि कस्मात् कारणात् केतकच्छदत्वं व्रजति?

१३. पशुपतिः कः अस्ति?

१४. पशुपति-मस्तक-केतकछ्छदत्वम् कः व्रजति?

१५. राजा कः अस्ति?

पूर्णवाक्येन उत्तरत-

१. रामः लवकुशौ कथं सिंहासनं अध्यासितुं वदति?

२. कुशलवयोः कुत्र अध्यासितुं युक्तं न भवति?

३. “अलमतिदाक्षिण्येन” इति कौ कं वदतः?

४. “अलमतिशालीनतया” इति कः कौ वदति?

यथानिर्देशम् उत्तरत-

१. “उचितम्”-इत्यर्थे अत्र किं पदं प्रयुक्तम् ? ( युक्तम् / अलम् / सव्यवधानम्)

२. “तस्मादङ्क-व्यवहितमध्यास्यतां सिंहासनम्”-क्रियापदं किम्

( तस्मात् / अध्यास्यताम् / सिंहासनम्)

३. “इच्छाम्”- इत्यस्य कः विपर्ययः अत्र अस्ति? ( अनिच्छाम् / अलम् / भवति)

४. “अङ्कमुपवेशयति” - क्रियापदमत्र किमस्ति? ( उपवेशयति / अङ्कम्)

५. “प्राप्नोति”-इत्यर्थे अत्र किं पदं प्रयुक्तम्? ( उपवेशयति/व्रजति/भवति)

६. “चन्द्रः”-इत्यस्य समानार्थकपदं किम्? ( पशुपतिः / शिशुजनः / हिमकरः)

७. “शिर”-इत्यस्य कः पर्यायः अत्र  प्रयुक्तः? ( मस्तकं / बालभाव: / अङ्क:)

## (3) तृतीयकार्यपत्रम्

३. निम्नलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरत-

रामः- एष भवतोः सौन्दर्यावलोकजनितेन कौतूहलेन पृच्छामि- क्षत्रियकुल-
पितामहयोः
सूर्यचन्द्रयोः को वा भवतोर्वंशस्य कर्ता ?

लवः- भगवन् सहस्रदीधितिः ।

रामः- कथमस्मत्समानाभिजनौ संवृत्तौ ?

विदूषकः- किं द्वयोरप्येकमेव प्रतिवचनम्?

लवः - भ्रातरावावां सोदर्यौ ।

रामः- समरुपः शरीरसन्निवेशः। वयसस्तु न किञ्चिदन्तरम्।

लवः- आवां यमलौ।

रामः- सम्प्रति युज्यते । किं नामधेयम्?

लवः- आर्य़स्य वन्दनायां लव इत्यात्मानं श्रावयामि ( कुशं निर्दिश्य ) आर्योऽपि गुरुचरणवन्दनायाम्............।

कुशः- अहमपि कुश इत्यात्मानं श्रावयामि ।

रामः- अहो! उदात्तरम्यः समुदाचार:।
किं नामधेयो भवत्तोर्गुरुः?

लवः- ननु भगवान् वाल्मीकि:।

रामः- केन सम्बन्धेन?

लवः - उपनयनोपदेशेन ।

एकपदेन उत्तरत-

१. रामः केन लवकुशौ पृच्छति?

२. रामः कीदृशेन कौतूहलेन लवकुशौ पृच्छति?

३. रामः कयोः सौन्दर्यावलोकजनितेन कौतूहलेन लवकुशौ पृच्छति?

४. सहस्रदीधितिः कः अस्ति?

५. लवकुशयोः वंशस्य कर्ता कः?

६. रामस्य वंशस्य कर्ता कः?

७. कौ समानाभिजनौ स्तः?

८. कुशलवौ कस्य समानाभिजनौ स्तः?

९. कौ सोदर्यौ भवतः?

१०. कयोः वयसः किञ्चित् अन्तरं नास्ति?

११. कौ यमलौ स्तः?

१२. कुशलवयोः समुदाचारः कीदृशः अस्ति?

१३. लवकुशयोः गुरोः नामधेयम् किमस्ति?

१४. कयोः गुरोः नामधेयं भगवान् वाल्मीकिः?

१५. भगवान् वाल्मीकिः केन सम्बन्धेन कुशलवयोः गुरुः भवति?

१६. कस्य सन्निवेशः समरूपः?

१७. भगवान् वाल्मीकिः कस्य उपदेशेन कुशलवयोः गुरुः भवति?

पूर्णवाक्येन उत्तरत-

१. रामः कौतूहलेन लवकुशौ किं पृच्छति?

२. लवः आर्यस्य वन्दनायां आत्मानं किम् इति श्रावयति?

३. कुशः कदा आत्मानं “कुशः” इति आत्मानं श्रावयति?

यथानिर्देशम् उत्तरत-

१. "भवतोः" इति काभ्याम् प्रयुक्तम्?

( कुशलवाभ्याम् / रामलक्ष्मणाभ्याम्/रामविदूषकाभ्याम्)

२. "दर्शन" इत्यर्थे अत्र किं पदं प्रयुक्तम्? ( अवलोक / कौतूहल / नामधेयः)

३. "रवि" इत्यर्थे अत्र किं पदं प्रयुक्तम्? ( चन्द्र / सूर्य / कुल )

४. "हिमकर" इत्यर्थे अत्र किं पदं प्रयुक्तम्? ( चन्द्र / सूर्य / वंश )

५. "वंश" इत्यर्थे अत्र किं पदं प्रयुक्तम्? ( कुल / कर्त्ता / सोदर्यौ)

६. "उत्तरम्"- इत्यर्थे अत्र किं पदं प्रयुक्तम्?(प्रतिवचनम् / अन्तरम् /आत्मानम्)

७. "अधुना" -इत्यर्थे अत्र किं पदं प्रयुक्तम्? ( सम्प्रति / संवृत्तौ / इति )

८. "उदात्तरम्यः समुदाचारः" अनयोः विशेषणपदं किम्? ( उदात्तरम्यः/समुदाचारः)

(4) चतुर्थकार्यपत्रम्

४. <u>निम्नलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरत-</u>

रामः -अहमत्रभवतोः जनकं नामतः वेदितुमिच्छामि।

लवः- नहि जानाम्यस्य नामधेयम्। न कश्चिदस्मिन् तपोवने तस्य नाम व्यवहरति।

रामः- अहो माहात्म्यम्।

कुशः - जानाम्यहं तस्य नामधेयम्।

रामः - कथ्यताम्।

कुशः - निरनुक्रोशः नाम-----

रामः- वयस्य, अपूर्वं खलु नामधेयम्।

विदूषकः- (विचिन्त्य) एवं तावत् पृच्छामि। निरनुक्रोश इति क: एवं भणति?

कुशः - अम्बा।

विदूषकः- किं कुपिता एवं भणति, उत प्रकृतिस्था?

कुशः- यद्यावयोर्बालभावजनितं किञ्चिदविनयं पश्यति तदा एवम् अधिक्षिपति- निरनुक्रोशस्य पुत्रौ, मा चापलम् इति।

विदूषकः- एतयोर्यदि पितुर्निरनुक्रोश इति नामधेयम् एतयोर्जननी तेनावमानिता निर्वासिता

एतेन वचनेन दारकौ निर्भर्त्सयति।

रामः- (स्वगतम्) धिङ् मामेवम्भूतम्। सा तपस्विनी मत्कृतेनापराधेन स्वापत्यमेवं मन्युगर्भैरक्षरैर्निर्भर्त्सयति॥

एकपदेन उत्तरत-

१. रामः कं वेदितुम् इच्छति?

२. रामः कयोः जनकं वेदितुम् इच्छति?

३. रामः कुशलवयोः जनकं कथं वेदितुम् इच्छति?

४. कः जनकस्य नामधेयं न जानाति?

५. कुत्र लवस्य जनकस्य नामधेयं कश्चित् न व्यवहरति?

६. कः कुशलवयोः  जनकस्य नामधेयम् जानाति?

७. कः रामस्य वयस्यः अस्ति?

८. कः बालभावजनितः अस्ति?

९. का कुशलवौ अधिक्षिपति?

१०. माता (सीता) निरनुक्रोशस्य पुत्रौ इति कौ वदति?

११. रामः विदूषकं कथं सम्बोधयति?

पूर्णवाक्येन उत्तरत-

१. माता कुशलवौ कदा अधिक्षपति?

२. माता सीता कुशलवौ कथम् अधिक्षिपति?

३. निरनुक्रोशस्य पुत्रौ इति केन कारणेन (किमर्थम्) निर्भर्त्सयति?

४. "धिङ् मामेवम्भूतम्" इति कः वदति?

५. "किं कुपिता एवं भणति" इति कः कं पृच्छति?

यथानिर्देशम् उत्तरत-

१. “अहं अत्र भवतोः” - अत्र “भवतोः” पदम् कस्मै प्रयुक्तम्?
( कुशलवाभ्याम् / रामविदूषकाभ्याम्)

२. “पितरम्” इत्यर्थे अत्र किं पदं प्रयुक्तम्? ( जनकम् / जननीम्)

३. “न कश्चिदस्मिन् तपोवने तस्य नाम व्यवहरति” - अत्र क्रियापदं किम्?
( तपोवने / व्यवहरति / नाम )

४. “जानाम्यहं तस्य नामधेयम्” - “जानामि” इत्यस्य कर्तृपदं किम्?
( तस्य / नामधेयम् / अहम्)

५. “चिन्तयित्वा”- इत्यर्थे किं पदं प्रयुक्तम्? ( विचिन्त्य / स्वगतम् / वेदितुम्)

६. “ज्ञातुम्” - इत्यर्थे अत्र किं पदम् प्रयुक्तम्? ( एवम् / अपूर्वम् / वेदितुम्)

७. “इत्थम्” - इत्यस्य कः पर्यायः अत्र प्रयुक्तः? ( मा / एवम् / खलु )

८. “मित्र” - इत्यस्य समानार्थकं पदं किम्? ( वयस्य / इति / विचिन्त्य )

९. “ईदृशम्” - इत्यस्य समानार्थकं पदं किम्? ( एवं भूतम् / इत्थम् / एवम् )

१०. “पुत्रौ” - इत्यस्य समानार्थकपदं किम् अत्र प्रयुक्तम्?(दारकौ / पुत्रौ / सोदर्यौ)

११. “प्रकाशम्” - इत्यस्य कः विपर्ययः अत्र प्रयुक्तः? ( स्वगतम् /आत्मगतम् )

१२. “अक्षरैः” इत्यस्य विशेषणपदं किम्? ( मन्युगर्भैः/एवम्/स्वपत्यम्)

१३.“यद्यावयोर्बालभावजनितं किञ्चिदविनयं”-“अविनयम्” इत्यस्य विशेषणपदं किम्?
( आवयोः / किञ्चित् / अविनयम्)

१४. “अथवा” - इत्यर्थे किं पदं प्रयुक्तम्? ( वा / उत / अन्यथा)

१५. “सा तपस्विनी --------- मन्युगर्भैरक्षरैनिर्भर्त्सयति” अत्र कर्तृपदं किम्?
( सा / तपस्विनी / मन्युगर्भैः )

(5) पञ्चमकार्यपत्रम्

५. <u>निम्नलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरत-</u>

(सबाष्पमवलोकयति)

रामः- अतिदीर्घः प्रवासोऽयं दारुणश्च। (विदूषकमवलोक्य जनान्तिकम्)
कुतूहलेनाविष्टो मातरमनयोर्नामतो वेदितुमिच्छामि। न युक्तं च स्त्रीगतमनुयोक्तुम्,
विशेषतस्तपोवने। तत् कोऽत्राभ्युपायः?

विदूषकः- (जनान्तिकम्) अहं पुनः पृच्छामि। (प्रकाशम्) किं नामधेया युवयोर्जननी?

लवः - तस्याः द्वे नामनी।

विदूषकः- कथमिव?

लवः - तपोवनवासिनो देवीति नाम्नाह्वयन्ति, भगवान् वाल्मीकिर्वधूरिति।

रामः- अपि च इतस्तावद् वयस्य! मुहूर्तमात्रम्।

विदूषकः - (उपसृत्य) आज्ञापयतु भवान्।

रामः- अपि कुमारयोरनयोरस्माकं च सर्वथा समरूपः कुटुम्बवृत्तान्तः?

एकपदेन उत्तरत-

१. कः सबाष्पम् अवलोकयति?
२. रामः कथम् अवलोकयति?
३. कः अतिदीर्घः?
४. प्रवासः कीदृशः ?
५. रामः कम् अवलोकयति?
६. रामः केन आविष्टः अस्ति?
७. रामः कां नामतः वेदितुम् इच्छति?
८. कः पुनः कुशलवौ पृच्छति?
९. तपोवनवासिनः सीतां कथं आह्वयन्ति?
१०. भगवान् वाल्मीकिः सीताः कथम् आह्वयति?
११. कस्याः द्वे नामनी स्तः ?
१२. मुहूर्तमात्रम् इति कः वदति?
१३. कः समरूपः अस्ति?

१४. “आज्ञापयतु भवान्” इति कः वदति?
१५. वधूरिति कः सीताम् आह्वयति?

पूर्णवाक्येन उत्तरत-
१. विदूषक: जनान्तिकं किं वदति?
२. कुमारयोः रामस्य च कीदृशः कुटुम्बवृत्तान्तः अस्ति?
३. जनाः सीतां कुत्र कथं च आह्वयन्ति?

यथानिर्देशम् उत्तरत-
१. “पश्यति”-इत्यस्य कः पर्यायः अत्र प्रयुक्तः?(अवलोकयति/आह्वयति/इच्छति)
२. “अतिदीर्घः प्रवासोऽयः दारुणश्च” - विशेष्यपदम् अत्र किम्?
(अतिदीर्घः / दारुणः / प्रवासः)
३. “दृष्ट्वा” इत्यर्थे किं पदं प्रयुक्तम्? ( उपसृत्य / अवलोक्य / सर्वथा)
४. “उचितम्” - इत्यर्थे अत्र किं पदं प्रयुक्तम्? ( युक्तम् / वेदितुम् / पुनः)
५. “समीपम्”- इत्यस्य समानार्थकपदं किम् अत्र प्रयुक्तम्? ( अन्तिकम् / न )
६. “अपसृत्य” इत्यस्य कः विपर्ययः अत्र प्रयुक्तः? (विलोक्य/उपसृत्य/आलोक्य)
७. “आज्ञापयतु भवान्” - अत्र “भवान्” पदं कस्मै प्रयुक्तम्?
(रामाय / विदूषकाय / कुशाय / लवाय)
८. “समरूपः” कस्य पदस्य विशेषणम्? ( रामस्य / कुशस्य / कुटुम्बवृत्तान्तस्य)

(6) षष्ठकार्यपत्रम्

६. <u>निम्नलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरत-</u>

(नेपथ्ये)

(इयती वेला सञ्जाता रामायणगानस्य नियोगः किमर्थं न विधीयते?)
उभौ- राजन्! उपाध्यायदूतोऽस्मान् त्वरयति।
रामः- मयापि सम्माननीय एव मुनिनियोगः। तथाहि-
भवन्तौ गायन्तौ कविरपि पुराणो व्रतनिधिः

गिरां सन्दर्भोऽयं प्रथममवतीर्णो वसुमतीम्।
कथा चेयं श्लाघ्या सरसिरुहनाभस्य नियतं
पुनाति श्रोतारं रमयति च सोऽयं परिकरः॥

वयस्य! अपूर्वोऽयं मानवानां सरस्वत्यवतारः, तदहं सुहृज्जनसाधारणं श्रोतुमिच्छामि। सन्निधीयन्तां सभासदः, प्रेष्यतामस्मदन्तिकं सौमित्रिः, अहमप्येतयोश्चिरासनपरिखेदं विहरणं कृत्वा अपनयामि॥

एकपदेन उत्तरत-

१. का सञ्जाता?
२. कः न विधीयते?
३. कस्य नियोगः न विधीयते?
४. कः कुशलवौ त्वरयति?
५. कस्य दूतः कुशलवौ त्वरयति?
६. कः सम्माननीयः?
७. कस्य नियोगः सम्माननीयः?
८. केन मुनेः नियोगः सम्माननीयः?
९. कौ गायन्तौ स्तः?
१०. कः पुराणव्रतनिधिः अस्ति?
११. कः प्रथमम् अवतीर्णः?
१२. गिरां सन्दर्भः प्रथमं कुत्र अवतीर्णः?
१३. का च श्लाघ्या?
१४. कस्य कथा श्लाघ्या?
१५. कः रमयति?
१६. परिकरः कं रमयति?
१७. कः पवित्रं करोति?
१८. परिकरः कं पवित्रं करोति?
१९. कः अपूर्वः भवति?

२०. कस्याः अवतारः अपूर्वः भवति?

२१. केषां सरस्वत्याः अवतारः अपूर्वः भवति?

२२. सौमित्रिः कः अस्ति?

२३. रामः किं अपनयति?

२४. रामः किं कृत्वा परिखेदम्  अपनयति?

पूर्णवाक्येन उत्तरत-

१. नेपथ्ये किं श्रूयते?

२. रामः विदूषकं किं वदति?

३. परिकरः श्रोतारं किं किं च करोति?

निर्देशानुसारम् उत्तरत-

१. कविरपि पुराणो व्रतनिधिः" - अत्र कविः इत्यस्य विशेषणपदं किमस्ति?

( व्रतनिधिः / पुराणः / अपि)

२. "सन्दर्भोऽयं प्रथममवतीर्णः" - अत्र विशेष्यपदं किमस्ति?

( प्रथममवतीर्णः / अयम् / सन्दर्भः)

३. "कथा श्लाघ्या" - अनयोः विषेषणपदं किम्?

४. "पुनाति श्रोतारं रमयति च सोऽयं परिकरः" - अत्र "परिकरः" इति कर्तृपदस्य क्रियापदं किमस्ति? ( पुनाति / च / श्रोतारम्)

५. "अपूर्वोऽयं मानवानां सरस्वत्यवतारः" - अत्र "अपूर्वः" इति विशेषणस्य विशेष्यं किम्?

( अयम् / मानवानाम् / सरस्वत्यवतारः)

६."तदहं श्रोतुमिच्छामि"- अत्र"इच्छामि" इति क्रियायाः कर्ता कः?

( तत् / जनसाधारणम् /अहम्)

७. "समीपम्" -इत्यस्य समानार्थकं पदंकिम्? ( अन्तिकम् / कृत्वा / श्रोतुम् )

ई. यथानिर्देशम् उत्तरत (केवलं प्रश्नद्वयम्)      1 X 3 = 3

(i) **' खिद्यते '** इत्यस्याः क्रियाया: कर्तृपदं किम् ?

क) सन्तोषः ख) मानव :     ग) मधुमेह: घ) व्याधिः

(ii) **'मानव :'** अस्य पदस्य विशेषणपदं किं प्रयुक्तम् ?

अ) पीडितः   ख) अनेके   ग) नरः   घ) सः

(iii) **" देहस्य '** इत्यस्य पदस्य कः पर्यायः अत्र प्रयुक्तः?

क) मानवस्य   ख) दुःखस्य   ग) शरीरस्य   घ) हस्तस्य

(iv) अनुच्छेदे **' अन्तिमम् '** पदस्य कः विपर्ययः आगत :?

क) अलम्   ख) आद्यम्   ग) इदम्   घ) इमम्

"ख" खण्डः

रचनात्मकं कार्यम् (15 अङ्काः)

2. भवतः नाम गोविन्दः । भवान् एकः विज्ञान-विद्यार्थी वर्तते । भवता विज्ञानस्य नूतनप्रकाशितानि पुस्तकानि प्रेषयितुं रचना सागर (प्रा०) लि० प्रकाशकं प्रति लिखिते पत्रे रिक्तस्थानानि मञ्जूषायाः सहायतया पूरयित्वा पत्रं पुनः लिखतु- ½ x10=5

महर्षिः दयानन्दः आर्यः विद्यालयः

सेवायाम्,

1).........................

2)..........................

नवदिल्ली

विषयः- विज्ञानस्य नूतनप्रकाशितानि (3)..........................प्रेषयितुं पत्रम्।

महोदय,

सादरं निवेदनम् अस्ति यत् अहं महर्षि-दयानन्द-आर्य-विद्यालये एकः (4)....................अस्मि । मम विज्ञानाध्यापकः ह्यः एव भवद्भिः(5) .......................... विज्ञानपुस्तकानि अपश्यत्, सः तेषां पुस्तकानाम् अतीव प्रशंसां कृतवान्। अहमपि तानि (6).................... पठितुम् इच्छामि । अतः भवतां सेवायां (7).......................अस्ति यत् मम इदं पत्रं प्राप्य शीघ्रमेव तानि पुस्तकानि वी.पी.पी. द्वारा (8)......................| अहं पुस्तकानि प्राप्य सद्यः एव मूल्यं प्रेषयिष्यामि । भवताम् अतीव (9)................. भविष्यति ।

भवतां शुभेच्छुकः (10).......................

मञ्जूषा

| |
|---|
| निवेदनं , रचना सागर (प्रा०) लि०, प्रकाशितानि, पुस्तकानि, कृपा, पुस्तकानि, देवेन्द्रः, छात्रः, प्रेषणीयानि , श्रीमान्प्रकाशकमहोदय ! |

3\. 3. प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि **पञ्च वाक्यानि लिखत-** (1x5=5)



मञ्जूषा

| |
|---|
| **छात्राः, वनस्य, महिला, रोपयन्ति, पर्वताः, पादपान्, आकाशे, सिञ्चति, मेघाः, दृश्यन्ते, पर्वताः, शिरसि, आनयति,** |

अथवा

मञ्जूषाप्रदत्तशब्दानांसाहाय्येन निम्नलिखितं विषयम् अहिकृत्य न्यूनातिन्यूनं पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत- 1 x 5 = 5

**"साक्षरतायाः लाभाः"**

मञ्जूषा

| |
|---|
| अक्षरज्ञानम्, जनानाम्, स्वहस्ताक्षरम्, आवेदनपत्रम्, नियुक्तिपत्रं , राशिपत्रम्, पठितुं शक्यते, कोऽपि, वञ्चितुं, समर्थः, सर्वकारसमर्थितं जनान्दोलनं वर्तते, ज्ञानपूर्णग्रन्थानां पठने, चरित्रशिक्षणे , आदर्शशिक्षाग्रहणे, |

**4. अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत**

**(केवलं वाक्यपञ्चकम्)** 1x5=5

1. क्या मैं अन्दर आऊं?
   May I come in?
2. हम सब संस्कृत पढ़ते हैं ।
   All of **us** study Sanskrit.
3. माता खाना पकाती है ।
   Mother cooks food.
4. बच्चा कुत्ते से डरता है।
   The child is scared of dogs.
5. तुम सब कलम से लिखो ।
   All of you write with pen.
6. कल विद्यालय का अवकाश रहेगा ।
   Tomorrow the school remains Closed.
7. कल तुम कहाँ थे ?
   Where were you yesterday?

## "ग" खण्डः

## अनुप्रयुक्तव्याकरणम् ( 25 अङ्काः)

5. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिविच्छेदं वा कुरुत –

( केवलं प्रश्नचतुष्टयम्) 1x4=4

(1) किं नामधेया युवयोः + जननी ?
(2) सभ्यता निसर्गे स्यान्न समाविष्टा |
(3) तथा वाचि भवेत्+ यदि ।
(4) गावश्च गोभिः तुरङ्गास्तुरङ्गै:।
(5) कः पुनरन्धो राज्ञो विरुद्धः+ इति आर्येणावगम्यते ?

6. अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत - ( केवलं प्रश्नचतुष्टयम्) 1x4=4

(1) नहि निर्मलं जलम् ।

(क) मलस्य योग्यम् (ख) मलस्य अभावः

(ग) मलस्य पश्चात् (घ) मलेन सह

(2) **<u>बाष्पयानमाला</u>** संधावति ।

(क) बाष्पयानेषु माला (ख) बाष्पयानेभ्यः माला

(ग) बाष्पयानानां माला (घ) बाष्पयानेषु माला

(3) तत्र राजसिंहः नाम **<u>राजपुत्रः</u>** वसति स्म।

(क) राज्ञः पुत्रः (ख) राज्ञे पुत्रः (ग) राज्ञा पुत्रः

(4) तस्मिन्नेव काले **<u>व्याघ्रचित्रकौ</u>** अपि जलपानाय आगतौ ।

(क) व्याघ्रः चित्रकौ च (ख) व्याघ्रौ चित्रकौ च

(ग) व्याघ्रः चित्रकाः च (घ) व्याघ्रः च चित्रकःच

(5) गुणं न वेत्ति **<u>निर्गताः गुणाः यस्मात् सः</u>** ।

(क) निर्गुणः (ख) निर्गतगुणाः

(ग) निर्गुणम् (घ) निर्गणम्

7. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उत्तरं विकल्पेभ्यः चित्वा लिखत- ( केवलं प्रश्नचतुष्टयम्) 1x4=4

(1) जननी **<u>तुल्य-वत्सला</u>** । .

(क) वत्सल + टाप् (ख) वत्सल+त्व

(ग) वत्सलः + टाप् (घ) वत्सल+ङीप्

(2) **<u>बुद्धिमती</u>** पुत्रद्वयोपेता पितृगृहं प्रति चलिता

(क) बुद्धिमान्+ ङीप् (ख) बुद्धिमत्+ टाप्

(ग) बुद्धिमत्+ ङीप् (घ) बुद्धिमत् +मतुप्

(3) सर्वेषां मत्कृते **<u>महत्वं</u>** विद्यते। |

(क) महत्+ त्व (ख) महान् + त्व

(ग) महत्+ त्वम्                    (घ) महत् + तल्

(4) श्रमक्लमपिपासोष्ण-शीतादीनां **<u>सहिष्णु + तल्</u>** ।

(क) सहिष्णुतल्                 (ख) सहिष्णुत्वम्`

(ग) सहिष्णुता                 (घ) सहिष्णुतार

(5) अयं जनः वेद+ठक् कार्यं करोति |

(क) वैदिकः                 (ख) वैदिकी

(ग्) वैदिकम्                 (घ) वैदिकाः

8. वाच्यानुसारम् उचितपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत-                (केवलं प्रश्नत्रयम्) 1x3=3

ऐश्वर्या -किं (1) ------- पुस्तकस्य पदानुशीलनीं अपि पश्यसि ?

(क) त्वम्                 (ख) अहम्

(ग) ते                 (घ ) ताः

वर्षा - आम्! मया पदानुशीलनी अपि (2) ---------?

(क) दृश्यते                 (ख) पश्यति

(ग) पश्यामि                 (घ) पश्यते

ऐश्वर्या - किम् अधुना त्वया (3) ---------- लिख्यन्ते?

(क) शब्दरूपाणि                 ( (ख) शब्दरूपाः

(ग) शब्दरूपैः                 (घ)शब्दरूपाणाम्

वर्षा - आम्, अहम् अधुना शब्दरूपाणि -------------|

(क) लिखामि                 (ख) लिखसि

(ग) लिखन्ति                 (घ) लिखामः

9. कालबोधकशब्दैः अधोलिखितकार्यक्रमं पूरयत- ( केवलं प्रश्नचतुष्टयम्) 1x4=4

(क) सुरेश: सायं ---------- 4:30 वादने क्रीडति ।

(ख) वैभवः प्रातः ----------- 6:15 वादने जागर्ति ।

(ग) अहं प्रातः ----------------7:00 वादने --- पाठशालां गच्छामि ।

(घ) सायं कपिलः------------------7:30 वादने पूजां करोति| ,

(ङः) केशव: रात्रौ --------------8:45 वादने भोजनं करोति ।

10. मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत-

(केवलं प्रश्नत्रयम्) 1x3=3

(क) -------------वर्षाकाल: अस्ति।

(ख) विद्वांसः ---------- आगमिष्यन्ति ।

(ग) समुद्रे वृष्टिः ---------------भवति।

(घ) भवान् पुस्तकं -———- क्रीतवान् ?

मंजूषा-

| अत्र , इदानीम् ,कुतः वृथा |
|---|

11. अधोलिखितवाक्येषु रेखाङ्कित-अशुद्धिपदाय उचितपदं चित्वा वाक्यानि पुनः लिखत- (केवलं प्रश्नत्रयम्) 1x3=3

(क) मुकेश: <u>उन्नतम्</u> अस्ति।

क) उन्नता (ख)उन्नतः

(ग) उन्नतिः (घ) उन्नताः

(ख) राम: फलं <u>खादामि</u> ।

(क) खादसि (ख) खादन्ति

(ग) खादति (घ) खादामि

(ग) राजेन्द्रः पाठं पाठयन्ति|

(क)पाठयति (ख) पाठयामि

(ग)पाठयसि (घ)पाठयताम्

(घ) सुरेशमहोदयः श्वः न <u>आगच्छत्</u> |

(क)आगमिष्यति (ख)आगच्छति

(ग)आगच्छन् (घ) अवगच्छत्

## "घ" खण्डः

### पठितावबोधनम् (30 अङ्काः)

12. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत- 5

कश्चित् कृषकः बलीवर्दाभ्यां क्षेत्रकर्षणम् कुर्वन्नासीत्। तयोः बलिवर्दयो: एकः शरीरेण दुर्बलः जवेन गन्तुमशक्तचासीत्। अतः कृषकः तं दुर्बलं वृषभं तोदनेन नुद्यमानः अवर्तत। सः ऋषभः हलमूढ्वा गन्तुमशक्त: क्षेत्रे पपात । क्रुद्ध: कृषीवलः तमुत्थापयितुं बहुवारं प्रयत्नमकरोत्, तथापि वृषः नोत्थितः ।भूमौ पतिते स्वपुत्रं दृष्ट्वा सर्वधेनूनां मातुः सुरभेः नेत्राभ्यामश्रूणि आविरासन्। सुरभेरिमामवस्थां दृष्ट्वा सुराधिपः तामपृच्छत्"अयि शुभे ! किमेवं रोदिषि? उच्यताम् इति ।

अ. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) ½ x2=1

(क) कः क्षेत्रकर्षणं कुर्वन्नासीत् ?

(ख) कः क्रुद्ध: आसीत् ?

(ग)कः हलमूढ्वा गन्तुमशक्त:क्षेत्रे पपात ?.

आ. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्) 1 x2=2

(क) सुराधिपः किम् अपृच्छत् ?

(ख) मातुः सुरभेः नेत्राभ्यामश्रूणि किमर्थम् आविरासन् ?

(ग) कृषकः कं नुद्यमानः अवर्तत ?

इ. निर्देशानुसारम् उत्तरत- (केवलं प्रश्नद्वयम्) 1 x2=2

(क) "अनेकवारम्, इत्यस्य किं पर्याय पदं गद्यांशे प्रयुक्तम् ?

(ख)"वृषभम्'- इति पदस्य किं विशेषणपदं गद्यांशे प्रयुक्तम् ?

(ग) "अपृच्छत्"- इति पदस्य कर्तृपदं किम् ?

13. अधोलिखितं पद्यांशं पठित्वाप्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत- 5

य इच्छत्यात्मनः श्रेयः प्रभूतानि सुखानि च ।
न कुर्यादहितं कर्म स परेभ्यः कदापि च ॥

अ. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) ½ x2=1

(1) मनुष्यः आत्मने कियन्ति सुखानि इच्छति?
(2) नरः केभ्यः अहितं कर्म न कुर्यात्?
(3) कीदृशं कर्म न करणीयम्?

आ. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्) 1 x2=2

(क) कः परेभ्यः अहितं कर्म न कुर्यात् ?
(ख) परोपकारेण कस्य श्रेयः भवति?
(ग) मनुष्यस्य जीवने मुख्यस्थानं कस्य भवति ?

इ. निर्देशानुसारम् उत्तरत- (केवलं प्रश्नद्वयम्) 1 x2=2

(1) "यः" इति कर्तृ पदस्य क्रियापदं किम्?
(2) "अहितं कर्म" अनयोः पदयोः किं विशेष्यपदम्?
(3) "कल्याणम्" इत्यस्य पदस्य कः पयायः श्लोके प्रयुक्तम् ?

14. अधोलिखितं नाट्यांशं पठित्वाप्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत- 5

काक : - रे परभृत्! अहं यदि तव सन्ततिं न पालयामि तर्हि कुत्र स्युः पिकाः? अतः अहम् एव करुणापरः पक्षिसम्राट्काकः ।

गजः - समीपतः एवागच्छन्अरे ! अरे ! सर्वा वार्ता श्रुण्वन्नेवाहं अत्रागच्छम्। अहं विशालकायः, बलशाली, पराकमी च । सिंहः वा स्यात्अथवा अन्यः कोऽपि । वन्यपशून् तु तुदन्तं जन्तुमहं स्वशुण्डेन पोथयित्वा मारयिष्यामि । किमन्यः कोऽप्यस्ति एतादृशः पराकमी ।अतः अहमेव योग्यः वनराजपदाय ।

वानरः - अरे ! अरे! एवं वा (शीघ्रमेव गजस्यापि पुच्छं विधूय वृक्षस्योपरि आरोहति।)

(गजः तं वृक्षमेव स्वशुण्डेन आलोडयितुमिच्छति परं वानरस्तु कूर्दित्वा अन्यं वृक्षमारोहति । एवं गजं वृक्षात् वृक्षं प्रति धावन्तं दृष्ट्वा सिंहः अपि हसति वदति च।)

सिंहः - भो : गज ! मामप्येवमेवातुदन्एते वानराः ।

अ. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) ½ x2=1

(क) कः आत्मानं पक्षिसम्राट् मन्यते ?

(ख) काकः पिकं कथं सम्बोधयति ?

(ग) वानरः कुत्र आरोहति ?

आ. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्) 1 x2=2

(क) सिंहः किं वदति ? .

(ख) काकः किं वदति ?

(ग) वृक्षात् वृक्षं प्रति कः धावति ?

इ. निर्देशानुसारम् उत्तरत- (केवलं प्रश्नद्वयम्) 1 x2=2

(1) नाट्यांशे "आरोहति" इति क्रियायाः कर्तृ पदं किम्?

(2) "वानराः” इति कर्तृपदस्य क्रियापदं गद्यांशात् चित्वा लिखत । -

(3) नाट्यांशे "दुर्बलम्" इत्यस्य किं विलोमपदं प्रयुक्तम्?

15. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत-( केवलं प्रश्नचतुष्टयम्) 1x4=4

(क) **सुराधिपः** ताम् अपृच्छत् ।

(ख) व्यायामं कुर्वतः **विरुद्धम्** भोजनम् अपि परिपच्यते।

(ग)उद्याने **पक्षिणां** कलरवः चेतः प्रसादयति ।

(घ)प्रीताभ्यः प्रकृतिभ्यः **राजानः** प्रति प्रियमिच्छन्ति।

(ङ)सः **भारवेदनया** क्रन्दति स्म ।

16. मञ्जूषातः समुचितपदानि चित्वा अधोलिखितश्लोकस्य अन्वयं पूरयित्वा पुनः लिखत- 1x4=4

**आलस्यं हि मनुष्याणां शरीरस्थो महान्रिपुः ।**
**नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति ॥**

अन्वयः- आलस्यं हि (1) ………........ शरीरस्थः (2) ……….......... रिपुः (अस्ति) । (3) …..................... बन्धुः न अस्ति यं (4)....................... (मानवः) न अवसीदति ।

**मञ्जूषा-**

| |
|---|
| उद्यमसमः, कृत्वा, मनुष्याणाम् , महान् |

**अथवा**

**मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत -**

गुणी गुणं वेत्ति न वेत्ति निर्गुणो, बली बलं वेत्ति न वेत्ति निर्बलः।
पिको वसन्तस्य गुणं न वायसः, करी च सिंहस्य बलं नमूषकः ॥

भावार्थः –

गुणवान्जनः एव --------------- महत्वं जानाति । गुणहीनः गुणानां महत्त्वं न अवगच्छति । तथैव---------- जनः बलस्य महत्वं जानाति परन्तु दुर्बलः बलस्य महत्वं न अवगच्छति । वसन्त-ऋतोः महत्वं कोकिलः एव सम्यग् ------------- शक्नोति न तु काकः । एवमेव गजः सिंहस्य -----महत्वं जानाति । मूषकः तस्य शौर्यम् अवगन्तुं न शक्नोति ।

**मञ्जूषा**

| |
|---|
| अवगन्तुम्, बलवान् , पराक्रमस्य, गुणानाम् |

17. अधोलिखित कथांशं समुचित-क्रमेण लिखत- ½ x8=4

1. "त्वं व्याघ्रत्रयम् आनेतुं, प्रतिज्ञाय एकमेव आनीतवान्।
2. गलबद्धशृगालकः व्याघ्रः पुनः पलायितः।
3. जम्बुककृतोत्साहः व्याघ्रः पुनः काननम्आगच्छत्।
4. व्याघ्रः व्याघ्रमारी इयमिति मत्वा पलायितः।
5. व्याघ्रं दृष्ट्वा सा पुत्रौ ताडयन्ती उवाच-'अधुना एकमेव व्याघ्रं विभज्य भुज्यताम्
6. बुद्धिमती पुत्रद्वयेन उपेता पितृगृहं प्रति चलिता ।
7. मार्गे सा एकं व्याघ्रम् अपश्यत्।
8. प्रत्युत्पन्नमतिः सा श्र्गालं आक्षिपन्ती उवाच ।

18. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलं उचितार्थं चित्वा लिखत-

(केवलं प्रश्नत्रयम्) 1x3=3

1. एकान्ते **<u>कान्तारे</u>** क्षणमपि सञ्चरणं स्यात्।
   (क) वने (ख) जने
   (ग) गहने (ग) ग्रामे
2. मा <u>ब्रूहि</u> दीनम् वचः
   (क) बाला (ख) स्वच्छता
   (ग) वद (घ) वाहकः
3. **<u>वयसस्तु</u>** किञ्चिदनन्तरम् ।
   (क) वायसः (ख) वयस्यः
   (ग) आयुषः (घ)व्यर्थः
4. यः इच्छत्यात्मनः श्रेयः **<u>प्रभूतानि</u>** सुखानि च ।
   (क) बहूनि (ख) प्रभावपूर्णानि
   (ग) पञ्चभूतानि (घ) व्यतीतानि

## संस्कृतम् (उत्तरकुञ्चिका) आदर्शप्रश्नपत्रम् -1

कक्षा : दशमी सम्पूर्णाङ्काः - 80

.1अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत-

(I) एकपदेन उत्तरत- (1x2=2)

1)व्यायामस्य 2) अतृप्त्या 3) मानवः

(II) पूर्णवाक्येन उत्तरत - (2x2=4)

1) कार्यवैफल्येन नैराश्यं भवति ।

2) । स्वस्थशरीरेणैव मानव: सोत्साहं गृहस्थजीवनस्य सर्वविधानां समस्यानां समाधाने कुशल: भवति

3) वर्तमानकाले मानवः समस्यावर्ते पतितोsस्ति

(III) भाषिककार्यम्- (1x3=3)

(1) मानव : 2. पीडितः 3. शरीरस्य 4. आद्यम्

4. व्यायामः / व्यायामस्य महत्त्वम्

किमपि उचितं शीर्षकम्

खण्डः“ खः रचनात्मक-कार्यम् 15) अङ्काः(

2. पत्रलेखनम्(1/2x10=5)

1). श्रीमान्प्रकाशकमहोदय 2). रचना सागर (प्रा०) लि० 3)पुस्तकानि 4)छात्र:5)प्रकाशितानि 6)पुस्तकानि 7)निवेदनं 8)प्रेषणीयानि 9)कृपा 10)देवेन्द्र:

3. चित्रवर्णनम्-

अ) इदं चित्रं वृक्षारोपणस्य अस्ति।

आ) अत्र बालबालिकाः सन्ति।

इ) ते पादपान् आरोपयन्ति।

ई) अत्र वृक्षाः सन्ति।

उ) अत्र शिक्षिका अस्ति।

ऊ) अत्र पर्वताः सन्ति।

ऋ) आकाशे मेघाः सन्ति।

.3अधोप्रदत्तं चित्रंदृष्ट्वा मज्यूषायाः सहायतया वा संस्कृते पञ्च वाक्यानि लिखत कान्यपि उचितानि व्याकारण रीत्या भावरीत्या शुद्धानि पञ्च वाक्यानि (1x5=5)

**अथवा**

जनः अक्षरज्ञानेन स्व हस्ताक्षरं कर्तुं शक्नोति, सः पठितुं शक्नोति, सः पत्राणि लेखितुं शक्नोति। सः पत्राणि पठित्वा विषयम् अवगन्तुं शक्नोति। सः केनापि वञ्चितः न भवति॥

4.अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत) - केवलं वाक्यपञ्चकम् 1x5=5

1)किं अहं अन्त:आगच्छामि ?

2)वयं सर्वे संस्कृतं पठाम :

3)माता भोजनं पचति

4)शिशु: कुक्कुरात् बिभेति

.5)त्वं लेखन्या लिख.

6) .श्व:विद्यालयस्य अवकाश: भविष्यति

7) ह्य: त्वं कुत्र आसी:

5.अधोलिखितवाक्येषु रेखाङ्कित पदयो: सन्धम् सन्धिच्छेदं वा कुरुत) - केवलं प्रश्न चतुष्ट यम् 1x5=5

1. युवयोर्जननी. 2) स्यात् + न 3)भवेद्यदि. 4)गाव :+च. 5) विरुद्ध+इति

6.अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं व प्रदत्तविकल्पेभ्यः चित्वालिखत ` 1x4=4

1. मलस्य अभावः 2)बाष्पयानानां माला 3)राज्ञ:पुत्र: 4)व्याघ्र:च चित्रक:च 5)निर्गुण:

7.अधोलिखितवाक्येषुरेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत) ~ केवलं प्रश्नचतुष्टयम् 1x4=4

1. वत्सल+टाप् 2)बुद्धिमत्+ङीप् 3)महत्+त्व. 4)सहिष्णुता. 5) वैदिकम्

8.मञ्जूषायां प्रदत्तः पदै: वाच्यपरिवर्तनं कृत्वा अधोलिखितं संवादं पुनः लिखत)- 1x3=3

1)त्वम् 2)दृश्यते 3)शब्दरूपाणि 4. लिखामि

9.कालबोधकशब्दै :अधोलिखित -दिनचरर्यां पूरयत - क्रेवलंप्रश्नचतुष्टम्;- 1x4=4

क) सार्ध चतुर्वादने ख) सपाद षड्वादने ग) सप्तवादने घ) सार्ध सप्त वादने ,

(ङ) पादोन नववादने

10.मञ्जूषायां प्रदत्तः उचितै: अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत -1/2x6=3

1.इदानीम् 2.अत्र 3.वृथा 4.कुतः 5.श्वः

11.अधोलिखितवाक्येषु रेखाङ्कितपदं अशुद्धम् अस्ति। शुद्धं पदं विकल्पेभ्यः चित्वा लिखत -(केवलं प्रश्चत्रयम्) 1x3=3

क) उन्नत : ख)खादति 3)पाठयति 4)आगमिष्यति

12. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानां उत्तराणि संस्कृतेनलिखत - (5)

अ .एकपदेन उत्तरत () केवलं प्रश्नद्वयम्)

क. कृषक: ख) कृषक: ग )बलीवर्द:

ब.पूर्णवाक्येन उत्तरत ।) केवलम् प्रश्नद्वयम्)

क) अयि शुभे किमेवं रोदिषि ?उच्यताम् इति

ख) भूमौ पतिते स्वपुत्रंदृष्ट्वा सुरभे:नेत्राभ्यां अश्रूणि आविरासन्

(ग) वृषभम्

स .प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत) - केवलं प्रश्नद्वयं)

1. बहुवारं 2)सुराधिप: 3)दुर्बलं

13.अधोलिखितं पद्यांशं पठित्वा प्रश्ननाम् उत्तराणिसंस्कृतेन लिखत (5)

अ .एकपदेन उत्तरत) - केवलं प्रश्नद्वयम्

1)प्रभूतानि 2)परेभ्य: 3)अहितं

ब .पूर्णवाक्येन उत्तरत - )केवरलं प्रश्नमेकम्

क. य:आत्मन:श्रेय:प्रभूतानि सुखानि इच्छति स परेभ्य:अहितं कर्म न कुर्यात्

ख) आत्मन:

(ग) हित कर्मणः

स .निर्देशानुसारम् उत्तरत) .- केवलं प्रश्नद्वयम्)

1इच्छति.  2) कर्म  3)श्रेय:

.14अधोलिखितं नाटयांशं पठित्वा प्रदत्तप्रश्नानां उत्तराणि संस्कृतेन लिखत(-5)

अ .एकपदेन उत्तरत ।) केवलं प्रश्नद्वयम् (

क ) काक: ख) परभृत्  ग) वृक्षं

ब .पूर्णवाक्येन उत्तरत ।) केवलं प्रश्नद्वयम्

क )  भो! गज मामप्येवमेवातुदन् एते वानरा:

ख)  रे परभृत्!अहं यदि तव संततिं न पालयामि तर्हि कुत्र स्यु: पिका:?.

ग)  वानरः

स .प्रदत्तविकलेभ्यः उचितम् उत्तरं चित्वा लिखत)- केवलं प्रश्नद्वयम्

क) वानर: 2) अतुदन्  3) बलशाली.

15. रेखाङ्कित -पदानि आधृत्य प्रश्ननिर्माणं कुरुत) - केवलं प्रश्नचतुष्टयम्

क) क:  ख)कीदृशं/किं  ग)केषाम्  घ)के  ङ)कया

16.मञ्जूषातः समुचितपदानि चित्वा अधोलिखित -श्लोकस्य : अन्वयं पूरयत-

1)मनुष्याणां  2)महान्.  3)उद्यमसम: 4)कृत्वा

मञ्जूषायाः साहाय्येन श्लोकस्यभावार्थे  रिक्तस्थानानि पूरयित्वा पुनः लिखत-1x4=4

1)गुणानां 2)बलवान्  3)अवगन्तुं  4)पराक्रमस्य

17.अधोलिखित-कथांशं समुचित-क्रमेण लिखत 1/2x8=4

**1** बुद्धिमती पुत्रद्वयेन2. मार्गे सा एकं3. व्याघ्रं दृष्ट्वा सा पुत्रौ 4. व्याघ्रः 5 जम्बुककृतोत्साहः6. प्रत्युत्पन्नमतिः सा श्रृगालं7"त्वं व्याघ्रत्रयम् आनेतुं,8. गलबद्धशृगालकः

18. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वालिखत - )केवलं प्रश्नत्रयम्( 1x3=3

1)वने 2) रुजुता 3) आयुष: 4)बहूनि

**************************************************

केन्द्रीयविद्यालयसंगठनम् चेन्नै संभागः 2022-2023

कक्ष्या - दशमी   आदर्शप्रश्नपत्रम् -2

संस्कृतम् (कोड सङ्ख्या-122)

होराः - 3 होराः                                        पूर्णाङ्काः - 80

सामान्यनिर्देशाः-

1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 13 पृष्टानि मुद्रातानि  सन्ति।
2. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्नाः सन्ति।
3. अस्मिन् प्रश्नपत्रे चत्वाराः खण्डाः सन्ति।
4. प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन्स्थाने क्रमेण लेखनीयानि।
5. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः।
6. प्रश्नस्य क्रमाङ्कः प्रश्नपत्रानुसारम् एव लेखनीयः।
7. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
8. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

प्रश्नपत्रस्वरूपम्

| | | | |
|---|---|---|---|
| 'क' खण्डः | : | अपठितावबोधनम् | 10 अङ्काः |
| 'ख' खण्डः | : | रचनात्मककार्यम् | 15 अङ्काः |
| 'ग' खण्डः | : | अनुप्रयुक्तव्याकरणम् | 25 अङ्काः |
| 'घ' खण्डः | : | पठितावबोधनम् | 30 अङ्काः |

’क’ खण्डः - अपठितावबोधनम्                (10 अङ्काः)

1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -

प्रात:काल: अतीव मधुर: काल: भवति। यदा स्वच्छे आकाशे सूर्य: उदेति तदा अन्धकार: दूरं गच्छति। सर्वत्र प्रकाश: प्रसरति। पक्षिण: यत्र तत्र भ्रमन्ति। मधुरेण स्वरेण मधुरं गीतं गायन्ति। सरोवरेषु कमलानि विकसन्ति। उद्यानेषु विभिन्नानि पुष्पाणि विकसन्ति च। तेषु भ्रमरा: सानन्दं विचरन्ति। शीतल: वायु: वहति। सम्पूर्णं वातावरणं सुगन्धमयं भवति। भ्रमणशीला: प्रसन्ना: जना: उद्यानेषु भ्रमन्ति। केचन तत्रैव व्यायामं कुर्वन्ति। ते अतीव प्रसन्ना: सन्ति। पशव: अपि प्रसन्ना: भवन्ति। धन्या एषा प्रभातवेला।

अ. <u>एकपदेन उत्तरत-</u>   (केवलं प्रश्नद्वयम्)   1 X2 = 2

(i) क: अतीव मधुर: काल: भवति?

(ii) सर्वत्र क: प्रसरति ?

(iii) पक्षिण: मधुरेण स्वरेण कीदृशं गीतं गायन्ति?

आ. <u>पूर्णवाक्येन उत्तरत</u>-  (केवलं प्रश्नद्वयम्)   2X2=4

(i) उद्यानेषु कानि विकसन्ति?

(ii) यदा स्वच्छे आकाशे सूर्य: उदेति तदा किं भवति?

(iii) भ्रमणशीला: प्रसन्ना: जना: कुत्र भ्रमन्ति?

इ. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत-   1

ई. यथानिर्देशम् उत्तरत  (केवलं प्रश्नद्वयम्)   1 X 3 = 3

(i) “ गीतम्” - इति विशेष्यपदस्य विशेषणपदं किम् ?

(क) भ्रमणशील:  (ख) मधुरम् (ग) कमलानि (घ) पुष्पाणि

(ii) “सन्तुष्टा:” इति पदस्य किं पर्यायपदं गद्यांशे प्रयुक्तम् ?

(क) जना:  (ख) पक्षिण: (ग) प्रसन्ना:  (घ) धन्या:

(iii) “उदेति” इति क्रियापदस्य कर्तृपदं किमस्ति ?

(क) जनाः (ख) पक्षिण: (ग) पुष्पाणि (घ) सूर्य:

iv) “समीपम्” इति पदस्य किं विलोमपदम् अत्र प्रयुक्तम्?

(क) दूरम् (ख) प्रभात: (घा) गीतम् (घ) सूर्य:

“ख’ ’ खण्डः रचनात्मकं कार्यम् (15 अङ्काः)

2. भवतः नाम दिवाकर:। भवान् रामजन्म-विद्यालय-छात्रावासे निवसति। भवत: माता रुग्णा अस्ति।तत्समाचारं ज्ञातुं पितरं प्रति पत्रं लिखति। तत्पत्रे रिक्तस्थानानि पूरयित्वा पुनः लिखत-

छात्रावासः

(i) -------------------।

मध्यप्रदेश:

दिनाङ्कः-

---

सेवायाम्,

परम-आदरणीयाः पितृमहाभागा:!

(ii) ------------------------।

सेवायां निवेद्यते यत् अत्र सर्वं(iii ) -------------------अस्ति। भवतां सर्वेषां कुशलतां प्रति उत्सुकोऽस्मि। श्रूयते यत् संप्रति (iv) -------------- स्वास्थ्यं सुष्ठु नास्ति। सा केन कारणेन (v) --------------- अस्ति? कृपया पत्रे लिखतु भवान्। तस्या: निरीक्षणं (vi) ---------------------- कृतं न वा? अथवा तेन किं (vii)--------------------- ? एतदपि लिखतु भवान्। अहं मातु: (viii) ------------------------- प्रति अतीव चिन्तितोऽस्मि। कृपया तां कस्यचिदपि श्रेष्ठचिकित्सकस्य (ix) ------------------नयतु भवान्। यत: तस्या: उचितं निरीक्षणं भवेत्।

भवदीयः(x)-------------सुत:

दिवाकर:।

| | | | | |
|---|---|---|---|---|
| समीपे, | रामजन्म-विद्यालय:, | चिकित्सकेन, | स्वास्थ्यम्, | आज्ञाकारी, |
| रुग्णा, | सादरं प्रणामम्, | कथितम्, | कुशलम्, | मातु: |

3. प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत-

1x5 =5



मञ्जूषा-

वृक्षाः, वनस्य, सिंहः, मृगाः, धावन्ति, कूर्दन्ति, पुष्पाणि, भल्लूकः, , खगाः, विहरन्ति, इतस्ततः, आकाशे, जलम्, जलप्रवाहः, पिबन्ति।

अथवा

मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अहिकृत्य न्यूनातिन्यूनं पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत- 1 x 5 = 5

**“दीपावलि:”**

मञ्जूषा-

| |
|---|
| दीपानां आवलिः, रात्रौ, अमावास्या, अन्धकारः, श्रीरामः, अयोध्याम्, प्रजाः, प्रसन्नाः,आगतः, निशायाः, दूरीकृतः, मिष्टान्नानि, दीपान्, ज्वालयामः,सर्वत्र |

**4. अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत-**

**(केवलं वाक्यपञ्चकम्)** 1x5=5

1) बाग के चारों ओर वृक्ष हैं ।
There are trees around the garden .

2. गङ्गा भारत की जीवनदायिनी नदी है |
Ganges is the life-giving river of India.

3. साधु-संगति मार्गदर्शन करती है |
Good association guides us properly.

4.मेरा भाई दसवीं कक्षा में पढता है|
My brother studies in tenth class.

5. हम दोनों खेलते है |
We both play.

6 प्रतिदिन व्यायाम करो ।
Do physical exercise every day .

7. संस्कृत सब भाषाओं की जननी है |
Samskrit is the mother of all languages.

## “ग” खण्डः

## अनुप्रयुक्तव्याकरणम्  ( 25 अङ्काः)

5. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिविच्छेदं वा कुरुत –

( केवलं प्रश्नचतुष्टयम्) 1x4=4

i) यथाकथञ्चित् + उभौ शवम् आनीतवन्तौ।

ii) क्रोधो हि नराणां प्रथम: शत्रु:।

iii) सुरभे:+इमाम् अवस्थां दृष्ट्वा इन्द्रस्य हृदयम् अद्रवत्।

iv) दुर्दान्तै: दशनै: जनग्रसनं स्यात्+न नगरे।

v) योजकस्तु दुर्लभ:।

6. अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत - ( केवलं प्रश्नचतुष्टयम्) 1x4=4

i) नगरे यानानां पङ्क्तय: प्रदूषणं उत्पादयति।

(क) यानानांपङ्क्ति: (ख) यानपङ्क्ति:

(ग) यानपङ्क्तय: (घ) यानापङ्क्त्य:

ii) लवकुशौ यथासमयम् आगतौ।

(क) समयस्य यथा (ख) समयम् अनतिक्रम्य

(ग) समयेन अतिक्रम्य (घ) समये अनतिक्रम्य

iii) बक: स्थिता प्रज्ञा यस्य स: इव जले चिरकालं स्थास्यति ।

(क)स्थिता प्रज्ञा (ख) स्थितप्रज्ञा

(ख)स्थितप्रज्ञ: (घ) प्रज्ञस्थ:

iv) लव:च कुश: च रामसभायां आगतौ।

(क) लवकुश: (ख) कुशलवा:

(ग) लवकुशौ (घ) लवकुशे

v) विधात्रा अहमेव पक्षिणां राजा कृत: ।

(क) पक्षिराजः (ख) पक्षिराजा

(ग) पक्षीराजा (घ) पक्षीराजः

7. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उत्तरं विकल्पेभ्यः चित्वा लिखत- (केवलं प्रश्नचतुष्टयम्) 1x4=4

i) सर्वत्र पाषाणी सभ्यता न स्यात्।

(क) पाषाण + टाप् (ख) पाषाण + मतुप्

(ग) पाषाण + ङीप् (घ) पाषाणा + टाप्

ii) बुद्धि+मतुप् भार्या व्याघ्रभयात् मुक्ता अभवत्।

(क) बुद्धिमान् (ख) बुद्धिमती

(ग) बुद्धिमता (घ) बुद्धिमत्

iii) यथासमयं सर्वेषां प्राणिनां महत्+त्व विद्यते ।

(क) महत्वा (ख) महवम्

(ग) महत्त्वम् (घ) महव

iv) लोके विद्यमानं लोक+ठक् भवति।

(क) लोकिकम् (ख) लाकिकम्

(ग) लौकिकम् (घ) लौकम्

v) प्रकृतेः रमणीयता मनोरमा भवति।

(क) रम+अनीयता (ख) रमणीय+तल्

(ग) रमणीय+टाप् (घ) रमाण+तल्

8. वाच्यानुसारम् उचितपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत- (केवलं प्रश्नत्रयम्) 1x3=3

(i) शिक्षकः- प्रियछात्र! त्वं किं ___________?

(क) करोमि (ख) करोषि

(ग) करोति (घ) कुर्वन्ति

(ii) छात्रः - स्वामिन्! ___________ पुस्तकं पठ्यते।

(क) अहम् (ख) मया

(ग) त्वम् (घ) त्वया

(iii) शिक्षकः - त्वया किं ___________ पठ्यते?

(क) पुस्तकेन (ख) पुस्तकाय

(ग) पुस्तकम् (घ) पुस्तकः

(iv)छात्रः- स्वामिन्! अहं संस्कृत-पुस्तकं ___________।

(क) पठामि (ख) पठति

(ग) पठ्यते (घ) पठामः

9. कालबोधकशब्दैः अधोलिखितकार्यक्रमं पूरयत- (केवलं प्रश्नचतुष्टयम्) 1x4=4

(i) मोहनः ------------------- (6.00) वादने उत्तिष्ठति।

(ii) सः -------------------- (8.15) वादने विद्यालयं गच्छति।

(iii) तत्र ----------------------------- (2.30)वादन-पर्यन्तं पठति।

(iv) स: ------------------- (2.45) वादने गृहं प्रत्यागच्छति।

(v) स: सायं --------------------------- (5.00) वादन-पर्यन्तं क्रीडति।

10. मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत-
(केवलं प्रश्नत्रयम्) 1x3=3

(i) --------------------------------- वैज्ञानिकयुग: भवति।

(ii) अयं कीटक: ---------------------------------------- गच्छति।

(iii) मेघा: -------------------------------------- गर्जन्ति।

(iv) स: ----------------------- एव आगमिष्यति?

| |
|---|
| उच्चैः, इदानीम्, श्वः, शनैः |

11. अधोलिखितवाक्येषु रेखाङ्कित-अशुद्धिपदाय उचितपदं चित्वा वाक्यानि पुनः लिखत- (केवलं प्रश्नत्रयम्) 1x3=3

(i) निर्धन: भूरि परिश्रमं <u>करोमि स्म</u>।

(क) करोति स्म (ख) करोषि स्म

(ग) कुर्वन्ति स्म (घ) कुरुथ: स्म

(ii) स: वाक्कील: <u>नीतिमत्</u> अस्ति।

(क) नीतिमन्त: (ख) नीतिमान्

(ग) नीतिमता (घ) नीतिमत्यौ

(iii) <u>त्वं</u> विद्यालयं गच्छामि।

(क) सः (ख) अहम्

(ग) ते (घ) ताः

(iv) अहं ह्य: एकं पुस्तकम् <u>पठिष्यामि</u>।

(क) अपठम् (ख) पठामि

(ग) पठतु (घ) पठन्ति

"घ" खण्डः

पठितावबोधनम् (30 अङ्काः)

12. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत- 5

आदेशं प्राप्य उभौ प्राचलताम्। तत्र उपेत्य काष्ठपटले निहितं पटाच्छादितं देहं स्कन्धेन वहन्तौ न्यायाधिकरणं प्रति प्रस्थितौ। आरक्षी सुपुष्टदेह: आसीत्, अभियुक्त: च अतीव कृशकाय:। भारवत: शवस्य स्कन्धेन वहनं तत्कृते दुष्करम् आसीत्। स: भारवेदनया क्रन्दति स्म। तस्य क्रन्दनं निशम्य मुदित: आरक्षी तमुवाच,"रे दुष्ट! तस्मिन् दिने त्वया अहं चोरिताया: मञ्जूषाया: ग्रहणाद् वारित:। इदानीं निजकृत्यस्य फलं भुङ्क्ष्व। अस्मिन् चौर्याभियोगे त्वं वर्षत्रयस्य कारादण्डं लप्स्यसे" इति प्रोच्य उच्चै: अहसत्।

अ. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) ½ x2=1

क) कं प्राप्य उभौ प्राचलताम्?

ख) क: सुपुष्टदेह: आसीत्?

ग) अभियुक्त: कीदृश: आसीत्?

आ. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्) 1 x2=2

क) कस्य वहनं तत्कृते दुष्करम् आसीत्?

ख) स: भारवेदनया किं करोति स्म?

ग) कस्य क्रन्दनं निशम्य आरक्षी मुदित:?

इ. निर्देशानुसारम् उत्तरत- (केवलं प्रश्नद्वयम्) 1 x2=2

क) "शरीरम्"- इत्यर्थे अत्र किं पदं प्रयुक्तम्?

ख) "आरक्षी सुपुष्टदेह:" अनयोः विशेषणपदं किम्?

ग) "क्रन्दति स्म" इति क्रियायाः कर्ता कः?

13. अधोलिखितं पद्यांशं पठित्वाप्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत- 5

मृगा: मृगै: सङ्गमनुव्रजन्ति
गावश्च गोभि: तुरगास्तुरङ्गै:।
मूर्खाश्च मूर्खै: सुधिय: सुधीभि:
समान-शील-व्यसनेषु सख्यम् ॥

अ. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) ½ x2=1

क) मृगा: कै: सङ्गमनुव्रजन्ति?

ख) गाव: काभि: सङ्गमनुव्रजन्ति?

ग) तुरगा: कै: सङ्गमनुव्रजन्ति?

आ. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्) 1 x2=2

क) मूर्खाश्च मूर्खै: सह किं अनुव्रजन्ति?

ख) के सुधीभि: सह सङ्गम् अनुव्रजन्ति?

ग) समान-शील-व्यसनेषु किं भवति?

इ. निर्देशानुसारम् उत्तरत- (केवलं प्रश्नद्वयम्) 1 x2=2

क) "मृगा:" इति कर्तृपदस्य क्रियापदं किम्?

ख)" **पशव "** **:**इत्यस्य पदस्य क :पर्याय :अत्र आगत:?

ग) "**पण्डिता** " **:**इति पदस्य किं विलोमपदं अस्ति?

14. अधोलिखितं नाट्यांशं पठित्वाप्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत-5

व्याघ्रचित्रकौ- अरे! किं वनराजपदाय सुपात्रं चीयते। एतदर्थं आवामेव योग्यौ। यस्य कस्यापि चयनं कुर्वन्तु सर्वसम्मत्या।

सिंह:- तूष्णीं भव भो:! युवामपि मत्सदृशौ भक्षकौ न तु रक्षकौ। एते वन्यजीवा: भक्षकं रक्षकपदयोग्यं न मन्यन्ते। अत एव विचारविमर्श: प्रचलति।

बक:- सर्वथा सम्यग् उक्तं सिंहमहोदयेन। वस्तुत: एव सिंहेन बहुकालपर्यन्तं शासनं कृतम्। परमधुना तु कोऽपि पक्षी एव राजेति निश्चेतव्यम्। अत्र तु संशीतिलेशस्यापि अवकाश: एव नास्ति।

अ. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) ½ x2=1

क) वनराजपदाय किं चीयते?

ख) यस्य कस्यापि किं करणीयम्?

ग) अत एव क: प्रचलति?

आ. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्) 1 x2=2

क) के भक्षकं रक्षकपदयोग्यं न मन्यन्ते?

ख) सर्वथा कथम् उक्तं सिंहमहोदयेन?

ग) वस्तुत: एव केन बहुकालपर्यन्तं शासनं कृतम्?

इ. निर्देशानुसारम् उत्तरत- (केवलं प्रश्नद्वयम्) 1 x2=2

क) “इदानीम्”-इत्यर्थे अत्र किं पदं प्रयुक्तम् ?

ख) "एते वन्यजीवा:”-अनयो: विशेष्यपदं किम्?

ग) "अयोग्यौ”- इत्यस्य कः विपर्ययः अत्र प्रयुक्तः?

15. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत-( **केवलं प्रश्नचतुष्टयम्**) 1x4=4

क) कवि: <u>मानवस्य</u> जीवनस्य कामनां करोति।

ख) <u>कृषीवल:</u> क्रुद्ध: अभवत्।

ग) व्याघ्र: <u>शृगालेन</u> सहितं पुन: आगच्छत्।

घ) न्यायाधीश: <u>अतिथिं</u> ससम्मानं मुक्तवान्।

ङ) मनुष्य: आत्मन: <u>श्रेय:</u> इच्छति।

16. मञ्जूषातः समुचितपदानि चित्वा अधोलिखितश्लोकस्य अन्वयं पूरयित्वा पुनः लिखत- 1x4=4

आचार: प्रथमो धर्म: इत्येतद् विदुषां वच:।
तस्माद् रक्षेत् सदाचारं प्राणेभ्योऽपि विशेषत:॥

अन्वयः -------------------- (i) प्रथमो धर्म: इति एतत् -----------(ii) वच:,
तस्मात् --------------(iii ) अपि सदाचारं -------------(iv ) रक्षेत् ॥

मञ्जूषा

| |
|---|
| प्राणेभ्य:, आचार:, विशेषत:, विदुषाम् |

अथवा

मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत- 1x4=4

विचित्रे खलु संसारे नास्ति किञ्चित् निरर्थकम्।
अश्वश्चेद् धावने वीर: भारस्य वहने खर:॥

<u>**भावार्थः**</u> - अस्मिन् विचित्रे -------------- (i ) किञ्चिदपि वस्तु -------------- (ii ) नास्ति। यत: यदा धावनस्य कार्यं भवति तदा --------------------- (iii) प्रयोग: क्रियते ,परन्तु यदा भारवहनस्य ---------------- (iv) क्रियते तदा खर: उपयोगी भवति॥

मञ्जूषा

| |
|---|
| संसारे, अश्वस्य, कार्यम्, निरर्थकम् |

17. अधोलिखित कथांशं समुचित-क्रमेण लिखत- ½ x8=4

क) ग्रामवासिन: वराकं अतिथिमेव चौरं मत्वा अभर्त्सयन्।

ख) चौरस्य पादध्वनिना अतिथि: प्रबुद्ध:।

ग) चौर: एव उच्चै: क्रोशितुम् आरभत।

घ) स: पुत्रं द्रष्टुं पदातिरेव प्राचलत्।

ङ) कश्चन निर्धन: वित्तम् उपार्जितवान्।

च) स: पुत्र: तत्रैव छात्रावासे निवसति स्म।

छ) तेन धनेन महाविद्यालये स्वपुत्रस्य प्रवेशं प्रापितवान्।

ज) एकदा स: पुत्र: रुग्ण: अभवत्।

18. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलं उचितार्थं चित्वा लिखत-
(केवलं प्रश्नत्रयम्) 1x3=3

i) समुद्रे वृष्टि: **वृथा** भवति ।

(क ) लाभ: (ख) तीव्र:

(ग) व्यर्थम् (घ) प्रयासेन

ii) सः **ऋषभः** क्षेत्रे पपात।

(क) काक: (ख) वृषभ:

(ग) शृगाल: (घ) सिंह:

iii) बुद्धिमती व्याघ्रं **वीक्ष्य** वदति।

(क) पठित्वा (ख) गीत्वा

(ग) अपसृत्य (घ) दृष्ट्वा

iv) स: निर्धन: **<u>भूरि</u>** परिश्रमं कृतवान् ।

(क) किञ्चित् (ख) दीर्घम्

(ग) अधिकम् (घ) लघु

केन्द्रीयविद्यालयसंगठनम् चेन्नै संभागः 2022-2023

कक्ष्या - दशमी

संस्कृतम् (कोड सङ्ख्या-122)

होराः - 3 होराः पूर्णाङ्काः - 80

उत्तरकुञ्चिका (ANSWER KEY)- 2

'क' खण्डः - अपठितावबोधनम् (10 अङ्काः)

1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -

अ. <u>एकपदेन उत्तरत-</u> (केवलं प्रश्नद्वयम्) 1 X2 = 2

(i) प्रातःकाल: (ii) प्रकाश: (iii) मधुरम्

आ. <u>पूर्णवाक्येन उत्तरत</u>- (केवलं प्रश्नद्वयम्) 2X2=4

(i) उद्यानेषु विभिन्नानि पुष्पाणि विकसन्ति।

(ii) यदा स्वच्छे आकाशे सूर्य: उदेति तदा अन्धकार: दूरं गच्छति।

(iii) भ्रमणशीला: प्रसन्ना: जना: उद्यानेषु भ्रमन्ति।

इ. उपयुक्तं शीर्षकं - 1

ई. यथानिर्देशम् उत्तरत (केवलं प्रश्नद्वयम्) 1 X 3 = 3

(i) (ख) मधुरम् (ii)(ग) प्रसन्ना: (iii) (घ) सूर्य: iv)(क) दूरम्

"ख' ' खण्डः रचनात्मकं कार्यम् (15 अङ्काः)

2. भवतः नाम दिवाकर:। भवान् रामजन्म-विद्यालय-छात्रावासे निवसति। भवत: माता रुग्णा अस्ति।तत्समाचारं ज्ञातुं पितरं प्रति पत्रं लिखति। तत्पत्रे रिक्तस्थानानि पूरयित्वा पुनः लिखत-

(i) रामजन्म-विद्यालय: (ii) सादरं प्रणामम् (iii ) कुशलम् (iv) मातु

(v) रुग्णा (vi) चिकित्सकेन (vii) कथितम् (viii) स्वास्थ्यम्
(ix) समीपे (x) आज्ञाकारी

3. प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत - 1 x 5 = 5

अर्थवत् व्याकरणशुद्ध्द-पञ्च-संस्कृतवाक्यानि।

अथवा

मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अहिकृत्य न्यूनातिन्यूनं पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत- 1 x 5 = 5

अर्थवत् व्याकरणशुद्ध्द-पञ्च-संस्कृतवाक्यानि।

4. अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत-

(केवलं वाक्यपञ्चकम्) 1x5=5

1. उद्यानं परित: वृक्षा: सन्ति।
2. गङ्गा भारतस्य जीवनदायिनी नदी भवति।
3. साधु-संगति: मार्गदर्शनं करोति |
4. मम भ्राता दशमी-कक्षायां पठति।
5. आवाम् क्रीडाव:।
6 प्रतिदिनं व्यायामं करोतु ।
7. संस्कृतं सर्वासां भाषाणां जनानी भवति।

"ग" खण्डः

अनुप्रयुक्तव्याकरणम् ( 25 अङ्काः)

5. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिविच्छेदं वा कुरुत –

( केवलं प्रश्नचतुष्टयम्) 1x4=4

i) यथाकथञ्चिदुभौ ii) क्रोध: हि iii) सुरभेरिमाम् iv) स्यान्न v) योजक: तु

6. अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत - ( केवलं प्रश्नचतुष्टयम्) 1x4=4

i)(ग) यानपङ्क्तय: ii)(ख) समयम् अनतिक्रम्य iii) क)स्थितप्रज्ञ:

iv)(ग) लवकुशौ v) (क) पक्षिराज:

7. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उत्तरं विकल्पेभ्यः चित्वा लिखत- ( केवलं प्रश्नचतुष्टयम्) 1x4=4

i)(ग) पाषाण + ङीप् ii) (ख) बुद्धिमती iii) (ग) महत्त्वम्

iv)(ग) लौकिकम् v) (ख) रमणीय+तल्

8. वाच्यानुसारम् उचितपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत- (केवलं प्रश्नत्रयम्) 1x3=3

(i) (ख) करोषि (ii)(ख) मया (iii)(ग) पुस्तकम् (iv)(क) पठामि

9. कालबोधकशब्दैः अधोलिखितकार्यक्रमं पूरयत- ( केवलं प्रश्नचतुष्टयम्) 1x4=4

(i) षड्वादने (ii) सपाद-अष्टवादने (iii) सार्ध-द्विवादन-पर्यन्तं

(iv) पादोन-त्रिवादने (v) पञ्च-वादन-पर्यन्तं

10. मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत- (केवलं प्रश्नत्रयम्) 1x3=3

(i) इदानीम् (ii) शनै: (iii) उच्चै: (iv) श्व:

11. अधोलिखितवाक्येषु रेखाङ्कित-अशुद्धिपदाय उचितपदं चित्वा वाक्यानि पुनः लिखत- (केवलं प्रश्नत्रयम्) 1x3=3

(i)(क) करोति स्म (ii)(ख) नीतिमान् (iii)(ख) अहम् (iv)(क) अपठम्

“घ” खण्डः

पठितावबोधनम्  (30 अङ्काः)

12. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत-

अ. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) ½ x2=1

क) आदेशम्  ख) आरक्षी  ग) अतीव कृशकाय:

आ. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्) 1 x2=2

क) भारवत: शवस्य स्कन्धेन वहनं तत्कृते दुष्करम् आसीत्।

ख) स: भारवेदनया क्रन्दति स्म।

ग) तस्य अभियुक्तस्य क्रन्दनं निशम्य आरक्षी मुदित:।

इ. निर्देशानुसारम् उत्तरत- (केवलं प्रश्नद्वयम्) 1 x2=2

क) देहम्  ख) सुपुष्टदेह:  ग) स:/अभियुक्त:

13. अधोलिखितं पद्यांशं पठित्वाप्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत-

अ. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) ½ x2=1

क) मृगै:  ख) गोभि:  ग) तुरङ्गै:

आ. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्) 1 x2=2

क) मूर्खाश्च मूर्खै: सह सङ्गम् अनुव्रजन्ति।

ख) सुधिय: सुधीभि: सह सङ्गम् अनुव्रजन्ति।

ग) समान-शील-व्यसनेषु सख्यं भवति।

इ. निर्देशानुसारम् उत्तरत- (केवलं प्रश्नद्वयम्) 1 x2=2

क) अनुव्रजन्ति  ख) मृगा:  ग) मूर्खा:

14. अधोलिखितं नाट्यांशं पठित्वाप्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत-

अ. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) ½ x2=1

क) सुपात्रम् ख) चयनम् ग) विचारविमर्श:

आ. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्) 1 x2=2

क) एते वन्यजीवा: भक्षकं रक्षकपदयोग्यं न मन्यन्ते।

ख) सर्वथा सम्यग् उक्तं सिंहमहोदयेन।

ग) वस्तुत: एव सिंहेन बहुकालपर्यन्तं शासनं कृतम्।

इ. निर्देशानुसारम् उत्तरत- (केवलं प्रश्नद्वयम्) 1 x2=2

क) अधुना ख) वन्यजीवा: ग) योग्यौ

15. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत-( केवलं प्रश्नचतुष्टयम्) 1x4=4

क) कस्य ख) क: ग) केन घ) कम् ङ) किम्

16. मञ्जूषातः समुचितपदानि चित्वा अधोलिखितश्लोकस्य अन्वयं पूरयित्वा पुनः लिखत- 1x4=4

<u>अन्वयः</u> (i) आचार: (ii) विदुषाम् (iii ) प्राणेभ्य: (iv ) विशेषत:

अथवा

मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत- 1x4=4

**<u>भावार्थः</u>** - (i )संसारे (ii )निरर्थकम् (iii) अश्वस्य (iv)कार्यम्

17. अधोलिखित कथांशं समुचित-क्रमेण लिखत- ½ x8=4

ङ) कश्चन निर्धन: वित्तम् उपार्जितवान्।

छ) तेन धनेन महाविद्यालये स्वपुत्रस्य प्रवेशं प्रापितवान्।

च) स: पुत्र: तत्रैव छात्रावासे निवसति स्म।

ज) एकदा स: पुत्र: रुग्ण: अभवत्।

घ) स: पुत्रं द्रष्टुं पदातिरेव प्राचलत्।

ख) चौरस्य पादध्वनिना अतिथि: प्रबुद्ध:।

ग) चौर: एव उच्चै: क्रोशितुम् आरभत।

क) ग्रामवासिन: वराकं अतिथिमेव चौरं मत्वा अभर्त्सयन्।

18. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलं उचितार्थं चित्वा लिखत-
(केवलं प्रश्नत्रयम्) 1x3=3

i)(ग) व्यर्थम्  ii)(ख) वृषभ:  iii)(घ) दृष्ट्वा  iv)(ग) अधिकम्

**केन्द्रीय विद्यालय: - चेन्नई संभाग:**

**आदर्श-प्रश्नपत्रम् (3)- 2022-23**

**कक्षा: दशमी**

**विषय: संस्कृतम्**

**समय:-3 होराः**

**पूर्णांका:-80**

---

सामान्यनिर्देशा:-

1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 9 पृष्ठानि मुद्रितानि सन्ति ।

2. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्नाः सन्ति ।

3. अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।

4. प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।

5. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः

6. प्रश्नस्य क्रमाङ्कः प्रश्नपत्रानुसारम् एव लेखनीयः ।

7. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि ।

8. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः ।

1. **खण्ड- क अपठित-अवबोधनम्     10अङ्का:**
2. **खण्ड- ख  रचनात्मक-कार्यम्       15)अङ्का:**
3. **खण्ड- ग  अनुप्रयुक्त-व्याकरणम्   25   )अङ्का:**
4. **खण्ड- घ पठित-अवबोधनम्       30अङ्का:**

---

**खण्ड:- कपठितांश-अवबोधनम् 10 अंका:**

1. अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तान् प्रश्नान् संस्कृतेन उत्तरत ।

देशाटनस्य बहवः लाभाः सन्ति। एतेन वयं सर्वेषां देशानां राजनैतिक, सामाजिक, सांस्कृतिकं च रूपं ज्ञातुं समर्थाः भवामः। अद्यतनीयो व्यापारः अपि प्रायशः अन्ताराष्ट्रीयः व्यापारः सञ्जातः कस्मिन् देशे कदा किं च सुलभम् एतस्य ज्ञानं सर्वथा अनिवार्यम्। बहवः एतादृशाः अपरिपक्वाः पदार्थाः सन्ति,येषां प्राप्तिः पदार्थानां निर्माणायअनिवार्या अस्ति। अतः तान् पदार्थान् –प्राप्तुं देशाटनं कर्तव्यमेव। देशाटनेन जनानां ज्ञानं पूर्णं भवति तस्मिन् परिपक्वता स्थिरता च आगच्छतः देशाटनेन जनाः प्रफुल्लताम् आत्मसन्तोषञ्च अनुभवन्ति ।आभ्यां तेषाम् उन्नतिः वर्धते|

अ. एकपदेन उत्तरत|(केवलं प्रश्नद्वयम्)                1x2=2

(i) देशाटनस्य कति लाभाः सन्ति?

(ii) अद्यतनीयो व्यापारः कीदृशः सञ्जातः?

(iii) केषां पदार्थानां प्राप्तिः अनिवार्या अस्ति?

आ. पूर्णवाक्येन उत्तरत|(केवलं प्रश्नद्वयम्)          [2X2=4]

(i) देशाटनेन वयं किं ज्ञातुं समर्थाः भवामः?

(ii) अपरिपक्वानां पदार्थानां प्राप्तिः कथम् अनिवार्या अस्ति?

(iii)देशाटनेन कस्मिन् परिपक्वता स्थिरता च आगच्छत:?

इ. अस्य गद्यांशस्य उचितं शीर्षकं लिखत।  [1]

ई. निर्देशानुसारम् उत्तरत| (केवलं प्रश्नत्रयम्)  [1X3=3]

(i) 'अपरिपक्वाः पदार्थाः' इति पदयोः विशेषणं किम्?

(क) पदार्थाः  (ख) अपरिपक्वाः  (ग) पदार्थः  (घ)अपरिपक्वः

(ii)देशाटनस्य बहवः लाभाः सन्ति ।अत्र क्रियापदं किमस्ति?

(क) बहवः  (ख) लाभाः  (ग) सन्ति  (घ) देशाटनस्य

(iii) 'अस्ति' इति क्रियायाः कर्तृपदं किम्?

(क) अनिवार्या  (ख) प्राप्तिः  (ग) निर्माणाय  (घ)पदार्थानाम्

(iv) 'दुर्लभम्' इत्यस्य पदस्य कः विपर्ययः अत्र प्रयुक्तः?

(क) सुलभम्  (ख) अलभम्  (ग) निर्लभम्  (घ) उपलभम्

## खण्ड:-ख  रचनात्मककार्यम्(15 अंका:)

2.भवान् देवव्रतशर्मा स्वगृहस्य समीपं जलसंरक्षणं कर्तुम् इच्छति। एतदर्थं भवान् नगरनिगमस्य आयुक्तं सहायतायै पत्रं लिखति। मञ्जूषायाः समुचितानि पदानि नीत्वा स्वपत्रं पूरयतु भवान्-  [½X10=5]

…(i)……….

पञ्जाबप्रान्तम्

दिनाङ्कः…..

सेवायाम्,

श्रीमन् आयुक्तमहोदय !

……….(ii)………

मोहालीनगरम्

**विषय:- जलसंरक्षणार्थं शासनस्य सहायता- याचनम्।**

महोदय,

अहं.....(iii)···..सप्तमे खण्डे (सैक्टर) निवसामि। इदानीम् अस्य क्षेत्रस्य जनाः···..(iv)···..अनुभवं कुर्वन्ति। भविष्ये अस्याः समस्यायाः···..(v) ······कर्तुम् अहं स्वगृहे जलस्य······.(vi)···.. कर्तुम् इच्छामि अत: शासनस्य······..(vii)······ इच्छामि । भवान् नगरनिगमात् धनरूपे तकनीकरूपे च यां सहायतां कर्तुं·········..(viii)·········अस्ति , कृपया शीघ्रमेव लिखतु। अहं भवतां .......(ix)···....... भविष्यामि।

भवतां पत्रोत्तरं प्रतीक्ष्यमाणः।

भवदीयः·······..(x)·······..
गृहसंख्या16, खण्ड: 7
मोहालीनगरम्

मञ्जूषा

| |
|---|
| आभारी, संरक्षणम् , मोहालीनगरम् , समर्थ:,देवव्रत: , अत्र,सहायताम् , नगरनिगम:,समाधानम् ,जलाभावस्य |

3. प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत । [1 x5=5]



| |
|---|
| परिवारस्य , जनाः , दीपावली , मन्यन्ते , विस्फोटः , दीपान् , प्रसन्नाः , भारतस्य , नूतनवस्त्राणि, पिता , माता |

अथवा

मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य न्यूनातिन्यूनं पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत-
[1x5=5]

'वृक्षारोपणम्'

| | |
|---|---|
| मञ्जूषा- | वृक्षाणाम् , फलानि, छाया, परोपकारः , वातावरणम्, प्रदूषणम् , अम्लजानम्, पथिकाः, जलसेचनम् , नागरिकस्य , कर्तव्यः ,आरोपणम् |

4. अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत- (केवलं वाक्यपञ्चकम्)
[1x5=5]

क) मैं दिल्ली से चेन्नई जाऊँगा । / I will go to Chennai from Delhi.

ख) आप दोनों किस विद्यालय में पढते हैं ?  / In which school do you both study?

ग) वर्षाऋतु में घर से बाहर जाना उचित नहीं है । / Going out of the home is not good in Rainy season.

घ) हमेशा सत्य के मार्ग पर चलो । / Go always on true path.

ङ) मन्दिर के सामने एक उद्यान है । / A garden is there in front of Temlpe.

च) राम रावण के लिये सक्षम थे । / Rama was enough for Ravana.

## खण्ड:-ग अनुप्रयुक्तव्याकरणम्  (25 अंका: )

**5. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत । (केवलं प्रश्नचतुष्टयम्)** [1x4=4]

(i) दुर्दान्तै: दशनै: स्यान्न एव जनग्रसनम् ।

(ii)पुन: +तौ  घटनाया: विषये वक्तुम् आदिष्टौ।

(iii)युष्मत् + दर्शनात् कुशलमिव।

(iv) कथम् अन्य: कोऽपि राजा भवितुम् अर्हति

(v)एक: + एव खग: मानी वने वसति।

**6. अधोलिखितवाक्येषु रेखाङ्कितपदेषु समासं विग्रहं वा प्रदत्तविकल्पेभ्य: चित्वा लिखत । (केवलं प्रश्नचतुष्टयम्)** [1 x 4 =4]

(i)कालायसचक्रम् महानगरमध्ये अनिशं चलति।

(क) महानगरं मध्ये (ख) महानगराणां मध्ये (ग) महानगरस्य (घ)महानरान् मध्ये

(ii)विमूढधी: अपक्वं फलं खादति।

(क) विमूढा धी: यस्य स: (ख)विमूढा: धी: (ग) विमूढा: धी: यस्या: (घ)विमूढं धी:

(iii)वनस्य समीपम् एका नदी वहति।

(क) वनसमीपे (ख) उपवनम् (ग) समीपवनम् (घ)वने

(iv)बुद्धीमती सपुत्रं पितुर्गृहम् अग्च्छत्।

(क) पुत्रेण विना (ख)पुत्रेण सहितम् (ग)पुत्रम् अनतिक्रम्य (घ)पुत्रं अनु

(v)व्याघ्र: च चित्रक: च नदीजलं पातुं आगच्छत:।

(क) व्याघ्र: चित्रक: च (ख)व्याघ्र: च चित्रक: च (ग)व्याघ्र: चित्रक:
(घ)व्याघ्रचित्रकयो:

**7. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्य: चित्वा लिखत । (केवलं प्रश्नचतुष्टयम्)** [1 x 4 =4]

(i) विद्वांस: एव अस्मिन् लोके चक्षुष्मन्त: प्रकीर्तिता:।

(क) चक्षुष् + मन्त: (ख) चक्षुष् + मतुप् (ग) चक्षुष् + मान् (घ)चक्षुष +मन्

(ii) एषा सृष्टि: रमणीय +टाप् हि भवति।

(क) रमणीया (ख) रमणीयम् (ग) रमणीयताम् (घ)रमणीय

(iii)यथा चित्ते अवक्रता अस्ति।

(क) अवक्र + तसिल्(ख) अवक्र + तल् (ग) अवक्र + ता (घ)अवक्र + त

(iv) राजसिंहस्य पत्नी बुद्धिमती आसीत्।

(क) बुद्धिमत् + ङीप्    (ख) बुद्धि + मती   (ग) बुद्धिमान् + ई    (घ)बुद्धि +मन्

(v)अद्य <u>सप्ताह + ठक्</u> अवकश: अस्ति।

(क) साप्ताहिकम्    (ख)साप्ताहिक:    (ग) साप्ताहिकी
(घ)साप्ताहिकौ

8.वाच्यानुसारम् उचितपदै: रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुन: लिखत।

(केवलं प्रश्नत्रयम्)    [1 x 3=3]

नरेश: - त्वं किं पश्यसि?

सुरेश: - मया पाठ्यक्रम: .......i……...|

(क) दृश्यन्ते    (ख)दृश्ये    (ग) दृश्यते    (घ)दृश्यसे

नरेश: - किं विद्यालये …...ii……  पाठ्यपुस्तकानि सम्यग् न पाठयन्ति?

(क) अध्यापका:    (ख)अध्यापक:    (ग)अध्यापकेन
(घ)अध्यापकै:

सुरेश:- न। अध्यापकै: पाठ्यपुस्तकानि सम्यग्  .........iii……..|

(क) पाठ्यन्ते    (ख)पाठ्यते    (ग)पाठ्येते    (घ)पाठ्यसे

नरेश: - आम् ! मम .............. अपि सम्यग् पाठ्यते।

(क) शिक्षिकया    (ख)शिक्षिका    (ग)शिक्षिकानाम्    (घ)शिक्षिका

9.कालबोधकशब्दै: अधोलिखित-दिनचर्यां पूरयत_ (केवलं प्रश्नचतुष्टयम्)  [1 x 4 =4]

(क) छात्रै: ...............(5:00)वादने पाठ: कण्ठस्थी कर्तव्य:।

(ख) तत्पश्चात् .............(7:15) वादने प्रातराशम् खादनीयम्।

(ग) ...............(7:45) वादने छात्र: विद्यालय: गन्तव्य:।

(घ)मध्याह्ने तै: विद्यालयात् …………(1:30) वादने गृहम् आगन्तव्यम्।

(ङ) सायंकाले ................(6:00) वादने पठनाय उपवेशनीयम्।

**10. मञ्जूषाप्रदत्तै: उचितै: अव्ययपदै: अधोलिखितेषु वाक्येषु रिक्तस्थानानि पूरयत ।**

(केवलं प्रश्नत्रयम्) [1 x3 =3]

(क) अहम् _________________ ग्रामं अगच्छम् ।

(ख) छात्रा: ________________ अधावन् ।

(ग) _______________ कः समयः ?

(घ) _______________ विदधीत न क्रियाम् ।

| |
|---|
| सहसा, सम्प्रति, इतस्ततः , ह्य: |

**9. अधोलिखितवाक्येषु रेखाङ्कित-अशुद्धं पदाय उचितपदं चित्वा वाक्यानि लिखत ।**

(केवलं प्रश्नत्रयम्) [1 x3 =3]

(क) अहं छात्र: अस्ति ।

क)असि ख) अस्मि ग)स्म: घ)स्व:

(ख) प्रधानमन्त्री श्व: काश्मीरम् अगच्छत् ।

क)गमिष्यति  ख) गच्छति   ग)गच्छेयम्  घ)गमति

(ग) मम चत्वार: मित्राणि सन्ति ।

क)चत्वारि  ख)चतुर्षु  ग)चतस्र:  घ)चतुर

(घ) बालक: ग्राम: प्रति गच्छति।

क)ग्रामम्  ख) ग्रामा:  ग)ग्रामात्  घ)ग्राम:

**खण्ड: घ- पठितावबोधनम् (30अंका:)**

**10. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानामुत्तराणि संस्कृतेन लिखत -  5**

"बहून्यपत्यानि मे सन्तीति सत्यम् तथाप्यहं एतस्मिन् पुत्रे विशिष्य आत्मवेदनामनुभवामि। यतोहि अयमन्येभ्यो दुर्बलः। सर्वेष्वपत्येषु जननी तुल्यवत्सला एव। तथापि दुर्बले सुते मातुः अभ्यधिका कृपा सहजैव" इति। सुरभिवचनं श्रुत्वा भृशं विस्मितस्याखण्डलस्यापि हृदयमद्रवत्। स: च तामेवमसान्त्वयत्-" गच्छ वत्से ! सर्वं भद्रं जायेत।"

अचिरादेव चण्डवातेन मेघरवैश्च सह प्रवर्षः समजायत लोकानां पश्यताम् एव सर्वत्र जलोपप्लवः सञ्जातः। कृषकः हर्षातिरेकेण कर्षणाविमुखः सन् वृषभौ नीत्वा गृहमगात्।

I. एकपदेन उत्तरत-  (केवलं प्रश्नद्वयम्)  [½X2=1]

(i) सर्वेष्वपत्येषु जननी कीदृशी भवति?

(ii) कुत्र जलोपप्लवः सञ्जातः?

(iii) कीदृशे सुते मातु: अभ्यधिका कृपा अस्ति?

II. पूर्णवाक्येन उत्तरत-(केवलं प्रश्नद्वयम्)  [1X2=2]

(i) कस्य वचनं श्रुत्वा भृशं विस्मितस्याखण्डलस्यापि हृदयमद्रवत्?

(ii) सः आखण्डलः कथं ताम् असान्त्वयत्?

(iii) का तुल्यवत्सला?

III. निर्देशानुसारम् उत्तरत| (केवलं प्रश्नद्वयम्) [1X2=2]

(i) 'अनुभवामि' इति क्रियापदस्य कर्तृपदं गद्यांशे किं प्रयुक्तम्?

(ii) 'जनकः' इति पदस्य विपर्ययपदं गद्यांशे किं प्रयुक्तम्?

(iii) "जननी तुल्यवत्सला" – अनयो: पदयो: विशेषणं किम्?

**11. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानामुत्तराणि संस्कृतेन लिखत - 5**

विचित्रे खलु संसारे नास्ति किञ्चिन्निरर्थकम्।

अश्वश्चेद् धावनेवीरः भारस्य वहने खरः॥

I. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) [½X2=1]

(i) संसारः कीदृशः अस्ति?

(ii) कुत्र किञ्चित् निरर्थकं न अस्ति?

(iii)खर: कस्मिन् वीर:?

II. पूर्णवाक्येनउत्तरत- (केवलं प्रश्नद्वयम्) [1X2=2]

(i) अश्वः च कस्मिन् वीर: अस्ति?

(ii)संसारे कीदृशं वस्तु न अस्ति?

(iii)संसार: किमर्थं विचित्र: इति कथित:?

III. निर्देशानुसारम् उत्तरत। -(केवलं प्रश्नद्वयम्) [1X2=2]

(i) 'संसारे' इति पदस्य विशेषण पदं किम्?

(ii) 'सार्थकम्' इति पदस्य विपर्ययपदं किमस्ति?

(iii) “हयः” – इति पदस्य पर्यायपदं पद्यांशे किं प्रयुक्तम्?

**12. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानामुत्तराणि संस्कृतेन लिखत -5**

(सिहासनस्थः रामः ततः प्रविशतः विदूषकेनोपदिश्यमानमार्गौ तापसौ कुशलवौ)

विदूषकः- इत इत आर्यौ!

उभौ -(रामम् उपसृत्य प्रणम्य च) अपि कुशलं महाराजस्य?

रामः-युष्मदर्शनात् कुशलमिव भवतोः किं वयमत्र कुशलप्रश्नस्यभाजनम् एव,न पुनरतिथिजनसमुचितस्य कण्ठाश्लेषस्य। (परिष्वज्य) अहो हृदयग्राही स्पर्शः। (आसनार्धमुपवेशयति)

उभौ -राजासनं खल्वेतत्,न युक्तमध्यासितुम्।

रामः -सव्यवधानं न चारित्रलोपाय। तस्मादङ्कं व्यवहितमध्यास्यतां सिंहासनम्। (अङ्कमुपवेशयति)

उभौ -(अनिच्छां नाटयतः) राजन् अलमतिदाक्षिण्येन।

रामः -अलमतिशालीनतया।

I. एकपदेन उत्तरत- केवलं)प्रश्नद्वयम्( [½X2=1]

(i) सिंहासने कः स्थः?

(ii) रामः कौ अङ्कमुपवेशयति?

(iii) कथम् उपवेशनं चारित्रलोपाय न भवति?

II. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्) [1X2=2]

(i) कयोः स्पर्शः रामाय हृदयग्राही आसीत्?

(ii)लवकुशौ केन उपदिश्यमानमार्गौ प्रविशतः?

(iii)रामः लवकुशं कुत्र उपवेशयति?

III. निर्देशानुसारम् उत्तरत। (केवलं प्रश्नद्वयम्) [1X2=2]

(i) अत्र 'उभौ' इति पदं काभ्यां प्रयुक्तम्?-

(ii) संवादे 'अकुशलम्' इत्यस्य पदस्य कः विपर्ययः आगतः?

(iii) "नाटयतः" – अस्य क्रियापदस्य कर्तृपदं किं प्रयुक्तम्?

**13. रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत ।** (केवलं प्रश्नचतुष्टयम्[**1 x 4 =4**]

(क) शकटीयानं <u>कज्जलमलिनं</u> धूमं मुञ्चति ।

(ख) एवमेव <u>भवन्तौ</u> गायन्तौ।

(ग) <u>गुणी</u> गुणं वेत्ति।

(घ)<u>पुत्रस्य</u> दैन्यं दृष्ट्वा अहं रोदिमि।

(ङ)भृंगाः <u>रसालमुकुलानि</u> समाश्रयन्ते।

**14. मञ्जूषात: समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयित्वा पुन: लिखत।**[1 x 4=4]

(क) सेवितव्यो महावृक्ष: फलच्छायासमन्वित: ।

यदि दैवात् फलं नास्ति छाया केन निवार्यते ॥

अन्वय: - फलच्छायासमन्वित: (i) ___________ सेवितव्य: । (ii) ___________ यदि फलं (iii) ________ (वृक्षस्य) (iv) __________ केन निवार्यते ।

मञ्जूषा

| |
|---|
| छाया , महावृक्ष: , दैवात् , नास्ति |

अथवा

मञ्जूषाया: साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुन: लिखत।–

पिता यच्छति पुत्राय बाल्ये विद्याधनं महत्।

पिताऽस्य किं तपस्तेपे इत्युक्तिस्तत्कृतज्ञता ॥

भावार्थ: - बाल्ये काले स्वपुत्राय ......i….. दातुं पिता अतिकष्टं सहमान: सर्वविधं तप: कृत्वा अपि स: .......ii….. शिक्षयितुं यतते। यदि तस्य पुत्र: एतन्मात्रम् एव स्मरेत् .....iii…. तस्मै (विद्यादानाय) महत् तप: अकरोत्, इयम् ......iv….. एव तस्य पुत्रस्य कृतज्ञतां प्रकटयति।

मञ्जूषा

| |
|---|
| उक्ति: , स्वसन्ततिम् , पिता ,विद्याधनम् |

**15. अधोलिखित-कथांशं समुचित-क्रमेण लिखत-** [$^1/_2$ x 8 =4]

(क) कथम् एकैकशः व्याघ्रभक्षणाय कलहं कुरुथः?

(ख) कश्चित्धूर्तः शृगालः हसन् अवदत्।

(ग) त्वं मानुषादपि बिभेषि?

(घ) तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता।

(ङ) भवान् कुतः भयात् पलायितः?

(च) तौ          एव विभज्य भुज्यताम्।

(छ) व्याघ्रः भयाकुलचित्तो नष्टः।

(ज) बुद्धिमती व्याघ्रजाद्भयात् पुनरपि मुक्ताऽभवत्।

**16. अधोलिखितवाक्येषु रेखांकितपदानां प्रसंगानुकूलम् उचितार्थं चित्वा लिखत -** (केवलं प्रश्नचतुष्टयम्)                                                    [1x 3 =3]

(i)अहमत्र भवतो: जनकं नामतो वेदितुमिच्छामि।

क)पुत्रम्    ख) गुरुम्    ग)पितरम्    घ)जननीम्

(ii)सा धरायां प्रथमवारमेव अवतरितवती।

क)गगने    ख) मेघे    ग)जले    घ)भूमौ

(iii)तयो: एक: वृषभ: दुर्बल: आसीत्।

क)धेनु:    ख) काक:    ग)कृषक:    घ)ऋषभ:

(iv)दैवगति: विचित्रा भवति।

क)सुखदा    ख) अद्भुता    ग)दु:खदा    घ)कल्याणप्रदा

**केन्द्रीय विद्यालय: - चेन्नई संभाग:**

**उत्तरकुञ्चिका** (3)-2022-23

**कक्षा: दशमी**

**विषय: संस्कृतम्**

**समय:-3 होराः** **पूर्णांका:-80**

---

**खण्ड:- कपठितांश-अवबोधनम् 10 अंका:**

1. अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तान् प्रश्नान् संस्कृतेन उत्तरत ।

अ. एकपदेन उत्तरत|(केवलं प्रश्नद्वयम्)

(i) बहव: (ii) अन्ताराष्ट्रीय: (iii) अपरिपक्वानाम्

आ. पूर्णवाक्येन उत्तरत|(केवलं प्रश्नद्वयम्)

(i) देशाटनेन वयं सर्वेषां देशानां राजनैतिक, सामाजिक, सांस्कृतिकं चरूपं ज्ञातुं समर्थाः भवामः।

(ii) अपरिपक्वानां पदार्थानां प्राप्तिः पदार्थानां निर्माणाय अनिवार्या अस्ति।

(iii) देशाटनेन जनानां ज्ञाने परिपक्वता स्थिरता च आगच्छतः।

इ. देशाटनम्

ई. निर्देशानुसारम् उत्तरत| (केवलं प्रश्नत्रयम्) [1X3=3]

(i) (ख) अपरिपक्वाः, ii.(ग) सन्ति ,(iii) (ख) प्राप्तिः (iv) (क) सुलभम्

## **खण्ड:-ख   रचनात्मककार्यम्(15 अंका:)**

2. पत्रलेखनम्।

| |
|---|
| i.मोहालीनगरम् , ii.नगरनिगम:, ,iii. अत्र, iv.जलाभावस्य, v.समाधानम्  ,vi.संरक्षणम् ,vii.सहायताम् , viii.समर्थ:, ix.आभारी, x.देवव्रत: |

3. प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत । [1 x5=5]      उचितपञ्चवाक्यानि लेखनीयानि।

अथवा

मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य न्यूनातिन्यूनं पञ्चभि: संस्कृतवाक्यै: एकम् अनुच्छेदं लिखत-

[1x5=5]    उचितपञ्चवाक्यानि लेखनीयानि।

4. अधोलिखितानि  वाक्यानि संस्कृतभाषया अनूद्य लिखत- (केवलं वाक्यपञ्चकम्) [1x5=5]

क) अहम् दिल्लीत: चेन्नईं गच्छामि।

ख) युवां कस्मिन् विद्यालये पठथ:।

ग) वर्षा-ऋतौ गृहात् बहिर्गमनम् उचितं न अस्ति।

घ) सदा सत्यमार्गे चल।

ङ) देवालयस्य पुरत: एकम् उद्यानम् अस्ति।

च) राम: रावणाय सक्षम: अस्ति।

## खण्ड:-ग अनुप्रयुक्तव्याकरणम् (25 अंका: )

**5. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत। (केवलं प्रश्नचतुष्टयम्)** [1x4=4]

(i) स्यात् + न ,(ii)पुनस्तौ ,(iii)युष्मद् दर्शनात् ,(iv) क: + अपि ,(v)एक + एव

**6. अधोलिखितवाक्येषु रेखाङ्कितपदेषु समासं विग्रहं वा प्रदत्तविकल्पेभ्य: चित्वा लिखत। (केवलं प्रश्नचतुष्टयम्)** [1 x 4 =4]

(i) (ख) महानगराणां मध्ये ,(ii)(क) विमूढा धी: यस्य स: ,(iii)(ख) उपवनम् ,(iv)(ख)पुत्रेण सहितम् ,(v) (ख)व्याघ्र: च चित्रक: च

**7. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्य: चित्वा लिखत। (केवलं प्रश्नचतुष्टयम्)** [1 x 4 =4]

(i) (ख) चक्षुष् + मतुप् ,(ii) (क) रमणीया,(iii) (ख) अवक्र + तल् (iv) (क) बुद्धिमत् + ङीप्,(v) (ख)साप्ताहिक:

8.वाच्यानुसारम् उचितपदै: रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुन: लिखत।

(केवलं प्रश्नत्रयम्) [1 x 3=3]

i.(ग) दृश्यते ,ii.(क) अध्यापका: ,iii.(क) पाठ्यन्ते,iv.(ख)शिक्षिका

9.कालबोधकशब्दै: अधोलिखित-दिनचर्यां पूरयत_ (केवलं प्रश्नचतुष्टयम्) [1 x 4 =4]

(क) पञ्च,(ख) सपादसप्त,(ग) पादोन-सप्त,(घ)सार्ध-एक,(ङ) षड्

**10. मञ्जूषाप्रदत्तै: उचितै: अव्ययपदै: अधोलिखितेषु वाक्येषु रिक्तस्थानानि पूरयत**[1 x3 =3]

(क) ह्य:,(ख) इतस्ततः,(ग) सम्प्रति,(घ) सहसा

**9. अधोलिखितवाक्येषु रेखाङ्कित-अशुद्धं पदाय उचितपदं चित्वा वाक्यानि लिखत ।** [1 x3 =3]

(क) ख) अस्मि ,(ख) क)गमिष्यति  ,(ग) क)चत्वारि ,(घ) क)ग्रामम्

**खण्ड: घ- पठितावबोधनम् (30अंका:)**

**10. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानामुत्तराणि संस्कृतेन लिखत ।**

I. एकपदेन उत्तरत-   (केवलं प्रश्नद्वयम्)                                      [½X2=1]

(i)तुल्यवत्सला ,(ii) सर्वत्र,(iii) दीने

II. पूर्णवाक्येन उत्तरत-(केवलं प्रश्नद्वयम्)                                  [1X2=2]

(i) सुरभेः वचनं श्रुत्वा भृशं विस्मितस्याखण्डलस्यापि हृदयमद्रवत्।

(ii) सः आखण्डलः -" गच्छ वत्से ! सर्वं भद्रं जायेत।" इति ताम् असान्त्वयत्।

(iii) जननी तुल्यवत्सला।

III. निर्देशानुसारम् उत्तरत।  (केवलं प्रश्नद्वयम्)          [1X2=2]

(i) अहम् ,(ii) जननी ,(iii) तुल्यवत्सला

**11. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानामुत्तराणि संस्कृतेन  लिखत ।**

I. एकपदेन उत्तरत-   (केवलं प्रश्नद्वयम्)                                      [½X2=1]

(i) विचित्र:,(ii) संसारे,(iii)धावने

II. पूर्णवाक्येनउत्तरत-        (केवलं प्रश्नद्वयम्)                          [1X2=2]

(i) अश्वः च धावने वीर: अस्ति।

(ii)संसारे निरर्थकं वस्तु न अस्ति।

(iii)संसार: विचित्र: इति कथित: यत: हि अत्र किञ्चिदपि निरर्थकं न अस्ति।

III. निर्देशानुसारम् उत्तरत| -(केवलं प्रश्नद्वयम्) [1X2=2]

(i) विचित्रे ,(ii) निरर्थकम्,(iii) अश्व:

**12. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानामुत्तराणि संस्कृतेन लिखत ।**

I. एकपदेन उत्तरत- केवलं)प्रश्नद्वयम्( [½X2=1]

(i) रामः,(ii) लवकुश,(iii) सव्यवधानम्

II. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्) [1X2=2]

(i) लवकुशयो: स्पर्शः रामाय हृदयग्राही आसीत्।

(ii)लवकुशौ विदूषकेन उपद्दिश्यमानमार्गौ प्रविशत:।

(iii)राम: लवकुशं अङ्कम् उपवेशयति।

III. निर्देशानुसारम् उत्तरत|(केवलं प्रश्नद्वयम्) [1X2=2]

(i) लवकुशाभ्याम्,(ii) कुशलम्,(iii)उभौ / लवकुशौ

**13. रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत ।**

(केवलं प्रश्नचतुष्टयम्) **[1 x 4 =4]**

(क) कीदृशम्,(ख) कौ,(ग) क: ,(घ)कस्य्,(ङ)कानि

**14. मञ्जूषात: समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयित्वा पुन: लिखत।**[1 x 4=4]

(क) महावृक्षः , , दैवात् , नास्ति , छाया

मञ्जूषाया: साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत।–

विद्याधनम्, स्वसन्ततिम् , पिता, उक्तिः

**15. अधोलिखित-कथांशं समुचित-क्रमेण लिखत-** [$^1/_2$ x 8 =4]

(क) कथम् एकैकशः व्याघ्रभक्षणाय कलहं कुरुथः? ii

(ख) कश्चित्धूर्तः शृगालः हसन् अवदत्। v

(ग) त्वं मानुषादपि बिभेषि? vii

(घ) तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता। i

(ङ) भवान् कुतः भयात् पलायितः? vi

(च) तौ एव विभज्य भुज्यताम्। iii

(छ) व्याघ्रः भयाकुलचित्तो नष्टः। iv

(ज) बुद्धिमती व्याघ्रजाद्भयात् पुनरपि मुक्ताऽभवत्। viii

**16. अधोलिखितवाक्येषु रेखांकितपदानां प्रसंगानुकूलम् उचितार्थं चित्वा लिखत -**

(केवलं प्रश्नचतुष्टयम्) [1x 3 =3]

(i) ग)पितरम् ,(ii) घ)भूमौ,(iii) घ)ऋषभ:,(iv)ख) अद्भुता

# अभ्यास प्रश्नपत्राणि

# अभ्यास प्रश्नपत्रम् (1) कक्ष्या - दशमी

## संस्कृतम् (कोड सङ्ख्या-122)

होराः - 3 होराः पूर्णाङ्काः - 80

सामान्यनिर्देशाः-

1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 13 पृष्टानि मुद्रातानि सन्ति।
2. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्नाः सन्ति।
3. अस्मिन् प्रश्नपत्रे चत्वाराः खण्डाः सन्ति।
4. प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन्स्थाने क्रमेण लेखनीयानि।
5. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः।
6. प्रश्नस्य क्रमाङ्कः प्रश्नपत्रानुसारम् एव लेखनीयः।
7. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
8. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

प्रश्नपत्रस्वरूपम्

| | | | |
|---|---|---|---|
| ’क’ खण्डः | : | अपठितावबोधनम् | 10 अङ्काः |
| ’ख’ खण्डः | : | रचनात्मककार्यम् | 15 अङ्काः |
| ’ग’ खण्डः | : | अनुप्रयुक्तव्याकरणम् | 25 अङ्काः |
| ’घ’ खण्डः | : | पठितावबोधनम् | 30 अङ्काः |

## ’क’ खण्डः

## अपठितावबोधनम् (10 अङ्काः)

1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -

“ चेस्स् ” क्रीडा बुद्धिमतां क्रीडा इति मन्यते ।गते जुलाई 28 दिनाङ्के अत्र अस्माकं चेन्नई नगरे सर्वदेश चेस्स् क्रीडा स्पर्धा अस्माकं प्रधानमन्त्रिणा आरब्धा । स्पर्धा: “महाबलिपुरे” एव आयोजिता:,यत: महाबलिपुरस्य भूतपूर्वं नाम “ चतुरङ्गपट्टणम्”। चतुरङ्गा:- रथ,गज,तुरग,पदाति: च। चेस्स् क्रीडायां “गज-रूक्”, “तुरग-क्नैट्,” “पदाति:- सोल्जर्स्” इति रूपेण क्रीडनकानि उपयुज्यन्ते। अत्र “पूवनूर्” इति ग्रामस्थ परमेश्वरस्यापि नाम “ चतुरङ्ग क्रीडावल्लभ नाथ ” इति अतिप्रसिद्धम्। अनेन किं ज्ञायते अस्माकं पूर्वजा: अतीव बुद्धिमन्त एव।भारतीयौ विश्वनाथन् आनन्द: एवं प्रज्ञानन्दश्च विश्वस्तरीयौ क्रीडकौ ।

अ. <u>एकपदेन उत्तरत-</u> (केवलं प्रश्नद्वयम्) 1 X2 = 2

1) चेस्स् क्रीडा केषां क्रीडा इति मन्यते ?

2) महाबलिपुरस्य भूतपूर्व नाम किम् ?

3)सर्वदेश चेस्स् क्रीडा केन आरब्धा?

4) चेस्स् सर्वदेश स्पर्धा: कुत्र आयोजिता:?

आ. <u>पूर्णवाक्येन उत्तरत</u>- (केवलं प्रश्नद्वयम्) 2X2=4

1) चेस्स् क्रीडायां कानि कानि क्रीडनकानि उपयुज्यन्ते ?
2) भारतस्य विश्वस्तरीयौ क्रीडकौ कौ स्त:?
3) पूवनूर् ग्रामस्थ परमेश्वरस्य किं नाम?

इ. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत- 1

ई. यथानिर्देशम् उत्तरत (केवलं प्रश्नद्वयम्) 1 X 3 = 3

1) “अस्माकम् पूर्वजा: अतीव बुद्धिमन्त:” अत्र विशेष्य पदं किम् अस्ति?

क) पूर्वजा: ख) बुद्धिमन्त: ग) अतीव घ) अस्माकम्

2) “चेस्स् क्रीडा बुद्धिमतां क्रीडा इति मन्यते ”अत्र क्रियापदम् किम्?

क)क्रीडा ख)मन्यते ग) इति घ) बुद्धिमतां

3) “विश्वनाथन् आनन्द: एवं प्रज्ञानन्दश्च विश्वस्तरीयौ क्रीडकौ” अत्र विशेषणपदं किम् अस्ति?

क) एवं ख) क्रीडकौ ग) विश्वस्तरीयौ घ) विश्वनाथन्

4) “ चेस्स् ” क्रीडा बुद्धिमतां क्रीडा इति मन्यते ।अत्र कर्तृपदम् किम्?

”क) मन्यते ख) क्रीडा ग) बुद्धिमतां घ) चेस्स्

“ख’’ खण्डः

रचनात्मकं कार्यम् (15 अङ्काः)

2: भवान् शेखर:।अन्नानगर् केन्द्रीय विद्यालये दशमकक्षायां पठति। ज्वरग्रस्त हेतो:विद्यालयं गन्तुम् असमर्थोSस्ति ।दिनत्रयम् अवकाशं याचमान: स्वप्राचार्यं प्रति लिखिते पत्रे मञ्जूषात: पदानि चित्वा रिक्तस्थानानि पूरयत- पत्रं पुन: लिखत- 1/2x10=5

अम्बत्तूरत:

22 सेप्तम्बर्

------------1!प्राचार्यवर्या:!

अत्र  अहम् ---------------2आरभ्य ज्वरेण-----------------3अस्मि । भोक्तुम् अपि ---------------- 4 अस्मि ।अत: एव -------------------5 आगन्तुम् अशक्तोऽस्मि।--------------6 कृपया ---------------7, अद्य , श्व: च मह्यं---------------8 दातुं --------------- 9प्रार्थये।

आज्ञाकारी शिष्य:॥

---------------------10

केन्द्रीयविद्यालय:।

अन्नानगर्-चेन्नै-40.

| | | | | |
|---|---|---|---|---|
| गतदिनम् , | माननीया:, | अत:, | शेखर:, | आक्रान्त:, |
| दिनत्रयविरामं, | विद्यालयम्, | अशक्त:, | ह्य:, | सविनयं |

3. प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत -                                   1 x 5 = 5



मञ्जूषा-

| |
|---|
| उद्यानम्, क्रीडन्ति, बालकाः, बालिकाः च, पादकन्दुकम्, वृक्षाः, अनेके, विभाति, सन्तोषेण, भ्रमराः च, दूरे पर्वताः, दृश्यन्ते, रज्जुना सह, उत्पतन्ति, सायङ्कालः,सूर्यः |

**अथवा-**

मञ्जूषाप्रदत्तशब्दानांसाहाय्येन निम्नलिखितं विषयम् अहिकृत्य न्यूनातिन्यूनं पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत- 1 x 5 = 5

**" भारतस्य वैभवम् "**

मञ्जूषा--

| |
|---|
| प्रायद्वीपः, समृद्धः, देशः, नईदिल्ली, राजधानी, गङ्गा, यमुना, नद्यः, राज्यानि, प्रवहन्ति, आसीत्, विकसितदेशः, हिन्दुमहासागरः, वङ्गसागरः, अरब्सागरः, वाणिज्येन, वर्धमानः, कृषकाः, |

**4. अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत-**

**(केवलं वाक्यपञ्चकम्)** 1x5=5

1)Somanathapuram is in Gujarat.

सोमनाथपुर गुजरात में है।

2)Devotion towards duty also lead to salvation .

कर्म की भक्ति भी मोक्ष का साधन है।

3)Samskrita Grammar is Complete and easy to learn.

संस्कृत व्याकरण अतीव परिपूर्ण और आसान से उपयोग होता है।

4)“Bharat Desa”named as it was ruled by Raja Bharatha.

इस देश को राजा भरत शासन किया इसलिए भारत देश है।

5)Tiger is majesty and brave animal.

बाघ गम्भीर और बहादुर जानवर है।

6)Our ancestors are very brilliant and workaholic.

हमारे पूर्वजों अतिबुद्धिशाली लोग और कार्यरत हैं।

7)River Ganga is very Holy ,destroys all of our sins.

नदी गङ्गा परम पवित्र और हमारे सब पापों को नष्ट करती है।

“ग” खण्डः

अनुप्रयुक्तव्याकरणम् ( 25 अङ्काः)

5. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिविच्छेदं वा कुरुत -

( केवलं प्रश्नचतुष्टयम्) 1x4=4

i) आवयो:+ बालभावजनितं किञ्चिदविनयं पश्यति।

ii)आलस्यं हि मनुष्याणां शरीरस्थो महारिपु: ।

iii)राम: धिक् + माम् एवं भूतम्।

iv)बक:- “सर्वथा सम्यगुक्तम् सिंहमहोदयेन ।“

v) विद्वांस एव लोकेऽस्मिन् चक्षुष्मन्त: प्रकीर्तिता:।

6. अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत - ( केवलं प्रश्नचतुष्टयम्) 1x4=4

i)नास्ति उद्यमेन सम: बन्धु: कृत्वा यंनावसीदति।

क)उद्यमेसम:　　　　　　　ख)उद्यमसम:

ग)उद्यास्म:　　　　　　　घ)उद्यमैसम:

ii)पर <u>इङ्गितज्ञानफला:</u> हि बुद्धय:।

क)इङ्गितज्ञानमेव फलं यासां ता:　　ख)इङ्गितज्ञानफल: यस्य स:

ग)इङ्गितज्ञाना:फला:येषाम्　　　　घ)इङ्गिता: ज्ञाना: फला:येषाम्

iii) मन्त्री सभायाम् <u>वाक्पटु:</u> भवेत् ।

क)वाचां पटु:　　　　　　　ख) वाच: पटु:

ग) वाचि पटु:　　　　　　　घ)वाचने पटु:

iv) "<u>सूर्यचन्द्रयो:</u>" को वा भवतोर्वंशस्य कर्ता?

क)सूर्ययो: चन्द्रयो:　　　　　ख)सूर्यस्य च चन्द्रस्य च तयो:

ग)सूर्याय च चन्द्राय च　　　　घ)सूर्येण च चन्द्रेण च

v) <u>काकचेष्ट:</u> विद्यार्थी एव आदर्श: छात्र:।

क)काकस्य चेष्ट:　　　ख) काकस्य चेष्टा यस्य स:

ग)काक: चेष्टा इव　　　घ)काका: चेष्टा: इव

7. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उत्तरं विकल्पेभ्यः चित्वा लिखत-　　　( केवलं प्रश्नचतुष्टयम्) 1x4=4

i) मयूर:। मम नृत्यं तु प्रकृते: <u>आराधन+टाप्</u>

क)आराधन　　　　　ख)आराधना

ग))आराधने　　　　　घ)आराधनानि

ii) <u>अवक्रता</u> चित्ते वाचि च भवेत्।

क)अवक्र+त　　　　ख)अवक्र+तल्

ग)अवक्र+ता　　　　घ)अवक्र+ताम्

iii)विज्ञान+ ठक् अस्माकं पूर्वजा:।

क)वैज्ञानिक ख)वैज्ञानिका:

ग) वैज्ञानिकस्य घ)विज्ञानिका:

iv) छत्रपति शिवाजीवर्यस्य धीर+त्व न विस्मर्तव्यम्।

क)धीरत्व ख)धीरत्व:

ग)धीरत्वम् घ)धीरत्वा

v) विचित्रा दैवगति:।

i)विचित्र+आ ii)विचित्र+डा

iii)विचित्र+टाप् iv) विचित्र+ अ

8. वाच्यानुसारम् उचितपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत- (केवलं प्रश्नत्रयम्) 1x3=3

i) माता-" प्रिये! पुत्रि! अद्य मया मिष्टान्नं---------------।

क)करोमि ख)क्रिये

ग) क्रियते घ)करोषि

ii) पुत्री- "मात:! अहं मिष्टान्नं किमपि न------------------।

क)खादसि ख)खादति

ग)खादामि घ)खादन्ति

iii) माता- "त्वं प्रात:कदा -------------------------?

क)उत्तिष्ठति ख)उत्तिष्ठथ

ग) उत्तिष्ठसि घ) उत्तिष्ठामि।

iv) अहं प्रात:सूर्योदयात् प्राक् उत्थाय ---------------कर्तुम् आरभे।

क)कार्येण ख)कार्यस्य

ग)कार्याणि घ)कार्याभ्याम्

9. कालबोधकशब्दैः अधोलिखितकार्यक्रमं पूरयत- ( केवलं प्रश्नचतुष्टयम्) 1x4=4

i)कृष्ण: --------------(5.30) वादने उत्तिष्ठति।

ii) ----------------(5.45)वादने भ्रमति।

iii)--------------- (6.00) वादने स्नानं च करोति।

iv)------------------(7.15)वादने विद्यालं गच्छति।

v)---------------(7.45)पठितुं प्रारभते ।

10. मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत- (केवलं प्रश्नत्रयम्) 1x3=3

i)समुद्रे वृष्टि:------------भवति।

ii) इदं यानं ------------नई दिल्लीं गमिष्यति?

iii)अद्य भानुवासर: अस्ति--------------इन्दुवासर: भविष्यति।

iv)अधुना भवान् ------------गच्छति?

| |
|---|
| श्वः, कदा, वृथा, कुत्र |

11. अधोलिखितवाक्येषु रेखाङ्कित-अशुद्धिपदाय उचितपदं चित्वा वाक्यानि पुनः लिखत- (केवलं प्रश्नत्रयम्) 1x3=3

i) इमानि मे <u>मित्रा:</u> सन्ति।

1)मित्राणि 2)मित्रम्

3)मित्रे 4)मित्राणाम्

ii) आभरणानि सुशोभिता: सन्ति ।

1)सुशोभितम् 2)सुशोभिते

3)सुशोभित 4)सुशोभितानि

iii) त्वम् अधुना किं कार्यं करोति ?

1)करोमि 2)करोसि

3)करोषि 4)कुर्व:

iv) पय: मधुर: भवति।

1)मधुरम् 2)मधुरी

3)मधुरा 4)मधुराणि

“घ” खण्डः

पठितावबोधनम् (30 अङ्काः)

12. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत-5

भूमौ पतिते स्वपुत्रं दृष्ट्वा सर्वधेनूनां मातु: सुरभे: नेत्राभ्याम् अश्रूणि आविरासन्। सुरभे: इमाम् अवस्थां दृष्ट्वा सुराधिप: ताम् अपृच्छत्। “अयि!शुभे! किमेवं रोदिषि? उच्यताम् ”इति।

अ. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) ½ x2=1

क) सुरभे: पुत्र: कुत्र पतित:?

ख) सुरभि: कासां माता ?

ग) सुरभे: नेत्राभ्यां कानि आविरासन्?

आ. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्) 1 x2 =2

क)सुरभे: नेत्राभ्याम् अश्रूणाम् आविर्भावस्य कारणं किम्?
ख) सुराधिप: सुरभिं किम् अपृच्छत्?
ग) सुरभे: कीदृशी अवस्था आसीत्?

इ. निर्देशानुसारम् उत्तरत- (केवलं प्रश्नद्वयम्) 1 x2=2

क)“इमाम् अवस्थाम् ” अनयो: पदयो: विशेष्यपदं किम्?
ख) “रोदिषि” इति क्रियापदस्य कर्तृपदं किम् अस्ति?
ग) गद्यांशे “अपृच्छत्” इति क्रिया पदस्य कर्तृ पदं किम्?

13. अधोलिखितं पद्यांशं पठित्वाप्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत-5

“त्यक्त्वा धर्मप्रदां वाचं परुषां योऽभ्युदीरयेत् ।

परित्यज्य फलं पक्वं भुङ्क्तेऽपक्वं विमूढधी: ॥”

अ. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) ½ x2=1

क)क: अपक्वं फलं भुङ्क्ते?
ख)परुषां वाचं क: अभ्युदीरयेत्?
ग)कीदृशं फलं परित्याज्यम्?

आ. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्) 1 x2=2

क)विमूढधी: कीदृशं वाचम् अभ्युदीरयेत्?
ख)विमूढधी: कीदृशं फलं भुङ्क्ते?
ग)विमूढधी: कीदृशीं वाचं परित्यजति?

इ. निर्देशानुसारम् उत्तरत- (केवलं प्रश्नद्वयम्) 1 x2=2

क) “परुषां वाचं” अनयो: पदयो: विशेष्यपदं किम्?
ख) “ पक्वं फलम्” अनयो:पदयो: विशेषण पदं किम् ?

ग) " भुङ्क्ते" इति क्रियापदस्य कर्तृ पदं किम्?

14. अधोलिखितं नाट्यांशं पठित्वाप्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत-5

सिंह: -(क्रोधेन गर्जन्) भो:!अहं वनराज: किं भयं न जायते? किमर्थं मामेवं तुदन्ति सर्वे मिलित्वा?

एक:वानर:- यत:त्वं वनराज: भवितुं तु सर्वथाऽयोग्य:। राजा तु रक्षक: भवति; परं भवान् तु भक्षक:। अपि च स्वरक्षायामपि समर्थ: नासि तर्हि कथम् अस्मान् रक्षिष्यसि?

अन्य: वानर:- किं न श्रुता त्वया पञ्चतन्त्रोक्ति:?

अ. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) ½ x2=1

क) क: क्रोधेन गर्जति?

ख) वनराज: क: अस्ति?

ग) अत्र क: भक्षक:?

आ. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्) 1 x2=2

क)सिंह: वानरं किं कथयति?

ख)राजा तु कीदृश: भवेत्?

ग)अन्य: वानर: किं कथयति?

इ. निर्देशानुसारम् उत्तरत- (केवलं प्रश्नद्वयम्) 1 x2=2

क) "योग्य:" इत्यस्य विलोमपदं किम् अत्र प्रयुक्तम् ?

ख) "तुदन्ति"इति क्रियापदस्य कर्तृपदं किम् अस्ति?

ग) "रक्षिष्यसि" इति क्रियापदस्य कर्तृपदं किम् अस्ति?

15. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत-( केवलं प्रश्नचतुष्टयम्) 1x4=4

क) प्रीताभ्य: प्रकृतिभ्य: राजान: प्रतिप्रियम् इच्छन्ति ।

ख) संसारे विद्वांस: ज्ञानचक्षुभि: नेत्रवन्त: कथ्यन्ते ।

ग) सर्वे प्रकृतिमातरं प्रणमन्ति।

घ) बुद्धिमती चपेटया पुत्रौ प्रहृतवती।

ङ) सुराधिप: ताम् अपृच्छत्।

16. मञ्जूषातः समुचितपदानि चित्वा अधोलिखितश्लोकस्य अन्वयं पूरयित्वा पुनः लिखत- 1x4=4

"यदि न स्यान्नरपति: सम्यङ्नेता तत: प्रजा।

अकर्णधारा जलधौ विप्लवेतेह नौरिव ॥"

अन्वय:- यदि नरपति: ---------(i)नेता न स्यात् तत:---------(ii)(अपि) -----------------(iii) नौ: इव------------- (iv)इह विप्लवेत ।

मञ्जूषा-

| | | | |
|---|---|---|---|
| अकर्णधारा, | सम्यक्, | प्रजा, | जलधौ |

अथवा

मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत- 1x4=4

" क्रोधो हि शत्रु: प्रथमो नराणां
देहस्थितो देहविनाशनाय ।
यथास्थित: काष्ठगतो हि वह्नि:
स एव वह्नि:दहते शरीरम् ॥

भावार्थ:- अस्य भाव: अस्ति- -----------(i) शरीरे विद्यमान: क्रोध: एव तस्य ------------(ii)भवति ; देहं विनाशयति च, यथा---------------(iii) सूक्ष्मतया विद्यमान:----------------(iv) तं काष्ठमेव दहते ।

मञ्जूषा-

| | | | |
|---|---|---|---|
| वह्नि:, | शत्रु:, | मनुष्याणाम्, | काष्ठे |

17. अधोलिखित कथांशं समुचित-क्रमेण लिखत- ½ x8=4

क) सा मामत्तुम् कलहायमानौ पुत्रौ चपेटया प्रहरति ।
ख) देउलाख्ये ग्रामे राजसिंह: प्रतिवसति स्म।
ग) बुद्धिमती अकथयत्-"अयम् एक: विभज्य भुज्यताम् "।इति
घ) एवं बुद्धिमती व्याघ्रजाद् भयात् मुक्ता भवति।
ङ) तस्य पत्नी पुत्र द्वयोपेता स्व पितुर्गृहं प्रति चलति स्म।
च) बुद्धिमती नारी जम्बुकं"पुरा त्वया व्याघ्रत्रयं दातुं प्रतिज्ञा कृता"।
छ) "अधुना एकम् आनीय यासि" किं कारणम् "
ज) गलबद्धशृगालक: व्याघ्र: सहसा भीत:सन् पलायते।

18. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलं उचितार्थं चित्वा लिखत-

(केवलं प्रश्नत्रयम्) 1x3=3

i) वायुमण्डलं <u>भृशम्</u> दूषितम् ।
क) भयङ्करम् ख) भानुकरम्
ग)अत्यधिकम् घ) भोगदम्

ii) अलम् अलं <u>मिथः</u> कलहेन !

क)परस्परम् ख)मादृशम्

ग)मानवम् घ)मेषजम्

iii) यः आत्मनः <u>श्रेयः</u> इच्छति ।

क)विश्वासम् ख)धान्यम्

ग)धनम् घ)कल्याणम्-

iv)हिमकरः <u>पशुपतेः</u> शिरः अधिरोहति।

क)कृष्णस्य ख)रामस्य

ग)शिवस्य घ)इन्द्रस्य

अभ्यासप्रश्नपत्रम् -2 कक्ष्या - दशमी

संस्कृतम् (कोड सङ्ख्या-122)

होराः - 3 होराः पूर्णाङ्काः - 80

सामान्यनिर्देशाः-

1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 13 पृष्टानि मुद्रातानि सन्ति।
2. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्नाः सन्ति।
3. अस्मिन् प्रश्नपत्रे चत्वाराः खण्डाः सन्ति।
4. प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन्स्थाने क्रमेण लेखनीयानि।
5. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः।
6. प्रश्नस्य क्रमाङ्कः प्रश्नपत्रानुसारम् एव लेखनीयः।
7. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
8. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

प्रश्नपत्रस्वरूपम्

| | | | |
|---|---|---|---|
| 'क' खण्डः | : | अपठितावबोधनम् | 10 अङ्काः |
| 'ख' खण्डः | : | रचनात्मककार्यम् | 15 अङ्काः |
| 'ग' खण्डः | : | अनुप्रयुक्तव्याकरणम् | 25 अङ्काः |
| 'घ' खण्डः | : | पठितावबोधनम् | 30 अङ्काः |

’क’ खण्डः

अपठितावबोधनम् (10 अङ्काः)

1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -

सङ्गणकं तु विज्ञानस्य अत्यधिकं विकसितं बुद्धिमत् च यन्त्रम् अस्ति । मुद्रण-सञ्चार-सैन्य-चिकित्सा-विज्ञान-पठनादिषु क्षेत्रेषु अस्य व्यापकः प्रभावः अस्ति। अस्य गणनशक्तिः स्मरणशक्तिः च असाधारणी अस्ति । अनलसम् अविरतं च कर्म करोति। अयम् आधुनिकयुगस्य तु कल्पवृक्षः भवति । परम् अद्यतनीयाः जनाः अलसाः भूत्वा लघुकार्याय अपि सङ्गणकाश्रिताः भवन्ति ॥

अ. <u>एकपदेन उत्तरत-</u> (केवलं प्रश्नद्वयम्) 1 X2 = 2

(i) सङ्गणकः कस्य कल्पवृक्षः भवति ?

(ii) अस्य गणनशक्तिः कीदृशी अस्ति ?

(iii) जनाः लघुकार्याय अपि कीदृशाः भवन्ति ?

आ. <u>पूर्णवाक्येन उत्तरत</u>- (केवलं प्रश्नद्वयम्) 2X2=4

(i) सङ्गणकं विज्ञानस्य कीदृशं यन्त्रम् अस्ति ?

(ii) सङ्गणकस्य व्यापकः प्रभावः कुत्र अस्ति?

(iii) सङ्गणकयन्त्रं कथं कार्यं करोति?

इ. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत- 1

ई. यथानिर्देशम् उत्तरत (केवलं प्रश्नद्वयम्) 1 X 3 = 3

(i) “ यन्त्रम्” - इति विशेष्यपदस्य विशेषणपदं किम् ?

(क) बुद्धिमत् (ख) सङ्गणकम् (ग) व्यापकः (घ) अलसाः

(ii) "निरन्तरम्" इति पदस्य किं पर्यायपदं गद्यांशे प्रयुक्तम् ?

(क) कर्म (ख) कल्पवृक्षः (ग) कदाचन (घ) अनलसम्

(iii) "भवन्ति" इति क्रियापदस्य कर्तृपदं किमस्ति ?

(क) जनाः (ख) अलसः (ग) असाधारणी (घ) परम्

iv) "अलसम्" इति पदस्य किं विलोमपदम् अत्र प्रयुक्तम्?

(क) बुद्धिमत् (ख) प्रभावः (घा) अनलसम् (घ) विकसितम्

"ख'' खण्डः

रचनात्मकं कार्यम् (15 अङ्काः)

2. भवतः नाम अर्णवः। भवान् छात्रावासे निवसति। "आगरायाः ताजमहलम्" इति स्थाने शैक्षिकभ्रमणाय गन्तुं भवान् इच्छति। तदर्थं धनप्रेषणार्थं पितरं प्रति लिखिते पत्रे रिक्तस्थानानि पूरयित्वा पुनः लिखत-

नवोदयविद्यालय-छात्रावासः
मुम्बई नगरम्
दिनाङ्कः-

परम-आदरणीयाः (i) -------------------।
सादरम् (ii) -------------------------।

सविनयं (iii ) ------------------- यत् मम मासिकी परीक्षा समाप्ता जाता। मम उत्तरपत्राणि (iv) -------------- अभवन्। अस्मिन् ग्रीष्मावकाशे अहं गृहं न (v) -------------- यतः विद्यालयेन एकस्याः (vi) ---------------------- आयोजनं कृतम्। एषा(vii) --------------------- आगरा- ताजमहलम् द्रष्टुम् आयोजिता अस्ति। यात्रा – व्ययार्थं पञ्चशतं(viii) ------------------------- भवन्तः प्रेषयन्तु। शेषं सर्वं कुशलम्। (ix) --------------------------- अग्रजाय च मम प्रणामाः।

भवदीयः प्रियपुत्रः

(x) -----------------

| |
|---|
| निवदनम्, शैक्षिकयात्रायाः, रूप्यकाणि, पितृमहाभागाः, अर्णवः, जनन्यै, आगमिष्यामि, प्राणामाः, शोभनानि, यात्रा |

3. प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत - 1 x 5 = 5



मञ्जूषा-

| |
|---|
| वानराः, वृक्षाः, वनस्य, सिंहाः, मृगाः, धावन्ति, कूर्दन्ति, पुष्पाणि, गजः, भल्लूकाः, उष्ट्रः, खगाः, विहरन्ति, इतस्ततः, आकाशे, मेघाः |

अथवा

मञ्जूषाप्रदत्तशब्दानांसाहाय्येन निम्नलिखितं विषयम् अहिकृत्य न्यूनातिन्यूनं पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत- 1 x 5 = 5

**“परोपकारः”**

मञ्जूषा-

| |
|---|
| परेषां, उपकारः, नद्यः, वहन्ति, परोपकाराय, दुहन्ति, गावः, कुर्वन्ति, सर्वदा, महापुरुषाः, मनसा, वचसा, कर्मणा, फलन्ति, वृक्षाः, जीवन्ति, |

**4. अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत-**

**(केवलं वाक्यपञ्चकम्)** 1x5=5

1) धूप में घर से बाहर मत जाइए ।
Do not go out of the house in the hot Sun.

2. वह एक प्रसिद्ध गायिका है |
She is a famous Singer

3. गङ्गा पवित्र नदी है |
Ganga is a holy river.

4.यह संसार कब भ्रष्टाचार मुक्त होगा?|
When will this world become free from corruption.

5. हम दोनों दोस्त थे |
We both were friends.

6 तुम स्वादिष्ट भोजन करो ।
You eat delicious food.

7. हम सब प्रतिदिन योगाभ्यास करें |
Let us do Yoga daily.

## "ग" खण्डः

## अनुप्रयुक्तव्याकरणम्  ( 25 अङ्काः)

5. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिविच्छेदं वा कुरुत –

( केवलं प्रश्नचतुष्टयम्) 1x4=4

i) सा व्याघ्रजाद् भयात् पुनः मुक्ता अभवत्।

ii) आचारः प्रथमः + धर्मः इति विदुषां वचः

iii) तयोरेकः वृषभः दुर्बलः आसीत्।

iv) माम् अस्मात् + नगरात् बहुदूरं नय।

v) वयसस्तु न किञ्चिदन्तरम्।

6. अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत - ( केवलं प्रश्नचतुष्टयम्) 1x4=4

i) उपाध्यायदूतः अस्मान् त्वरयति।

(क) उपाध्यायस्य दूतः (ख) उपाध्यायं दूतः

(ग) उपाध्यायः एव दूतः (घ) उपाध्यायः इव दूतः

ii) नदी उपग्रामं वहति।

(क) ग्रामम् अनु (ख) ग्रामेण सह

(ग) ग्रामं प्रति (घ) ग्रामस्य समीपम्

iii) प्रत्युत्पन्नमतिः सा अङ्गुल्या तर्जयन्ती उवाच। ।

(घ) प्रत्युत्पन्ना मतिः यस्याः सा (ख) प्रत्युत्पन्नं मतिः यया सा

(ङ) प्रत्युत्पन्ना मतिः यस्य सः (घ) प्रत्युत्पन्नः मतिः यस्य सः

iv) व्याघ्रः च चित्रकः च नदीजलं पातुमागतौ।

(क) व्याघ्रचित्रकः (ख) व्याघ्रचित्रकौ

(ग) व्याघ्रचित्रकाः (घ) व्याघ्रचित्रके

v) समीरेण चालिता कुसुमावलिः मे वरणीया स्यात्। ।

(क) समीराचालिता (ख) समीरा चालिता

(ग) समीराचालिता (घ) समीरचालिता

7. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उत्तरं विकल्पेभ्यः चित्वा लिखत- ( केवलं प्रश्नचतुष्टयम्) 1x4=4

i) जननी तुल्यवत्सला अस्ति।

(क) तुल्यवत्सल + टाप् (ख) तुल्यवत्सल + मतुप्

(ग) तुल्यवत्सल + ङीप् (घ) तुल्यवत्सला + टाप्

ii) धैर्य + मतुप् मन्त्री पराभवं न प्राप्नोति।

(ख) धैर्यमान् (ख) धैर्यमन्तः

(च) धैर्यवन्तः (घ) धैर्यवान्

iii) भाषायाः महत्त्वं को न जानाति ।

(क) महत् + त्व (ख) मह + त्वम्

(ग) महत् + त्वम् (घ) मह + त्व

iv) एतत् मङ्गल + ठक् कार्यम् अस्ति।

(क) माङ्गलिकः (ख) माङ्गलिकानि

(ग) माङ्गलिकाः (घ) माङ्गलिकम्

v) एषा तस्य कृतज्ञ + तल् अस्ति।

(क) कृतज्ञा (ख) कृतज्ञता

(ग) कृतज्ञतः (घ) कृतज्ञः

8. वाच्यानुसारम् उचितपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत- (केवलं प्रश्नत्रयम्) 1x3=3

(i) राधा - कृष्ण! किं त्वं संस्कृतं पठितुं -------------------।

(क) शक्नोमि (ख) शक्नोषि

(ग) शक्नोति (घ) शक्नुमः

(ii) कृष्णः - राधे! आम्, --------------------- संस्कृतं पठितुं शक्यते।

(क) अहम् (ख) मया

(ग) त्वम् (घ) त्वया

(iii) राधा - कृष्ण! श्वः त्वं --------------------- लिखसि वा?

(क) श्लोकः (ख) श्लोकस्य

(ग) श्लोकम् (घ) श्लोकेन

(iv)कृष्णः- राधे! आम्, मया श्लोकः ----------------------------।

(क) लिख्यते (ख) लिखामि

(ग) लिख्यन्ते (घ) लिखामः

9. कालबोधकशब्दैः अधोलिखितकार्यक्रमं पूरयत- (केवलं प्रश्नचतुष्टयम्) 1x4=4

(i) अद्य सायं ------------------- 5.00 वादने वार्षिकोत्सवस्य आरम्भः भवति।

(ii) मुख्यातिथिः -------------------- 5.15 वादने आगच्छति।

(iii) सायं ----------------------------- 5.30 सांस्कृतिककार्यक्रमाः भवन्ति।

(iv) मुरस्कारवितरणं -------------------- 6.15 वादने भवति।

(v) मुख्यतिथेः भाषणं ---------------------------- 6;45 भवति।

10. मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत-
(केवलं प्रश्नत्रयम्) 1x3=3

(i) ---------------------------------- वायुमण्डलं भृशं दूषितम्।

(ii) व्याघ्रः अपि ------------------------------------------ नष्टः।

(iii) समुद्रेषु वृष्टिः ---------------------------------------- भवति।

(iv) गङ्गा ------------------------------------------- निर्गच्छति?

| |
|---|
| कुतः, सहसा, वृथा, इदानीम्, |

11. अधोलिखितवाक्येषु रेखाङ्कित-अशुद्धिपदाय उचितपदं चित्वा वाक्यानि पुनः लिखत- (केवलं प्रश्नत्रयम्) 1x3=3

(i) ताः बालिकाः पूजां <u>करोति</u>।

(क) करोमि (ख) कुर्वः

(ग) कुर्वन्ति (घ) करोषि

(ii) सा महिला <u>बुद्धिमान्</u> आसीत्।

(क) बुद्धिमती (ख) बुद्धिमत्

(ग) बुद्धिमन्तः (घ) बुद्धिमत्यौ

(iii) <u>अहं</u> ग्रामं गच्छसि।

(क) सः (ख) त्वम्

(ग) ते (घ) ताः

(iv) अहं श्वः विद्यालयं न <u>गच्छामि</u>।

(क) गमिष्यामि (ख) अगच्छम्

(ग) गमिष्यामः (घ) गच्छन्ति

## "घ" खण्डः

### पठितावबोधनम् (30 अङ्काः)

12. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत-5

एकदा स पिता तनुजस्य रुग्णतामाकर्ण्य व्याकुलो जातः पुत्रम् द्रष्टुं च प्रस्थितः । परमर्थकर्श्येन पीडितः बसयनम् विहाय पदातिरेव प्राचलत् । पदातिक्रमेण संचलन् सायं समयः अपि असौ गन्तव्याद् दूरे आसीत्। "निशान्धकारे प्रसृते विजने प्रदेशे पदयात्रा न शुभवाहा ", एवं विचार्य स पार्श्वस्थिते ग्रामे रात्रिनिवासं कर्तुं किञ्चिद् गृहस्थमुपागतः । करुणापरो गृही तस्मै आश्रयं प्रायच्छत्।

अ. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) ½ x2=1

क) पिता कं द्रष्टुं प्रस्थितः?

ख) कस्य रुग्णतामाकर्ण्य पिता प्रस्थितः?

ग) का न शुभावहा?

आ. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्) 1 x2=2

क) पिता किं विचार्य गृहस्थम् उपागतः?

ख) पिता किमर्थं पदातिरेव प्राचलत्?

ग) कः करुणापरः अस्ति?

इ. निर्देशानुसारम् उत्तरत- (केवलं प्रश्नद्वयम्) 1 x2=2

क) "पुत्रस्य"- इत्यर्थे अत्र किं पदं प्रयुक्तम्?

ख) "विजने प्रदेशे" अनयोः विशेषणपदं किम्?

ग) "प्रायच्छत्" इति क्रियायाः कर्ता कः?

13. अधोलिखितं पद्यांशं पठित्वाप्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत-5

य इच्छत्यात्मनः श्रेयः प्रभूतानि सुखानि च।

न कुर्यादहितं कर्म स परेभ्यः कदापि च॥

अ. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) ½ x2=1

क) कस्य श्रेयः इच्छति?

ख) प्रभूतानि कानि इच्छति?

ग) कीदृशं कर्म न कुर्यात्?

आ. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्) 1 x2=2

क) केभ्यः अहितं कर्म न कुर्यात्?

ख) कः अहितं कर्म न कुर्यात्?

ग) अहितं कर्म कदा न कुर्यात्?

इ. निर्देशानुसारम् उत्तरत- (केवलं प्रश्नद्वयम्) 1 x2=2

क) “कर्म” इत्यस्य विशेषणपदं किम्?

ख) "प्रभूतानि” कस्य विशेषणम्?

ग) “कल्याणम्” इत्यस्य कः पर्यायः अत्र प्रयुक्तः?

14. अधोलिखितं नाट्यांशं पठित्वाप्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत- 5

उभौ- राजासनं खल्वेतत्, न युक्तमध्यासितुम्।

रामः- सव्यवधानं न चारित्रलोपाय। तस्मादङ्क-व्यवहितमध्यास्यतां सिंहासनम्।

(अङ्कमुपवेशयति)

उभौ- (अनिच्छां नाटयतः) राजन्!

अलमतिदाक्षिण्येन।

रामः- अलमतिशालीनतया

भवति शिशुजनो वयोऽनुरोधात् गुणमहतामपि लालनीय एव।
व्रजति हिमकरोऽपि बालभावात् पशुपति-मस्तक-केतकच्छदत्वम्॥

अ. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) ½ x2=1

क) कुशलवौ कां नाटयतः?
ख) कः लालनीयः एव?
ग) कुत्र अध्यासितुं न युक्तम्?

आ. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्) 1 x2=2

क) रामः लवकुशौ कथं सिंहासनं अध्यासितुं वदति?
ख) "अलमतिदाक्षिण्येन" इति कौ कं वदतः?
ग) कः अङ्कं उपवेशयति?

इ. निर्देशानुसारम् उत्तरत- (केवलं प्रश्नद्वयम्) 1 x2=2

क) "उचितम्"-इत्यर्थे अत्र किं पदं प्रयुक्तम् ?
ख) "चन्द्रः"-इत्यस्य समानार्थकपदं किम्?
ग) "इच्छाम्"- इत्यस्य कः विपर्ययः अत्र प्रयुक्तः?

15. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत-( केवलं प्रश्नचतुष्टयम्) 1x4=4

क) तत्वार्थस्य निर्णयः विवेकेन कर्तुं शक्यः।
ख) स भारवेदनया क्रन्दति स्म।
ग) प्रकृत्याः सन्निधौ वास्तविकं सुखं विद्यते।
घ) त्वं मानुषात् पिबेषि।
ङ) सर्वे प्रकृतिमातरं प्रणमन्ति।

16. मञ्जूषातः समुचितपदानि चित्वा अधोलिखितश्लोकस्य अन्वयं पूरयित्वा पुनः लिखत- 1x4=4

गुणी गुणं वेत्ति न वेत्ति निर्गुणो
बली बलं वेत्ति न वेत्ति निर्बलः
पिको वसन्तस्य गुणं न वायसः
करी च सिंहस्य बलं न मूषकः॥

अन्वयः - गुणी ---------------------------------- (i) वेत्ति, निर्गुणः (गुणं) न वेत्ति। -------------------- (ii) बलं वेत्ति, निर्बलः (बलं) न वेत्ति। ---------------------(iii ) गुणं पिकः (वेत्ति) वायसः न ( वेत्ति), सिंहस्य बलं -------------(iv ) (वेत्ति) मूषकः न ॥

मञ्जूषा

| |
|---|
| करी, गुणम्, वसन्तस्य, बली |

अथवा

मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत- 1x4=4

निमित्तमुद्दिश्य हि यः प्रकुप्यति।
ध्रुवं सः तस्यापगमे प्रसीदति॥

भावार्थः - नरस्य क्रोधस्य किमपि -------------- (i ) भवति यदि तस्य कारणस्य एव ---------------- (ii ) भवति तदैव ----------------------- (iii ) स्वयमेव शाम्यति ------------------------------- (iv) च प्रसीदति॥

मञ्जूषा

| |
|---|
| नरः, निवारणम्, क्रोधः, कारणम् |

17. अधोलिखित कथांशं समुचित-क्रमेण लिखत- ½ x8=4

क) अन्ते अशक्तः वृषभः भूमौ पतति।

ख) सुराधिपः सुरभेः रोदनस्य कारणं पृच्छति।

ग) सुराधिपः सुरभिं सान्त्वयति।

घ) कश्चित् कृषकः बलीवर्दाभ्यां क्षेत्रं कर्षति।

ङ) तयोः एकः बलीवर्दः दुर्बलः अस्ति।

च) कृषकः तं दुर्बलं वृषभं बलेन नयति।

छ) सुराधिपस्य प्रभावेन महती वृष्टिः भवति।

ज) पतितं वृषभं दृष्ट्वा सुरभिः रोदिति।

18. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलं उचितार्थं चित्वा लिखत-

(केवलं प्रश्नत्रयम्) 1x3=3

**i) दुर्बलः वृषभः <u>जवेन</u> गन्तुम् अशक्तः आसीत् ।**

**(क ) मन्दगत्या** **(ख) तीव्रगत्या**

**(ग) सामान्येन** **(घ) प्रयासेन**

**ii) ) सः ऋषभः क्षेत्रे <u>पपात</u>।**

**(क) अपश्यत्** **(ख) अवदत्**

**(ग) आगच्छत्** **(घ) अपतत्**

**iii) विदूषकः रामम् <u>उपसृत्य</u> वदति।**

**(क) दूरं गत्वा** **(ख) समीपं गत्वा**

**(ग) अपसृत्य** **(घ) मध्ये स्थित्वा**

**iv) यदि त्वं मां मुक्त्वा <u>यासि</u> तदा वेला अपि अवेला स्यात् ।**

**(क) प्राप्नोषि** **(ख) आगच्छसि**

**(ग) गच्छसि** **(घ) तिष्ठसि**

# अभ्यासप्रश्नपत्रम् -3,

**कक्षा - दशमी** **अवधि :- होरात्रयम्**

**विषयः -** **संस्कृतम् SANSKRIT** **पूर्णांका80 :**

खण्डः क SECTION A ) अपठितांश-अवबोधनम् - 10 अंका :

**.1अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**

वर्तमानकाले मानव :समस्यावर्ते पतितोऽस्ति । एकत्र देहस्य अनेके रोगा :, अन्यत्र मनस :चिन्ता :। कार्यवैफल्येन नैराश्यं भवति । जीवनशैल्या :परिवर्तनं विना मार्गान्तरं नास्ति । व्यायामाभावात् शरीरस्य स्थौल्यं वर्धते तारुण्यावस्थायां च मधुमेह :जायते । एतदेव व्याधि :उच्यते । आधिव्याधिभ्यां पीडितो मानव :निद्रां न लभते । मानव :अतृप्त्या सदा खिद्यते । अत :यथाशक्ति शारीरकश्रम :कर्त्तव्य : । यत्र पद्भ्यां गन्तुं शक्यते तत्र वाहनेन न गन्तव्यम् । अलं श्रमचिन्त्या । इदं शरीरं पोषितमपि पालितमपि च शोभते । स्वस्थशरीरेणैव मानव :सोत्साहं गृहस्थजीवनस्य सर्वविधानां समस्यानां समाधाने कुशल: भवति । स : आध्यात्मिकज्ञानमपि लभते । उक्तञ्च ‘ शरीरमाद्यं खलु धर्मसाधनम् ’ ।

अ) एकपदेन उत्तरत । (केवलं प्रश्नद्वयम् ) 1 x 2 = 2

i ) देहस्य अनेके के भवन्ति ?

ii ) जीवनशैल्याः परिवर्तनं विना किं नास्ति ?

iii ) कया अलम् ?

आ. <u>पूर्णवाक्येन उत्तरत</u>- (केवलं प्रश्नद्वयम्) 2X2=4

i ) व्यायामाभावात् किं जायते ?

ii ) कुत्र वाहनेन न गन्तव्यम् ?

iii ) स्वस्थशरीरेणैव मानवः कीदृशः भवति ?

इ. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत- 1

ई. यथानिर्देशम् उत्तरत (केवलं प्रश्नद्वयम्) 1 X 3 = 3

i ) **‘ शरीरस्य ’** इत्यस्य समानार्थकं पदं किम् ?

क) सन्तोष : ख) मानव : ग) देहस्य ( घ ) यत्र

ii ) **‘ अनेके रोगाः ’** अनयो :पदयो: विशेषणम् किम् ?

क) अनेके ख) मानवः ग) नर : ( घ ) पीडिताः

iii ) **‘ शोभते ’** इति क्रियापदस्य कर्तृपदं अनुच्छेदे किमस्ति ?

क) खलु ख) दु:खस्य ग) शरीरस्य ( घ ) शरीरम्

iv ) अनुच्छेदे **‘ अन्तिमम् ’** पदस्य क :विपर्यय :आगत :?

क) अलम् ख) आद्यम् ग) इदम् ( घ ) साधनम्

**खण्ड :ख ) SECTION B ) रचनात्मककार्यम् 15 अंका:**

.2पितरं प्रति लिखितं अध :पत्रं मञ्जूषापदसहायतया पूरयित्वा पुन :लिखत ।

½ x 10 = 5

विवेकानन्द-छात्रावास:

1__________

दिनांक :___________

2 ___________ पितृमहोदया ! :

सादरं प्रणामा :।

अत्र कुशलं तत्रास्तु । इदं विज्ञाय भवान् अतिप्रसन्न :भविष्यति यद् गतदिवसे अन्तर्विद्यालयीयभाषणप्रतिस्पर्धायां मया प्रथमम् स्थानं 3___________ । क्रीडादिवसे धावनप्रतियोगितायां अहमेव 4___________ आसम् । अस्मिन् वर्षे वार्षिकोत्सवे अहं नाट्याभिनयं 5 ___________ । अयं 6 ___________ आगामि-सोमवासरे आयोजयिष्यते । विद्यालयस्य पक्षत :ह्य :एव 7___________ प्रेषितम् । अहमपि भवन्तं सूचयामि यत् भवान् 8 _________ सह अवश्यम् आगच्छतु । मम 9 ___________ भविष्यति ।

भवत 10 ___________ पुत्रः

पीयूषः

**मञ्जूषा**

| |
|---|
| निमन्त्रणपत्रम् , प्रथमः , आज्ञाकारी , उत्साहवर्धनम् , मात्रा , प्रयागराजत :, लब्धम्, करिष्यामि , वन्दनीयाः , वार्षिकोत्सव:। |

.3अध :प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया **पञ्च** वाक्यानि संस्कृते लिखत -

1x 5 = 5



**मञ्जूषा**

| |
|---|
| पति , पत्नी , बालिका , वृक्षा :, बहव :, जना :, परस्परं , वार्तालापं , कुर्वन्ति , लिखति , पत्राणि , वृद्धजना :, अपि , सन्ति , स्त्रिय :, पुरुषा :। |

अथवा

मञ्जूषाप्रदत्तपदानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य **पञ्चभि:** संस्कृतवाक्यै :एकम् अनुच्छेदं लिखत ।

**“ पुस्तकमेलनम् ”**

| |
|---|
| चित्राणि , पुस्तकानि , मित्राणि , लोकार्पणम् , अभवत् , अतीवप्रसन्ना ध्वनिमुद्रिका :, संगणकम् , अन्त:प्रवेश :, विविधं साहित्यम् , विभिन्नानि , प्रकोष्ठानि , संस्कृतपुस्तकानि , जना :, पश्यन्ति । |

**मञ्जूषा**

.4अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत-
( केवलं वाक्यपञ्चकम् 1 x 5 = 5

1 )) लता नाचती है । Lata dances .

2 )) तुम सब गेंद से खेलते हो । All of you are playing with ball.

3 )) कल मोहन बाजार जायेगा । Mohan will go to the market tomorrow.

4 )) कल रमेश कहां था । Where was Ramesh yesterday ?

5 )) रमा सीता के साथ पढ़े । Rama study with Sita .

6 ) ) वृक्ष से पत्ते गिरते हैं । Leaves fall down from the tree .

7 )) क्या मैं पढ़ूं ? May I read .

खण्ड: ग ) SECTION C ( अनुप्रयुक्तव्याकरणम्- 25अंका :

.5अधोलिखितवाक्येषु रेखांकितपदेषु सन्धिं सन्धिविच्छेदं वा कृत्वा लिखत ।
केवलं प्रश्नचतुष्टयम् ) 1x 4= 4

1 **नागाः + च** वहन्ति बोधिता :।

. 2**युष्मद्दर्शनात्** कुशलमिव ।

3**प्रबुद्धः + अतिथिः** तमन्वधावत् अगृह्णात् च ।

4 यदि न **स्यान्नरपतिः** सम्यक् नेता ।

5 **एतयो + :जननी** तेनावमानिता ।

6. अधोलिखितवाक्येषु रेखांकितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्य :चित्वा लिखत । केवलं प्रश्नचतुष्टयम् 1( x 4 =4

1 काचिदियम् **व्याघ्रमारी** ।

क) व्याघ्राय मारयति इति सा ख) व्याघ्रं मारयति इति सा

ग) व्याघ्रस्य मारयति इति सा घ ) व्याघ्रं मारी

2 मुनि :राजानं **इष्टम् अनतिक्रम्य** अभ्यनन्दत् ।

क) यथिष्टम् ख) यथाष्टम्

ग) यथेष्टम् घ ) इष्टमन्ति

3 लवकुशौ रामं प्रणम्य वदतः ।

क) लवौ च कुशौ च ख) लवाय च कुशाय च

ग) लवा :च कुश :च घ ) लवः च कुशः च

4 **गलबद्धशृगालक :**व्याघ्र :पुन :पलायित :।

क) गलबद्ध :शृगालक: ख) गले बद्ध :शृगाल :यस्य स :

ग) शृगालः गले बद्ध :य :स: घ ) गले बद्धः श्रुगालकः येन सः

5 ) देहस्थितः **देहस्य विनाशनाय** क्रोधः ।

क) देहविनाशनाय ख) देहनाशने

ग) देहोनाशनाय घ ) देहस्यविनाशनाय

.7अधोलिखितवाक्येषु रेखांकितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्य :

चित्वा लिखत - )केवलं प्रश्नचतुष्टयम्( 1x 4 =4

i ) ललितलतानां माला **रमणीय + टाप्** ।

क) रमणीयः ख) प्रियम्

ग) रमणीया घ ) रमणीयता

1 महतां सम्पत्तौ विपत्तौ च **एकरूपता** ।

क) एकरूप + त्व ख) एकरूप + तल्

ग) एकरूप + मतुप् घ ) एकरूप + ङीप्

2 व्याघ्रं दृष्ट्वा **बुद्धिमती** चिन्तितवती ।

क) बुद्धि + ङ़ीप् ख) बुद्धिमत् + टाप्

ग) बुद्धि +मतुप् घ ) बुद्धिमती + त्व

3 तपोवनवासिनः **देवी** इति नाम्ना आह्वयन्ति ।

क) देव + त्व ख) देव + टाप्

ग) देव + तल् घ ) देव + ङीप्

4 अयं सन्दर्भ :प्रथमम् अवतीर्ण :**वसुमतीम्** ।

क) वसु + मतुप् ख) वसु + तल्

ग) वसु + क्त्वा घ ) वसु + ङीप्

.8मञ्जूषायां प्रदत्तै :पदै :वच्यपरिवर्तनं कृत्वा अधोलिखितं संवादं पुन :लिखत - 1x 3 =3

माला -लते ! इदानीं भवती किं पठति ।

लता -अधुना अहं भवद्गीताम् ( 1___________ ।

माला -मया अपि प्रतिदिनं प्रात 2___________ पठ्यते ।

लता -भगवद्गीतायां कर्मयोगस्य निरूपणम् अस्ति । एतद्विषये भवती किं 3) ___________

**मञ्जूषा**

| |
|---|
| भगवद्गीता , चिन्तयति , पठामि |

.9अधोलिखितदिनचर्यायां रिक्तस्थानानि कालबोधकशब्दै :पूरयत । किमपि चत्वारि 1(x 4 =4

1 रमा रात्रौ 8:30____________वादनात् पूर्वं गृहकार्यं समापयति ।

2 ) सा प्रात :5:30 ______________ वादने शयनात् उत्तिष्ठति ।

3 सा प्रातः 6 00:_____________ वादने उद्याने भ्रमणं करोति ।

4 सा प्रात 7:30 :__________ वादने स्नानं कृत्वा पूजां करोति ।

5सा प्रातः 8: 45______________ वादने विद्यालयं गच्छति ।

.10 अधोलिखितवाक्येषु रिक्तस्थानानि मञ्जूषाप्रदत्तैः
उचितै :अव्ययपदै :पूरयत - (केवलं प्रश्नत्रयम् ) 1 x 3 = 3

1 मन्त्री अत्र _______ आगमिष्यति ।

क) कुत्र ख) श्वः

ग) ह्यः घ ) उपरि

2 पार्वत्याः अपर्णा ________ नाम अपि प्रसिद्धम् ।

क) इति ख) शनैः

ग) कदा घ ) बहिः

3 ईश्वरः ________ समं तिष्ठति ।

क) तत्र ख) अधुना

ग) च घ ) सर्वत्र

4 आकाशे मेघाः _______ दृश्यन्ते ।

क) इतस्ततः ख) सह

ग) कुतः घ ) अधः

.11 अधोलिखितवाक्येषु रेखांकितपदम् अशुद्धम् अस्ति । शुद्धं पदं प्रदत्त-
विकल्पेभ्य :

चित्वा लिखत - ( केवलं प्रश्नत्रयम् ) 1x 3 = 3

1 छात्राः कदा जन्तुशालां <u>**द्रक्ष्याम**</u> **:**।

क) द्रक्ष्यसि ख ) द्रक्ष्यन्ति

ग ) द्रक्ष्यामि घ ) पश्यति

2 श्रीकृष्णः अर्जुनस्य **<u>मित्र</u>** <u>:</u>आसीत् ।

क) मित्रम् ख) मित्रस्य

ग ) मित्राणि घ ) मित्राः

3 **<u>गायकाः</u>** मधुरं गायति ।

क) गायकौ ख) गायिकाः

ग ) नायकाः ( घ ) गायकः

4 उद्याने सुन्दराः पुष्पाणि विकसन्ति ।

क) सुन्दराणि ख) सुन्दरे

ग ) सुन्दराः घ ) सुन्दानि

खण्ड :घ ) SECTION D ) पठित - अवबोधनम् 30 अंका :

12.

अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत - 5

कश्चन निर्धनो जन :भूरि परिश्रम्य किञ्चिद् वित्तमुपार्जितवान् । तेन वित्तेन स्वपुत्रं एकस्मिन् महाविद्यालये प्रवेशं दापयितुं सफलो जात :। तत्तनय :तत्रैव छात्रावासे निवसन् अध्ययने संलग्न :समभूत् । एकदा स पिता तनूजस्य रुग्णतामाकर्ण्य व्याकुलो जात :पुत्रं द्रष्टुं च प्रस्थित :। परमर्थकार्श्येन पीडित स बसयानं विहाय पदातिरेव प्राचलत् । पदातिक्रमेण संचलन् सायं समयेऽप्यसौ गन्तव्याद् दूरे आसीत् । " निशान्धकारे प्रसृते विजने प्रदेशे पदयात्रा न शुभावहा" , एवं विचार्य स पार्श्वस्थिते ग्रामे रात्रिनिवासं कर्त्तुं कञ्चिद् गृहस्थमुपागत :। करुणापरो गृही तस्मै आश्रयं प्रायच्छत् ।

अ) एकपदेन उत्तरत - ) केवलं प्रश्नद्वयम् ( ½ x 2 =1

i ) निर्धनजन: किम् उपार्जितवान् ?

ii ) तत्तनय :कुत्र निवसति स्म ?

iii ) निर्धनः जनः केन पीडितः ?

आ. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्) 1 x2=2

i ) अर्थकार्श्येन पीडितः सः जनः किं अकरोत् ?

ii ) किं विचार्य सः ग्रामे गृहस्थमुपागतः ?

iii ) पिता किम् आकर्ण्य व्याकुलो जातः ?

इ. निर्देशानुसारम् उत्तरत- (केवलं प्रश्नद्वयम्) 1 x2=2

i ) ‘ **धनम्** ’ इत्यस्य किं पर्यायपदं पद्यांशे प्रयुक्तम् ?

ii ) ‘ **प्राचलत्** ’ इति क्रियापदस्य कर्तृपदं किम् ?

iii ) ‘ **गृही** ’ इति पदस्य किं विशेषणपदं गद्यांशे प्रयुक्तम् ?

iv ) ‘ **विजने** ’ इति विशेष्यपदस्य किं विशेषणपदं गद्यांशे प्रयुक्तम् ?

.13

अधोलिखितं पद्यं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत - 5

निमित्तमुद्दिश्य हि य :प्रकुप्यति ,
ध्रुवं स तस्यापगमे प्रसीदति ।
अकारणद्वेषि मनस्तु यस्य वै ,
कथं जनस्तं परितोषयिष्यति ॥

अ ) एकपदेन उत्तरत (केवलं प्रश्नद्वयम् (( ½ x 2 =1

i ) मनः कीदृशम् ?

ii ) किम् उद्दिश्य जनः प्रकुप्यति ?

iii ) तस्य अपगमे मनुष्य :किं करोति ?

आ. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्) 1 x2=2

i ) कः तस्यापगमे ध्रुवं प्रसीदति ?

ii ) कं जन: कथमपि न परितोषयिष्यति ?

iii ) यस्य मनः अकारनद्वेषि , तं कः न परितोषयितुं शक्नोति ?

इ. निर्देशानुसारम् उत्तरत- (केवलं प्रश्नद्वयम्) 1 x2=2

i ) **' य :'** इति कर्तृपदस्य क्रियापदं किम् ?

ii ) **' अकारणद्वेषि मनः '** अनयो :पदयो :किं विशेष्यपदम् ?

iii ) **' मनुष्य :'** इत्यस्य पदस्य क :पर्याय :श्लोके प्रयुक्त :?

iv ) **' प्रसीदति '** इत्यस्य किं विलोमपदं श्लोके प्रयुक्तम् ?

.14

अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत - 5

व्याघ्रचित्रकौ -:अरे ! किं वनराजपदाय सुपात्रं चीयते ? एतदर्थं तु आवामेव योग्यौ | यस्य कस्यापि चयनं कुर्वन्तु सर्वसंमत्या |

सिंहः -: तूष्णीं भव भोः ! युवामपि मत्सदृशौ भक्षकौ न तु रक्षकौ | एते वन्यजीवाः भक्षकं रक्षकपदयोग्यं न मन्यन्ते , अत एव विचारविमर्शः प्रचलति |

बकः :- सर्वथा सम्यगुक्तम् सिंहमहोदयेन | वस्तुतः एव सिंहेन बहुकालपर्यन्तं शासनं कृतम् , परमधुना तु कोऽपि पक्षी एव राजा इति निश्चेतव्यम् |

अ) एकपदेन उत्तरत । ( केवलं प्रश्नद्वयम् ) ½ x 2 = 1

i ) कस्मै सुपात्रं चीयते ?

ii ) कौ सिंहसदृशौ भक्षकौ ?

iii ) केन सम्यगुक्तम् ?

आ. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्) 1 x2=2

i ) सर्वसंमत्या किं कुर्वन्तु ?

ii ) सिंहेन किं कृतम् ?

iii ) अधुना किं निश्चेतव्यम् ?

इ. निर्देशानुसारम् उत्तरत- (केवलं प्रश्नद्वयम्) 1 x2=2

i ) नाट्यांशे ‘ **प्रचलति** ’ इति क्रियाया :कर्तृपदं किम् अस्ति ?

ii ) ‘ **एते वन्यजीवाः** ’ इत्यत्र विशेष्यपदं किम् ?

iii ) नाट्यांशे ‘ **कुपात्रम्** ’ इत्यस्य किं विलोमपदं प्रयुक्तम् ?

iv ) ‘ **रक्षिता** ’ इत्यस्य पर्यायपदं किं प्रयुक्तम् ?

.15

रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत - (केवलं प्रश्नचतुष्टयम् ) 1x 4 = 4

)i ) उद्याने **पक्षिणां** कलरवं चेतः प्रसादयति |

)ii ) **प्रकृत्याः** सन्निधौ वास्तविकं सुखं विद्यते ।

)iii ) **व्याघ्रम्** दृष्ट्वा धूर्तः शृगालः अवदत् ।

)iv ) **सुराधिपः** ताम् अपृच्छत् ।

)v ) सर्वे **प्रकृतिमातरं** प्रणमन्ति ।

.16

मञ्जूषात :समुचितपदानि चित्वा अधोलिखितश्लोकस्य अन्वयं पूरयत - 1 x 4 =4

I. उदीरितोऽर्थ :पशुनापि गृह्यते ,
हयाश्च नागाश्च वहन्ति बोधिता :।
अनुक्तमप्यूहति पण्डितो जन :,
परेङ्गितज्ञानफला हि बुद्धय :॥

**अन्वय -: :**पशुना अपि )i) ________ अर्थ :गृह्यते , बोधिता :हया :च नागाः

च ( भारं ) )ii) __________ । पण्डित्तः जनः )iii) ___________ अपि ऊहति ।) iv) _________ परेङ्गितज्ञानफला हि )भवन्ति ( ।

**मञ्जूषा**

| बुद्धयः , उतीरितः , वहन्ति , अनुक्तम् |
|---|

अथवा ) OR )

मञ्जूषाया :साहाय्येन प्रदत्तश्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुन :लिखत 1 x 4 =4

वाक्पटुर्धैर्यवान् मन्त्री सभायामप्यकातर :।
स केनापि प्रकारेण परैर्न परिभूयते ।

**भावार्थ** - :य :मन्त्री) i) __________ सम्भाषणे चतुर :, धैर्यवान् ,) ii) _________ च भवति , स :मन्त्री) iii) __________ कथमपि) iv) _____________ न शक्यते ।

**मञ्जूषा**

| तिरस्कर्तुम् , निर्भीक :, सभायां , विरोधिभि : |
|---|

.17

अधोलिखित - कथांशं समुचितक्रमेण लिखत - ½ x 8 =4

i ) तत्क्षणमेव रक्षापुरुष :तम् अतिथिं चौरोऽयम् इति प्रख्याप्य कारागृहे प्राक्षिपत् ।

ii ) चौर :एव उच्चै :क्रोशितुमारभत " चौरोऽयं चौरोऽयम् " इति ।

iii ) चौरस्य पादध्वनिना प्रबुद्धोऽतिथि :चौरशंकया तमन्वधावत् अगृहणाच्च, परं विचित्रमघटत ।

iv ) तस्यामेव रात्रौ कश्चन चौर :गृहाभ्यन्तरं प्रविष्ट :।

v ) विचित्रा दैवगति :।

vi ) तस्य तारस्वरेण प्रबुद्धा :ग्रामवासिन :स्वगृहाद् निष्क्रम्य तत्रागच्छन् वराकमतिथिमेव च चौरं मत्वाऽभर्त्सयन् ।

vii ) यद्यपि ग्रामस्य आरक्षी एव चौर आसीत् ।

viii ) तत्र निहितामेकां मञ्जूषाम् आदाय पलायित :।

.18

अधोलिखितवाक्येषु रेखांकितपदानां प्रसंगानुकूलम् उचितार्थान् चित्वा लिखत ) केवलं प्रश्नत्रयम् ) 1 x 3 =3

) i ) गच्छ गच्छ **<u>जम्बुक</u>** ! ।

क) बिडाल : ख) व्याघ्र : ग) मनुष्य ! ( घ ) शृगाल !

ii ) पिता **<u>तनुजस्य</u>** रुग्णतामाकर्ण्य व्याकुलो जात :।

क ) शरीरस्य ख) पुत्रस्य ग)गात्रस्य ( घ ) सुतायाः

iii ) एतेन वचनेन **<u>दारकौ</u>** निर्भर्त्सयति ।

क) दुर्बल : ख) सबल : ग) पुत्रौ ( घ ) छात्रौ

iv ) तथापि **<u>वृषः</u>** नोत्थितः ।

क) निकटम् ख) वृषभः ग) स्पर्शम् ( घ ) शक्रः


धन्यवादाः
THANK YOU